No. १४८५

Title अनुमान खण्ड दीधिति टिप्पनी

Author x

Extent ८५ Age x

Subject न्याय वैशेषिकं

अनुमानखण्डदीधितिटिप्पनी

१५८४

८५ पत्रे

सेतादृशायथाश्रुतार्थपरस्य दृशाविशेषइत्यादिमूलस्यानुपस्थितिः। अन्यथासाधारण्यादिज्ञानप्रतिबंधकताया अपिव्यवस्थापयितुमु
चितत्वात्। अतस्तादृशमूलमन्यथाव्याख्यातुमवतारणिकामाह स्यादेतदिति। इत्यत्रासाधारण्ये एतत्स्थलीयासाधारण्यरूपदोषप्रका
रकहेतुविशेष्यकभ्रमविषयेसर्वसाध्यवद्व्यावृत्तत्वात्मके अव्याप्तिरिति। तद्विषयकत्वस्यनिरुक्तानुमितिप्रतिबंधकहेतुविषयकज्ञान
साधारणतयातादृशप्रतिबंधकतातिरिक्तवृत्तित्वादितिभावः। ननुकेवलंसर्वसाध्यवद्व्यावृत्तत्वंनदोषः अपितुसाधनवृत्तित्वविशिष्टं
तादृशविशिष्टविषयकत्वंतुनप्रतिबंधकतातिरिक्तवृत्तीत्यतआह सर्वेति। तत्र हेतौ असत्त्वात्। अवृत्तेः साध्यवतिपक्षेहेतोर्वृत्तेरि
तिशेषः। तथाचतादृशविशिष्टस्याप्रसिध्यातस्यदोषत्वासंभवेनप्रसिद्धस्याविशिष्टसाध्यवद्व्यावृत्तत्वस्यैवतत्रदोषतयाआवश्यकत्वा
दितिभावः। अद्रव्यद्रव्यत्वादावितिः। असमवेतद्रव्यत्वादावित्यर्थः। असमवेतत्वस्यध्वंससाधारणतयानित्यत्वव्याप्यत्वासंभवात् विशेष्यांश
निवेशः। अप्यनंतरमव्याप्तिरित्यनुषज्यते। तद्विषयकत्वस्यपक्षाविषयकज्ञानसाधारणतयाप्रतिबंधकतातिरिक्तवृत्तित्वादितिभावः। ननु
केवलंनित्यत्वव्याप्याद्रव्यद्रव्यत्वादिकंनतत्रदोषः। अपितुपक्षनिष्ठत्वद्वैव। तादृशविशिष्टविषयकत्वंतुप्रतिबंधकतानतिरिक्तवृत्त्येवेत्यतआह

हे० ग० पक्षस्येति॰ तथा च पक्षघटितविशिष्टाप्रसिध्द्या पक्षाघटितस्यैव दोषत्वमावश्यकमिति भावः॥ तयोः॥ तादृशस्थलीययोर्दोषत्वेनाभिमतयोरु

३७ क्तधर्मयोः॥ शब्दो नित्यः शब्दत्वादित्यादौ शब्दत्वादिविशेष्यकनित्यत्वव्याप्यत्वादिज्ञानविषययोः व्याप्तिशंकानास्पदत्वाद्दूषकताभ्युपगमेन तत्परिहार

स्य चासंभवत उक्तिकत्वाद्धेतुपदं सद्धेतुपरतया व्याचष्टे हेत्वोरिति॰ सद्धेत्वोः॥ साध्यवद्व्यावृत्तत्वरूपासाधारण्य साध्याभावव्याप्यवत्पक्षकत्व

37 रूपसत्प्रतिपक्षकत्वासंभवादसाधारणसत्प्रतिपक्षपदेऽन्यथा व्याचष्टे॰ साधारणेति॰ तथा॰ प्रकृते न सत्प्रतिपक्षपदार्थः॥ सद्धेत्वोर्दुष्टतत्स्वरूपाभास

त्वायोगादाभासपदमन्यथा व्याचष्टे आभासत्वादिति॰ तद्धेत्वोरित्यत्र तत्पदस्य हेतुमात्रपरत्वं न संभवति॰ सत्प्रतिपक्षस्थले प्रतिबंधकज्ञानस्य हेतु

विषयकत्वानियमात् तु विषयकत्वकथनस्याप्रयोजकत्वात्॰ बुद्धिपदस्यापि बुद्धिसामान्यपरत्वं न संभवति हेत्वादिज्ञानमात्रस्याप्रतिबंधकत्वा

दतस्तत्पदस्य हेतुपक्षोभयपरतया बुद्धिपदस्य च साध्यवद्व्यावृत्तत्वसाध्याभावव्याप्यवत्त्वावगाहिबुद्धिपरतया तद्बुद्धिपदं हेतुविषयकसाध्यवद्व्या ३७

वृत्तत्वरूपासाधारण्यबुद्धिपक्षविषयकसाध्याभावव्याप्यवत्ताबुद्धिपरत्वेन व्याचष्टे तद्बुद्ध्योरिति॰ तयोर्लक्ष्यतालाभाय हेत्वोरित्यनंतरस्थं कृतएवका

रोऽत्रयोजनीय इति तदर्थमंतर्भाव्य व्याचष्टे प्रतिबंधकत्वं परमायातमिति॰ परं॰ केवलं॰ अवधारणव्यवच्छेद्यं स्पष्टयति नत्विति॰ तद्विषयस्य॰ तादृशबु

द्विषयस्य· दोषत्वं· दोषलक्षणलक्ष्यत्वं· असत्त्वात्· लक्ष्यताप्रयोजकस्यासत्त्वात्· प्रतिबंधकीभूतज्ञानप्रमात्वस्यैव तद्विषयस्य लक्ष्यताप्रयोजकत्वा
दिति भावः। असत्त्वप्रं· विशिष्टस्याप्रसिद्धत्वादिति तु नार्थः। एकदेशाप्रयाव्याप्तेराशंकितत्वापाद विशिष्टाप्रसिद्धेस्तद्लक्ष्यतानिर्वाहकत्वविरहेणानु
पयोगात्· अन्यथा· प्रतिबंधकीभूतधर्मविषयस्य दोषत्वे· बाधभ्रमेण· पक्षे साध्याभावभ्रमेण· तस्य· तद्विषयसाध्याभावादेः। नन्वेवमुक्तस्य लेदेशा
विशेषहेतोरुक्तताप्रवाहो नोपपद्यत इत्यत आह निर्युक्तत्वादि· उपदर्शितस्य लेपि दशाविशेषहेतोरुक्ततामंगीकुर्वतस्तत्साधारण्यापल्लक्षणमन्य
थाव्याचष्टे ज्ञानस्येति· पक्षं तार्थस्य यत्परार्थेन्वयः। तथा च ज्ञानसंबंधित्वविशिष्टं यद्रूपावच्छिन्नं यल्लिंगितसंबंधेनानुमितिप्रतिबंधकतावच्छे
दकमित्यर्थः। अत्राप्यवच्छेदकत्वमनतिरिक्तवृत्तित्वमुक्तयुक्तेः। तत्पदमुभयत्र तद्रूपावच्छिन्नपरं· लक्षणार्थः। व्युत्क्रमेण लक्षणयोरर्थः। नन्वेताव
तैवकथं दर्शितसत्प्रतिपक्षादौ लक्षणसमन्वयः। तत्र प्रतिबंधकतावच्छेदकीभूतविशिष्टविषयकत्वस्याप्रसिद्धेः। कथं वा व्यभिचारादिकमादा
य सव्यभिचारादावेव लक्षणगमनं व्यभिचारादिविषयकत्वस्यैव प्रतिबंधकतावच्छेदकतया व्यभिचारादेरतथात्वादित्यत आह तद्येति· ताद
शप्रतिबंधकतावच्छेदकं चेत्यर्थः। भ्रमात्मकबाधज्ञानप्रतिबंधकतामादायापादितायाः सद्धेतोर्दुष्टतायाः असंभवं स्पष्टीकर्तुमाह बाधेति·

हे० गु०

बाधज्ञाननिष्ठप्रतिबंधकतायाम् अवच्छेदकप्रतिशेषः। पक्षस्य बाधत्वं साध्याभाववत्त्वं निविष्टं तेन तु वैज्ञानिकमिति सूचयितुं प्रमितेति। विषयस्याव
च्छेदकत्वे युक्तिमाह तद्विषयकत्वेनेति। तथा च विषयविषयकत्वस्येव विषयस्यापि विषयतयाऽवच्छेदकत्वम् अक्षतमिति भावः। विरोधिसामग्रीका
३८ परामर्श: लीनत्वादिति। विरोधिकोऽनुमितिसामग्रीकालीनत्वेन परामर्शादेः प्रतिबंधकत्वमित्यभिमानः। तथा च तदादाय वैसम्यप्रतिपक्षितेऽसाधारणे
38 च सद्धेतौ दृष्टत्वाद्विशेषेऽदुष्टत्वमिति भावः। ननु ज्ञाननिष्ठविरोधिसामग्रीकालीनत्वमादाय कथं हेतोर्दुष्टत्वं तस्य ज्ञान एव सत्त्वादित्याशंक्य परिह
रति तद्धत्वं चेति। तद्विषयहेतावपीति। तत्कालीननिरूपिताधेयतात्मकस्य तत्कालीनत्वस्याधेयभेदेन भेदानभ्युपगमाद् अभ्युपगमे वाधेयतासं
बंधेन तत्तत्कालस्यैवावच्छेदकतया तमादायैव लक्षणसमन्वयादिति भावः। नाभेदेनेति। विवक्षितुं शक्यमिति शेषः। साध्याभाववद्वृत्तित्वा
दिविशिष्टसाधनरूपदोषस्याभेदसंबंधेन हेतौ सत्त्वात् तादृशसंबंधेन तद्वत्त्वविवक्षायाम् अप्रसक्तेः बाधे तदभावादिति। वह्न्यभाववद्ध्रदादि ३८
रूपबाधे धूमादिहेत्वभेदासत्त्वादित्यर्थः। तथा च तत्राव्याप्तिरिति भावः। अत एव बाधितेऽव्याप्तेरेव। नाश्रयतयेति। तद्वत्त्वं विवक्षणीयमिति शेषः।
धूमादेर्वह्न्यभाववद्ध्रदनाश्रयत्वादेकज्ञानविषयत्वादिरूपसंबंधस्य चाधारत्वानिर्वाहकत्वादिति भावः। अव्याप्तिमुक्त्वातिव्याप्तिमप्याह वह्नि

आधेयतास्वरूपस्य तस्य तत्र तत्र भिन्नत्वात्

व्यभिचारीति। ननु साध्याभाववद्वृत्तित्वादिरूपविषयएव प्रतिबंधकतावच्छेदकोनतु तज्ज्ञानीयविशिष्टद्रव्यत्वादिस्तदाश्रयोनधूमादिरित्याशंकांनि
राकरोति साध्याभाववदिति। साध्याभाववद्वृत्तिहेतोर्ज्ञानस्येति। तादृशहेतुविषयकज्ञानस्येत्यर्थः। तथाचवह्न्यभाववद्वृत्तिद्रव्यत्वादिकमपि
विषयितयावच्छेदकमेवेतिभावः। ननुधूमादेस्तादृशधर्मवत्त्वेपिवह्नौसाध्येदुष्टःधूमोऽदुष्ट इत्यादिव्यवहारस्यनापत्तिसंभवः। उक्तयुक्त्यातद्धेतु
कानुमितिविरोधित्वरूपवत्त्वस्यतत्रदुष्टताव्यवहारानियामकत्वात्। अन्यथातत्त्वाप्यप्रतीकारात्। इत्यतोऽन्यत्रातिप्रसंगमाह साध्याभावादिविष
यकत्वस्येति। ज्ञाननिष्ठस्य। ज्ञानवृत्तित्वविशिष्टस्य। सत्त्वादिति। सत्तावान्साध्यादित्यादेर्ज्ञानेहेतुकस्साध्यनुमितिप्रतिबंधकतावच्छेदकेज्ञा
नांशेसत्ताद्यभाववद्वृत्तित्वावगाहित्वमादायसत्त्वेसाध्येज्ञानेदुष्टमितिव्यवहारापत्तेरित्यर्थः। येनकेनापिसंबंधेनतद्वत्त्वंविवक्षणीयमित्यपि
दूषयतियथाकथंचिदिति। अतिप्रसंजकत्वादिति। उक्तधर्ममादायसत्तादिसाध्यकेज्ञानेधूमाद्यंशेवह्न्यभाववद्वृत्तित्वावगाहित्वंएकज्ञान
विषयत्वादिसंबंधेनतद्वत्त्वमादायवह्न्यादिसाध्यकेधूमादावपिदुष्टत्वव्यवहारापत्तेरित्यर्थः। सत्प्रतिपक्षादिस्थलेविरोधिसामग्रीकालीनत्वे
नप्रतिबंधकतामादायतल्लक्षणसत्त्वमुपपादितंतद्दूषयति। विरोधिसामग्रीति। नस्यसाध्यानुमितिप्रतिबंधकइति। स्वजन्यानुमितिप्र

तिबंधकइत्यर्थः।कारणत्वप्रतिबंधकत्वयोरेकत्रानभ्युपगमादितिहृदयं·विभिन्नरूपेणतदुभयस्यैकत्रोपगमेप्रतिबंधकस्यचनायाह्मणी
हे०गा० तिः·नप्रतिबंधकत्वमनुपद्यते·तथाचविरोधिकोट्यनुमितिसामग्रीकालीनत्वेनपरामर्शादीनामनुमितिप्रतिबंधकत्वेमणिसमवहित
३९ त्वेनवह्न्यादीनामपिदाहप्रतिबंधकत्वापत्तेः।मणिसमवहितत्वापेक्षयालाघवान्मणित्वेनैवप्रतिबंधकताकल्प्यतइतिचेन्नहिविरो
39 धिसामग्रीकालीनत्वापेक्षयालाघवान्नाहृद्यसामग्रीत्वेनविरोधिपरामर्शत्वेनैववाप्रतिबंधकत्वंकल्प्यमपितुमुचितमितिकथं
विरोधिसामग्रीकालीनत्वमादायलक्षणंसंगमनीयं·तस्यप्रतिबंधकतानतिरिक्तवृत्तित्वादितिभावः।कार्यानुत्पत्तिव्याप्यतावच्छे
दकत्वरूपप्रतिबंधकतावच्छेदकत्वमेवात्रविवक्षितंनतुकारणीभूताभावप्रतियोगितावच्छेदकत्वरूपंतच्चविरोधिसामग्रीकाली
नत्वेप्यक्षतमेवेत्याह।अथसाध्यवत्त्वादिना·पक्षधर्मेति·यादृशधर्मविशिष्टनिश्चयाव्यवहितोत्तरक्षणत्व×ण्य×व्यापकीभूतानुमित्यनुत्पादस्तादृ ३९
शमेवेत्यर्थः।निश्चयत्वनिवेशात्बाधादिविषयकसंशयसंस्काराद्यव्यवहितक्षणेकदाचिदनुमित्युत्पादेपिनक्षतिः।अत्र·प्रकृतलक्ष
णे·प्रतिबंधकतावच्छेदकमुक्तं।प्रतिबंधकतावच्छेदकपदेनविवक्षितं·भवतिचेति·विरोधिकोट्यनुमितिसामग्र्याःप्रतिबंधकत्वकथनं

प्रतिबंधकसमवहितोत्तरक्षणे कार्यानुत्पादस्यावश्यकतया विरोधिसामग्रीकालीनत्वस्य निरुक्तप्रतिबंधकतावच्छेदकतायाऽआवश्यक
त्वदर्शनाय· तथा· अवश्यमनुमित्यनुत्पादः। विरोधिसामग्र्याः प्रतिबंधकत्वं यदुक्तं तदेवाहहृदयतीति· नवैत्विति। नहीत्यर्थः। कालादीति·
घटितां तं हेतुगर्भं विशेषणं· तथा च कारणसमुदायः सामग्री सा च क्वचिदपि न प्रतिबंधिका· कालादिसाधारणकारणानामपि तद्
तन्निविष्टत्वात्· तेषां च प्रतिबंधकतावच्छेदककोटिनिवेशस्य निष्फलत्वात् प्रतिबध्यकार्ये पि तेषामनुगुणत्वादित्यर्थः। सत्प्रतिप
क्षस्थलीयविरोधिकोट्यनुमितिसामग्र्यास्तत्कोट्यनुमितिप्रतिबंधकत्वमसंतासंभवदुक्तिमेव· तत्र फलानुत्पादेन सामग्र्या एवा क
सत्वादित्याह विशेषस्तत्विव साहित्या· अत्र· सत्प्रतिपक्षस्थले· सामग्र्या न प्रतिबंधिकेत्यनुपपद्यते· नत्वसत्वे· सामग्रीसत्वे· कार्यस्याव
स्यमुद्ववरत्वात्· सामग्र्याः कार्योत्पत्तिनियतत्वादिति भावः। ननु तत्र परामर्शादिरूपानुमितिहेतुसत्वादनुमितिः कथं नोत्पद्यत इत्यत आ
ह किंत्विति· विरोधिपरामर्शः। साध्याभावव्याप्यवत्तानिश्चयः। तथा· अनुमितिप्रतिबंधकः। ननु प[illegible]वह्न्यभावव्याप्यपरामर्शे वि
ह्न्यभावाभाववान्पक्ष इत्यादिबाधनिश्चयो वर्त्तते तत्र वह्निव्याप्यवत्ताज्ञानेन वह्न्यनुमितिर्जन्यत इत्यनुभवसिद्धं विरोधिप्रवृत्ताः परामर्शभा

नस्य प्रतिबंधकत्वे च तन्नोपपद्यत इत्यत आह यद्वेति· तत्सत्वेपि· विरोधिपरामर्शसत्वेपि· तत्साध्यबाधावतारे· तादृशपरामर्शानु
हे०गु० मेयविरोधिकोटेः पक्षे अभाववत्तानिश्चयदशायां· नानुमितिप्रतिबंधः। तत्र क्लृप्तसाध्यानुमित्यनुत्पादः। अप्रामाण्यग्रहाभावस्य
५० त्वनंतरं· वैशिष्ट्यमित्यनुषज्यते· तदभावस्य· विरुद्धकोटिविरहनिश्चयाभावस्य· तत्र· विरोधिपरामर्शस्य प्रतिबंधकतावच्छेदकगर्भे·
५० निवेश्यतामिति· अत्र विपरीतकोटिव्याप्यवत्तापरामर्शदशायां तत्कोटिविरहनिश्चयसत्वेन तत्परामर्शे भ्रमत्वग्रहानंतरमेवानुमि
तिः स्वीक्रियते न त्वन्यथेति भ्रमत्वग्रहाभाववैशिष्ट्यनिवेशेनैवोपपत्तौ तादृशबाधग्रहाभाववैशिष्ट्यनिवेशो व्यर्थ इत्यनिर्भरस्सूच
नाय यद्वेत्युक्तं। अप्रामाण्यग्रहाभावस्य दर्शितविधया प्रतिबंधकतावच्छेदकत्वं च दर्शितं। ननु उक्तविरोधिपरामर्शमात्रं प्रति
बंधकं तथापि तच्छरीतविरोधिसामग्रीकालीनज्ञानस्य फलानुत्पादनियतत्वात् तादृशसामग्रीकालीनत्वस्यैव निरुक्तप्रतिबंध ५०
कतावच्छेदकत्वं दुरपवादमेव· एवं तथाविधविरोधिपरामर्शकालीनत्वसमशीलबाधादिभ्रमकालीनत्वमादायापि दृष्टान्तविशेषे सत्प्र
तिपक्षितस्य हेतोर्दुष्टत्वमुपपद्यत एवेत्यतो विरोधिपरामर्शादिकालीनत्वमादाय सद्धेतावतिप्रसंगमाह यथा चेति· तथाविधेति· भ्र

मत्रमासाधारण्येऽप्यर्थः।अपीसनंतरंनानुमितिरित्यनुषज्यते·तथाचतादृशबाधादिग्रहकालीनत्वमपिनिरुक्तप्रतिबंधकतावच्छेदकत्व
घटकमेवेतिभावः।अतिप्रसंगइति·बाधादेरनित्यदोषतायाःकेनाप्यनभ्युपगमेनेष्टापत्तेरनवकाशादितिभावः।विरोधिपरामर्शादिकाली
नत्वमादायसर्वस्यसत्प्रतिपक्षितेदुष्टत्वंनोपपादयितुंशक्यतइत्याहनवेति·नहीत्यर्थः।अतीतादेरिति·तथाचातीतादिसद्धेतौविरोधि
परामर्शदशायांभवन्मतासिद्धसत्प्रतिपक्षितत्वंनोपपद्यतइतिभावः।सत्प्रतिपक्षितेसद्धेतौविरोधिव्याप्यवत्पक्षाद्यसिद्धावपि
प्रतिबंधकीभूतभ्रमविषयस्यासिद्धविरोधिव्याप्त्यादेरेवदोषत्वमितिमतंदूषयतियदपीति·यद्विषयकत्वेनेति·तदीयार्थःस्वरू
पसंबंधरूपमवच्छेदकत्वं·नत्वनतिरिक्तवृत्तित्वं·तथासतिविरोधिव्याप्त्यादेर्हेत्वाभासत्वानुपपत्तिः।प्रतिबंधकतायाज्ञाननिष्ठत्व
विशेषणंकामिनीजिज्ञासादिनिष्ठप्रतिबंधकतावच्छेदकधर्मेतिप्रसंगवारणाय·ननुविरोधिकोटिव्याप्यत्वस्यपर्वतोवह्निमान्धू
मात्पर्वतोनवह्निमान्जलत्वादित्यादौप्रतिबंधकीभूतज्ञानविषयसमवायादिसंबंधावच्छिन्नपक्षधर्मतायाःप्रकृतहेतावभावात्कथं
तस्यदुष्टत्वमतआहतद्वत्त्वमपीति·विरोधिव्याप्त्यादिमत्त्वमपीत्यर्थः।तज्ज्ञानरूपेति·स्वविषयकज्ञानविषयतेत्यर्थः।संबंधविशेषस्याविवक्षि

त्त्वादिति भावः ॥ तादृशसंबंधवत्त्वं प्रकृतहेतावुपपादयति · तस्येति · विरोधिव्याप्त्यादिज्ञानस्येत्यर्थः ॥ समूहालंबनतयेति · न चैवं कामि
हे० ग० कपरामर्शद्वयस्थले सत्प्रतिपक्षतानुपपत्तिरिति वाच्यं · तत्रापि तादृशव्याप्त्यादिप्रकारकप्रकृतहेतुविषयकपरमेश्वरज्ञानादिकमादा
यतद्वृत्त्युपपत्तेः ॥ साध्याभाववत्पक्षविषयकत्वेन · साध्याभावप्रकारेण पक्षावगाहित्वेन · साध्याभाववत्पक्षज्ञानेति · साध्याभावप्रका
४१ रकपक्षज्ञानांशे भ्रमात्वविषयकत्वेनेत्यर्थः ॥ भ्रमत्वभेदेन विकल्प्य ॥ तस्य तादृशज्ञानस्य · अतिव्याप्तेरिति · साध्यवत्यपि पक्षे · पक्षे सा
51 ध्यवत्त्वेऽपि सतीति · पक्षस्य साध्यवत्त्वे सत्यपीति यावत् · पर्वतो वह्निमान् धूमादित्यादौ भ्रमात्मकबाधादिनिष्ठप्रतिबंधकतावच्छेदकवि
षयतानिरूपकत्वस्य भावादेः स्वविषयकज्ञानविषयत्वादिसंबंधेन वैशिष्ट्यस्य हेतौ सत्त्वादिति भावः ॥ इदमुपलक्षणं ॥ वह्निमानित्यादौ विरो
धिपरामर्शशून्यकालेऽपि तद्विषयविरोधिव्याप्त्यादिकमादायापि हेतोर्दुष्टत्वप्रसंगो बोध्यः ॥ तत्रापि पक्षांशे तद्विशिष्टविशेषणकसमू ४१
हालंबनज्ञानसंबंधेन तद्वैशिष्ट्यसंभवात् · अनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं विवक्षणीयमित्यभिप्रायेण बाधभ्रमप्रतिबंधकता
मादायातिप्रसंगस्योद्धारमाशंकते विशिष्टेति · साध्याभाववद्विशिष्टपक्षविषयकत्वमेव प्रतिबंधकतानतिरिक्तवृत्तिनतु साध्या

भावादिमात्रमित्यर्थः। साध्याभावविशिष्टपक्षः। तत्र· बाधस्थले· सत्प्रतिपक्षस्य सर्वत्र तादृशाविशिष्टं प्रसिद्धमेवेत्यभिमानः। अग्रिमं निराकरो
तितत्किमिति· पक्षावृत्तिसाध्यके सत्प्रतिपक्षे साध्याभावव्याप्यविशिष्टपक्षस्य अप्रसिद्धत्वात्सर्वत्रेति· सत्प्रतिपक्षे· सत्प्रतिपक्षतयाभि
वृत्त्यतसिद्धे· प्रसिद्ध इति· तथाचानतिरिक्तवृत्तित्वरूपावच्छेदकत्वं विवक्षितुमशक्यमिति दर्शितं तदति व्याप्तिर्दुर्वारैवेति भावः। तद्धत्व
घटकसंबंधं विनिवेश्यापि दूषयति· यथाकथंचिदिति· अतिप्रसंगं सद्धेतुसाधारणं· तथाच पर्वतादेर्वह्न्यादिमत्वे साध्ये धूमादौ हेतुत्वाव्य
वहारापत्तिरिति भावः। तादृशसंबंधेन तद्धत्वस्य धूमादिरूपसद्धेतुसाधारणत्वं स्फुटयति धूमादेरिति· ज्ञानरूपेण· स्वविषयकज्ञान
विषयत्वेन· तदाश्रयाश्रयत्वादिना· आदिना एककालीनत्वपरिग्रहः। व्यभिचारादिसत्वात्। तद्व्यभाववृत्तित्वादिसत्वात्· ननु
यादृशसंबंधावच्छिन्नयत्प्रकारतानिरूपितधर्मिविशेष्यताशालित्वेन ज्ञानस्य प्रतिबंधकत्वं· तेन संबंधेन तद्धत्वमेव दुष्टत्वमि
तिवाच्यं। एवं च स्वरूपादिसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वादिप्रकारतानिरूपितहेतुविशेष्यताशालित्वेनैव व्यभिचारादिज्ञा
नस्य प्रतिबंधकतया तेन संबंधेन तद्धत्वस्य च हेत्वाभासत्वान्नातिव्याप्तिरित्याशंकां निराकुरुते यादृशेति· सर्वत्रसत्प्रतिपक्षितहेताविति·

कूटो वह्निमान् धूमवत्त्वादित्यस्थले धूमवत्त्वादिरूपहेतोर्व्याप्यताघटकसंबंधेन वह्न्यभावव्याप्यवत्तायाः असत्वादिति भावः। कूटो वह्निमान् धू-
हे० ग० मादित्यादौ धूमादिरूपहेतोर्व्याप्यताघटकसमवायादिसंबंधेन वह्न्याद्यभावव्याप्यधूमत्वादिमत्तायाः सत्वात्सर्वत्रैतत्कं। केचित्तु हेता-
४२ विति। सद्धेतुतादशायामपि क्वचिदित्यर्थः। पर्वतो वह्निमान् धूमादित्यादौ विरोधिपरामर्शासमवधानदशायामपि प्रतिबंधकतावच्छेद-
कप्रकारताश्रयवह्न्यभाववद्वह्निमदन्यत्वतद्व्याप्यादेः तादृशप्रकारतावच्छेदकस्वरूपादिसंबंधेन धूमादिहेतुत्वादिति भावः। यत्तु ज्ञान
संबंधेन तद्वत्त्वमेव दुष्टत्वं· ज्ञानं च विशिष्टव्यवहाराद्यनुरोधात् क्वचिदेव कदाचिदेव कस्यचित्संबंधः। एवं च विरोधिव्याप्त्यादेर्ज्ञानं विरोधि
परामर्शदशायामेव प्रकृतहेतौ तत्संबंधः तदैव तत्र दुष्टताव्यवहारात्· साध्याभावादेर्ज्ञानं तु न कदाचिदपि तथा· परमेश्वरादिसा
धारणं साध्याभावविशिष्टपक्षादेर्ज्ञानं तु तत्र सर्वदैवेति· तन्नु हास्यास्पदमेव· सकलाभियुक्तपुरुषसाधारणस्यानियतव्यवहारस्यासि ४२
द्धत्वात्· वासनाविशेषवतां तादृशव्यवहारस्य विपरीतस्यापि संभवात्· ज्ञानस्यानियतसंबंधत्वासाधकत्वात्· बाधसत्प्रतिपक्षज्ञान
योः प्रत्यक्षशाब्दज्ञानप्रतिबंधकत्वमभिधाय बाधसत्प्रतिपक्षयोर्लिंगज्ञानजन्यज्ञानमात्रवृत्तिधर्मावच्छिन्नप्रयोज्यतानिरूपितत्वयो

जकताश्रयाभावप्रतियोगिज्ञानविषयत्वरूपलिंगासाधारणदोषत्वं न संभवतीत्याक्षिप्तं मणिकृता॰ तादृशाप्रतिबंधकतायां च यु
क्तिर्नोक्तेति न्यूनतापरिहाराय तत्र युक्तिमाह॰ स्थाणुत्वाभावस्येति॰ स्थाणुत्वप्रत्यक्षशाब्दयोरिति॰ समानधर्मितावच्छेदककस्य स्थाणुत्वप्र
कारकस्य लौकिकसंनिकर्षाद्यजन्यप्रत्यक्षस्य शाब्दस्य चेत्यर्थः। एवं॰ शाब्दबुद्धौ बाधतदभावव्याप्यवत्ताज्ञानयोः प्रतिबंधकत्वे॰ नरशि
रःकपालमिति॰ नरशिरःकपालेशुचित्वानुमापकेन तद्धर्मिकप्रामाण्यंगत्वपरामर्शेन निस्वतःफलेद्वारा चागमजन्याशौचबोधवि
रोधः स्यादित्यर्थः। स चानुभवविरुद्धः। तत्र प्रामाण्यंगत्वज्ञानदशायामपि स्नानादावशौचज्ञानस्यानुभवसिद्धत्वादिति भावः। समाधत्ते॰
तत्रेति॰ तादृशाशौचज्ञानप्राक्काल इत्यर्थः। अनुकूलतर्काभावेन व्याप्तिनिश्चयस्य बलवत्तरागमाविरोधे नानुमितेश्चानुत्पत्तेरि
त्ययोजना॰ एवं च वास्तवव्याप्यधर्मस्य येन केनापि रूपेण ज्ञानमेव न विरोधि॰ अपि तु व्याप्यत्वरूपेण॰ अत्र च प्रामाण्यंगत्वस्य ज्ञानेपि
व्याप्तिग्राहकतर्कविरहेण व्यभिचारशंकयाशौचव्याप्यत्वेन तज्ज्ञानं न संभवति॰ कारणांतरविरहेण यत्र व्यभिचारशंकाविरहस्त
त्र कथंचिद्व्याप्तिग्रहेपि गृहीतप्रामाण्यकागमतात्पर्यविषयविपरीतविषयकत्वेन तत्राप्रामाण्यं गृह्यते॰ तथा च तादृशप्रामाण्यंगत्व

हे०गा० ४३ ज्ञानं न शौचानुमितिजनने शाब्दांशे च ज्ञानप्रतिबंधे वा प्रभवतीति समुदायार्थः। आगमेऽप्रामाण्यग्रहः शिष्यपरिग्रहादिनैव भवति यावच्चता
दृशापरामर्शेनाप्रामाण्यं गृह्यते तावन्न भवत्येवागमप्रवृत्तिरिति भावः। यद्वेत्यादिग्रंथेन बाधादिज्ञानस्यानुमित्यतिरिक्तज्ञानाप्रतिबं
धकत्वं व्यवस्थाप्य बाधादेर्लिंगिसाधारणदोषत्वमेवोपपादितं। तन्न संगच्छते। बाधितार्थस्य शाब्दाभ्युपगमेऽनुमितेरप्यनवबाधा
त्। तत्राप्यप्रामाण्यग्राहकतया बाधादिग्रहस्य प्रवृत्त्यादिविरोधितोपपत्तेरित्यत्र कल्पे ग्रंथकृतो निर्भरमाह यद्वेत्यादीति। बाधा
दिनिश्चयदशायामपि लौकिकसन्निकर्षादितः प्रत्यक्षोत्पत्त्या बाधनिश्चयसामान्यस्य प्रत्यक्षप्रतिबंधकत्वं न संभवतीत्यनुमित्य
साधारणप्रतिबंधकत्वं बाधनिश्चयत्वावच्छिन्नस्याक्षतमतो यद्विषयकनिश्चयत्वेनानुमित्यसाधारणप्रतिबंधकत्वं तत्त्वस्य ल
क्ष्यताप्रयोजकत्वाभिप्रायेण यद्वेत्यादिग्रंथस्य बाधलक्ष्यतोपपादकत्वं सुष्ठु संगच्छत इत्यत आह प्रत्यक्षं प्रतीति। समानेंद्रियजन्यबा ४३
धनिश्चयसत्त्वे लौकिकप्रत्यक्षस्याप्यनुत्पत्तेरानुमानिकेति बाधनिश्चयाविशेषणं व्यावृत्तं प्रतीति। तथा च तत्रैव लिंगसाधारणदोषत्वव्या
घात इति भावः। तत्रापि तदप्रतिबंधकत्वमाशंकते योग्यतेति। अन्यथासिद्धत्वादिति। बाधनिश्चयदशायां योग्यताज्ञानरूपकारणवि

व्याप्तिग्रहविरोधित्वमेवं साध्याभाववद्वृत्तित्वस्य ज्ञानमपि साध्याभावसामानाधिकरण्यघटितसाध्याभावव्याप्तिग्रहे प्रतिबंधकमिति तद्घटि
तस्यासाधारण्यस्यापि तथात्वमिति भावः। हृदयमित्यस्वरसस्सूचनाय। तद्वीजं तु साध्याभावाभाववत्त्वेन साध्यविषयकतद्वृत्तित्वज्ञानस्यैव साध्या
भावाभाववद्वृत्तित्वघटितस्य साध्याभावे हेतुसमानाधिकरणाभावाप्रतियोगित्वघटितस्य वा साध्याभावव्याप्यत्वस्य ग्रहे प्रतिबंधकतया साध्य
तावच्छेदकरूपेण साध्यविषयकतद्वृत्तित्वज्ञानस्य तत्प्रतिबंधकत्वं। निश्चितसाध्यादिमद्वृत्तित्वज्ञानस्य साध्यादिसामानाधिकरण्यसा
मान्याभावाविषयकतया साध्यादिव्याप्तिग्रहाप्रतिबंधकत्वं च। विशेष्यदलप्रयोजनं स्फुटयति असिद्धिविशेषइति। स्वरूपासिद्धिर्व्याप्य
त्वासिद्धिर्वेत्यर्थः। एतत्सूत्रलक्ष्यतात्पर्यभाय। ननु निश्चययाघटितस्य साध्यतदभाववद्वृत्तित्वस्य वृत्तिमत्वग्रहविरोधितया एतद्दूषणतर्भावेतस्या
धिकहेत्वाभासतापत्तिरित्यत आह साध्येति। यदीदृशं। यद्वृत्तिमत्वग्रहविरोधि। वृत्तिमत्वग्रहे ग्राह्याभावावगाहितया तत्सामान्याभावा
वगाहिज्ञानमेव विरोधि। न त्वेकविशेषाभावविशिष्टापरविशेषाभावरूपसाध्यतदभाववद्वृत्तित्वज्ञानमित्यस्वरसाद्वेदीति। निष्कृष्टमताभिप्रा
येणाह न तो वेदीति। इदमेव। निश्चययाघटितं साध्यतदभाववद्वृत्तित्वमेव। एवकारेण निश्चयघटितस्य व्यवच्छेदः। नन्वत्र साध्यादिव्याप्यत्वं यदि साध्या

हे०गा० हिमन्याप्तित्वे सति साध्याद्गिमद्वृत्तित्वं तदा द्वितीयलक्षणार्थाभेदः। साध्यवन्मात्रवृत्त्यादिपदस्यापि तादृशव्याप्तिमदर्थकत्वादित्यत आह व्यापकेति। द्विती
७२ यलक्षणस्यापि यथाश्रुतार्थपरत्वे पूर्ववद्व्याप्यविरुद्धयोर्दशाविशेषेऽसाधारणयोरसंग्रह इत्यत आह रीतिरिति। तत्रापि साध्यतदभाववन्मात्रवृत्तित्व
ग्रहविरोधिवृत्तिमत्त्वग्रहाविरोधिधर्मवत्त्वमेव विवक्षणीयमित्यर्थः। उपाध्यायमतमाह केचित्त्विति। असाधारण्याभावकालः पक्षकृतहेतुनिष्ठासा
धारण्यस्यावच्छेदकक्षणः। तेन पक्षशब्दत्वादेरसाधारण्यं तादृशक्षणस्य घटत्वादिनिष्ठासाधारण्याभावावच्छेदकत्वेपि न क्षतिः। अथ शब्दादौ
साध्यसंदेहदशायां शब्दत्वादावसाधारण्यव्यवहारप्रयोजकस्य तत्कालीनसाध्यादिनिश्चयाविषयीभूततद्धर्मिवृत्तित्वविरहस्य शब्दत्वादौ साध्या
दिनिश्चयदशायामपि तत्र सत्त्वात्पक्षकृतहेतुनिष्ठासाधारण्याभावस्याप्रसिध्याऽव्याप्तिः। न च तत्कालीनसाध्यादिनिश्चयाविषयीभूततद्धर्मिवृत्तित्व
रूपासाधारण्यघटकतत्कालादिविरहात्तदानीं तद्घटितासाधारण्यविरहोऽक्षत एवेति वाच्यं। प्रतियोगिकोटिप्रविष्टविशेषणासत्त्वस्याभावविशि ७२
शिष्टाभावाप्रयोजकत्वात्। अन्यथा दंडाद्यसत्त्वे दंडविशिष्टपुरुषाभावादेरिव दंडविशिष्टपुरुषाभावाद्यभावस्यापि सत्त्वप्रसंगात्। यदि च पक्षकृतहे
तुमद्विशेष्यकसाध्यतदभावान्यतरनिश्चयक्षण एवासाधारण्याभावकालत्यनेन विवक्षित इत्युच्यते तदा शब्दो नित्यः शब्दत्वादित्यादौ यदा कश्चि

दपिसाध्यस्यसाध्याभावस्यवानिश्चयोनास्तितदासव्यभिचारत्वप्रसंगः तादृशलक्षणस्यप्रकृतहेतुमद्विशेष्यकसाध्यादिनिश्चयस्याप्यनधिकरणत्वेन
तदातादृशनिश्चयलक्षणावच्छिन्नसाध्यादिव्याप्यभावस्यहेतौसत्वात्तदृशासाधारण्यघटकसाध्यादिनिश्चयासत्वेनासाधारण्यविरहेणोक्तपक्षेऽयोगात्
प्रकृतहेतुनिष्ठासाधारण्यघटकोयोयःतदन्यलक्षणस्यविवक्षणेतुयादृशासाध्यकस्थलेयादृशसाधारणस्यहेतोःकदापिनासाधारण्यंतत्राव्याप्तिः।
प्रकृतहेतुनिष्ठासाधारण्यस्याप्रसिद्धेः।मैवं।तत्तत्कालावच्छिन्नत्वविशिष्टस्यतत्तत्कालीनसाध्यादिनिश्चयविषयव्याप्यत्वरूपासाधारण्य
स्यप्रकृतहेतुनिष्ठाभावावच्छेदककालएवासाधारण्याभावकालेःहेतुमतिसाध्यादिनिश्चयदशायांकालांतरावच्छिन्नस्यकालांतरघटि
तासाधारण्यस्याभावकूटोहेतौसत्वेऽपियादृशासाधारणहेतोःकदापिनासाधारण्यं×धारx तत्राप्यंततोगगनादिनिष्ठप्रकृतसाध्यकासा
धारण्यस्याभावःप्रसिध्यत्येवेतिनदोषः।अथवाप्रकृतहेतुमद्विशेष्यकसाध्यतदभावान्यतरनिश्चयानधिकरणत्वंकिंचिद्विशेष्यकसाध्य
तदभावनिश्चयवत्वोभयाभाववान्लक्षणएवासाधारण्याभावकालेत्यनेनविवक्षितः।शब्दोऽनित्यःशब्दत्वादित्यादौयत्रक्वचिदपिनसाध्यस्य
तदभावस्यवानिश्चयस्तत्रलक्षणेप्रकृतहेतुमद्विशेष्यकसाध्यतदभावान्यतरनिश्चयानधिकरणत्वसत्वेऽपिसाध्यतदभावनिश्चयवत्वाभावेनोभया

हे०उ०
७२
73

भावोक्षतएवेतितदानसव्यभिचारतापसंगः। अकृतहेतुनिष्ठासाधारण्यघटकोयोयः क्षणस्तदन्यक्षणएवाविवक्षणीयः। यत्साध्यकस्थलेयस्यसाधारणस्यहे
तोः कदापिनासाधारण्यं तत्साध्यकस्थलीयलक्षणेऽसाधारण्याभावकालावच्छिन्नत्वंनोपादेयमेवं साध्यसाधनभेदेनलक्षणभेदादित्यपिकेचित्। विशे
षणाभावात् असाधारण्याभावकालावच्छिन्नत्वरूपंयोविशेषणं व्याप्तिद्वयेतदभावात् संग्रहः। तादृशविशेषविशिष्टव्याप्तिद्वयस्याभाववत्त्वं एतन्म
तेचपूर्वलक्षणेसाध्याभाववदवृत्तित्वघटितायाउत्तरत्रतद्वदन्यावृत्तित्वघटितायाव्याप्तेरनुप्रवेशाल्लक्षणयोर्भेदः। स्वव्यापकसामानाधिकरण्यरूपव्याप्तेरभा
वोनिवेशयितुमशक्यः। तादृशव्याप्तेः स्वत्वघटिततयाहेतुभेदेनभेदात्। साधारणहेतुकस्थलेतदप्रसिध्याऽभावासंभवात्। शिरोमणिव्याख्यायांचतादृ
शव्याप्तेरप्रसिद्धत्वेपितद्घटितपदार्थानांपरस्परंतेपक्षेवावगाहिज्ञानविरोधितायाएवनिवेशनेनानुपपत्त्यभावात्। व्यापकसामानाधिकरण्यमिहव्याप्तत्व
मित्युक्तत्वात्। एवमेतल्लक्षणपरएवायंग्रंथः नतुदोषलक्षणपरोपि। तादृशव्याप्तिद्वयशरीरान्यत्वस्यव्यभिचारपदार्थत्वाभावादित्यवधेयं। तन्मूलंसमिति। धिं ७३
तावीजंचासाधारण्यशरीरेतत्तत्पुरुषीयनिश्चयनिवेशस्यावश्यकतयासामान्यलक्षणस्यतत्तत्पुरुषविशेषनियंत्रितत्वं। नचेष्टापत्तिः। तथासतिसाधार ष
णहेतावपिअसाधारणहेतुवदमुकंप्रत्ययंव्यभिचारीतिव्यवहारप्रसंगात्। एवंसव्यभिचारपदस्यपारिभाषिकत्वमपीतरभेदानुमानेवैयर्थ्यसंभवेअसा

धकतानुमानैपरतयाव्यर्थवैयर्थ्य। विशेषणत्वादितिमूलव्याख्यानमनुचितमित्याशयेनेतरभेदानुमानेवैयर्थ्यपरतयैवमूलंव्याचष्टेव्यर्थेतीति। विरोधा
देरित्यादिनाअहेवृत्तित्वपरिग्रहः। साध्याभावेत्यादीति। साध्याभावव्याप्तिग्रहविरोधित्वं वृत्तिमत्वग्रहाविरोधित्वंवेत्यर्थः। तस्य। विरोधादेः। पार्थक्ये। व्यभिचा
रपदार्थबहिर्भूतत्वे। मानाभावादिति। तथाचविरोधादावपिव्यभिचारपदार्थरूपपक्षेतरभेदसत्त्वेनतद्व्यावर्तकविशेषणानवच्छिन्नस्यैवेतरभेदानुमापक
त्वसंभवादितिभावः। हेत्वाभासपदस्यान्यथाव्याख्यानात् उक्तहेतुत्वरूपहेत्वाभासत्वस्यलक्षणाघटकत्वात्प्रथममित्यादिदूषणस्यासंगतिः। एवंगगन
मनित्यंशब्दाश्रयत्वादित्यादौहेतोः साध्याभावव्याप्यत्वेपिसाध्याभावव्याप्तिग्रहविरोधिदर्शितधर्मवत्वंतत्राक्षतमेवेतितत्राव्याप्तिदानमप्यसंगतमतोयथा
श्रुतार्थेतादृशदोषद्वयंसंगमयतिप्रथममिति। एकमात्रसपक्षविपक्षस्यत्वेसर्वसपक्षाद्यप्रसिद्धिरित्याशंक्यव्याचष्टेसपक्षेति। सपक्षवृत्तित्वत्वावच्छिन्ना
भावोविपक्षवृत्तित्वत्वावच्छिन्नाभावश्चेत्यर्थः। सर्वतद्व्यावृत्तत्वं। सर्वसपक्षविपक्षव्यावृत्तत्वपदार्थः। तावतेवयत्किंचित्सपक्षविपक्षव्यावृत्तयोर्व्याप्यवि
रुद्धयोर्नातिव्याप्त्यवकाशइतिभावः। सपक्षगतत्वविपक्षव्यावृत्तत्वयोर्विशेषणयोर्विरुद्धातिव्याप्तिवारकतयासार्थक्यसंभवस्येत्याशंक्यदूषकतानुपयो
गित्वरूपवैयर्थ्यपरतांव्यर्थविशेषणत्वादितिमूलस्याहसपक्षेति। व्याप्यविरुद्धयोरिति। शब्दोऽनित्यः शब्दत्वादित्यादौव्याप्यस्यहेतोः साध्यवन्मात्रवृत्तित्वेपि

पक्षेपिवृत्तेःपक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वमक्षतमेव॰एवंशब्दोनित्यःशब्दत्वादित्यत्रविरुद्धस्यहेतोःसाध्याभाववन्मात्रवृत्तित्वेपिपक्षेपिवृत्तेःपक्षातिरिक्त
हे॰ग्र॰ साध्याभाववन्मात्रवृत्त्यन्यत्वमक्षतमेवेतिद्वयोःसंग्रहइतिभावः।पक्षातिरिक्तेत्यत्रपक्षपदस्यतत्तद्धर्मिमात्रपरत्वेपक्षेसिद्धिसत्वदशायांतत्रविशिष्टातिरिक्तस
७४ त्वोपगमादतिरिक्तांतस्यपक्षताशून्यपरत्वोपगमाद्वाइतिप्रसंगवारणसंभवेपिशब्दोनित्यःशब्दत्वादित्यादौबाधनिश्चयदशायामतिप्रसंगोदुर्वारएकस्मि
७५ न्बाधान्यतराभावरूपपक्षताविवक्षणेचगौरवमतःसंशयरूपपक्षतापरतयाव्याचष्टेपक्षत्वमितिसंदिग्धसाध्यकत्वं॰विषयतासंबंधेनसाध्यसंदेह
विशिष्टत्वं॰कालांतरीणसंशयविषयेपिसंशयरूपाविशेषणासत्वदशायांतद्विशिष्टभेदउपगम्यते॰अतिरिक्तांतंपक्षताशून्यपरं अतःसाध्यादिनि
श्चयदशायांनातिप्रसंगः।यदापक्षेसाध्यतदभावयोर्ननिश्चयोनापिसंशयः।तदाशब्दोनित्यःशब्दत्वादित्यादेर्नसाधारणता।किंतुयथायथंस
द्धेतुत्वंविरुद्धत्वंवेतिनाव्याप्तिप्रसंगइतिभावः।पक्षातिरिक्तवृत्तियत्साध्यतदभाववन्मात्रवृत्तितदन्यत्वार्थकत्वेनहिमान्धूमादित्यादौनातिव्या ७४
प्तिसंभवः।भेदप्रतियोगितावच्छेदकघटकदलद्वयस्यैवतत्रसत्वेनविशिष्टभेदासत्वादतःपक्षातिरिक्तत्वस्यसाध्यादिमद्विशेषणत्वाभिप्रायकत
यामूलंसंगमयतिधूमेत्यादीति॰यथाश्रुतेपक्षातिरिक्तोयःसाध्यादिमांस्तन्मात्रवृत्तिभिन्नत्वमित्यर्थेसप्तमीसमासादित्यर्थेनतुरूपणामितियोजना॰

सप्तमीसमासलभ्ये एतादृशार्थे नद्रूषणमित्यर्थः। कृते धूमवान्वह्नेरित्यादिसाधारणे शब्दो नित्यः शब्दत्वादित्याद्यसाधारणे च यथाश्रुतलक्षणस्याव्याप्तेर्याचि
ष्टपक्षवृत्तीत्यादीति। पक्षवृत्तित्वस्य साध्यसामानाधिकरण्यस्य च योग्रहस्तदविरोधीत्यर्थः। अनुमितेरौपाधिकस्येति समासेन लिखनं जनकज्ञानविषयस्ये
त्यस्य समुदायव्याख्यानतायामेव संभवतीत्यतो व्यासेन लिखनं। सपक्षसत्वादेर्नानुमितिजनकत्वमपि तु तज्ज्ञानस्यैवेत्यौपाधिकपदस्य जनकार्थकत्वं
न संभवतीति व्याचष्टे जनकज्ञानविषयस्येति। सपक्षसत्वादेरित्यादिना विपक्षासत्वपरिग्रहः। तेन द्रव्यं सत्वादित्यादौ सपक्षसत्वाभावसत्वेपि विप
क्षसत्वादेव लक्षणसमन्वयः। ननु चासाधारण्ये व्याप्तिस्तस्य सपक्षव्यावृत्तत्वघटिततया साध्यवद्वृत्तित्वग्रहाविरोधित्वमित्यत आह सपक्षवि
पक्षव्यावृत्तत्वस्य चेति। यस्त्वर्थे सपक्षत्वं निश्चितसाध्यवत्वं पक्षे पक्षान्तर्भावेन। तस्य असाधारण्यस्य। तज्ज्ञानविरोधित्वं साध्यसामानाधि
करण्यज्ञानविरोधित्वं। साध्यवद्वृत्तित्वसामान्याभावज्ञानमेव साध्यसामानाधिकरण्यसामान्यज्ञानविरोधि न तु तद्विशेषाभावात्मकसपक्ष
व्यावृत्तत्वज्ञानमपीति भावः। अथात्र विरुद्धहेतवो यद्यलक्ष्यास्तदा सपक्षवृत्तित्वाद्यभावादिकमादाय सर्वेषु तेष्वतिव्याप्तिः। तेषां लक्ष्यत्वे सा
ध्यसामानाधिकरण्यग्रहाविरोधित्वोपादानमनर्थकमेवेति चेन्न। दुष्टहेतुलक्षणे विरुद्धलक्ष्या एव। उक्तविशेषणोपादानं च दोषलक्षणे विरोधाति

हे०ग०
७५
75

व्याप्तिवारणायैव· सपक्षविपक्षव्यावृत्तत्वस्यासाधारण्यस्येत्यत्र विपक्षपदं संपातायातमेवेत्यवधेयं· अत्र च यद्रूपावच्छिन्नविषयकत्वेनानुमितिजन
कतातद्रूपावच्छिन्नाभावोऽवश्यं विवक्षणीयः। अन्यथा सपक्षसत्त्वादेर्हेतुत्वाद्यवच्छिन्नाभावमादायातिप्रसंगापातात्· एवं च निश्चितसाध्यवद्वृत्तित्वा
वच्छिन्नाभावसंग्रहः। निश्चयांशाज्ञानस्यानुमित्यहेतुतयातद्घटिततादृशधर्मविशिष्टविषयितावत्त्वेनानुमितिहेतुत्वाभावात्· येनकेनापि रूपे
ण यद्रूपाश्रयनिरूपितविषयितावत्त्वेन जनकतातद्रूपावच्छिन्नाभावविवक्षणे च हेतुत्वाद्यवच्छिन्नाभाववारणमशक्यमेवेति दूषणमशक्य
समाधानमित्यवधेयं· उपदर्शितसाधारणाऽसाधारणयोः संग्रहाय मिश्राः अन्यथैवैतल्लक्षणं व्याचक्षते तदुपन्यस्यति पक्षवृत्तो वाविति· पक्षा
वृत्तित्वं न पक्षवृत्तो विरोधश्च न विरुद्धभिन्नो वर्त्तत इति न पर्वतो वह्निमान् महानसत्वात् इत्यादौ वह्निमान् द्रव्यत्वादित्यादौ साध्योः स्वरूपासिद्धविरुद्धयोर
तिव्याप्तिः। सपक्षविपक्षवृत्तित्वं तद्व्यावृत्तत्वं च पक्षवृत्तो विरुद्धभिन्ने च वर्त्तत इति तदा दायोपदर्शितसाधारणासाधारणयोः संग्रहः। एतत्कल्पे ७५
पि पूर्ववद्विरुद्धालक्ष्याएव· विरोधस्य व्यभिचारतावारणायैव विरुद्धान्यवृत्तित्वोपादानमित्यवधेयं· अत्र च हेतुतावच्छेदकसंबंधेन पक्षवृत्तित्वविवक्ष
णमावश्यकमन्यथा हेतुतावच्छेदकसंबंधेन पक्षावृत्तेरपि येनकेनचित्संबंधेन पक्षवृत्तितया स्वरूपासिद्धेरपि पक्षवृत्तितयातद्वारणासंभवात्·

एवंच हेतुतावच्छेदकसंबंधेन यत्र पक्षवृत्तित्वमप्रसिद्धं तादृशाव्यभिचारिणि अव्याप्तिः। एवं गगने साध्यानिश्चयदशायां घटः शब्दवान् घटत्वादित्यादौ
असाधारणे व्याप्तिः। सपक्षव्यावृत्तत्वस्य विरुद्धे एव वर्त्तमानत्वादित्यस्वरसः केचिदित्यनेन सूचितः। ननु पूर्वपक्षग्रंथोक्तलक्षणावलंबनेनासिद्धांत
प्रणयनमसंगतं· उक्तदोषाणां जागरूकत्वादित्याशंकां निराकरोति· पूर्वोक्तेति· यथामतमिति· यद्यन्मतमालंब्य यल्लक्षणमभिहितं तत्तन्मतेत
त्रतत्र नाव्याप्तिसंभावनेत्यर्थः। तत्र साधारणस्यासाधारणस्य च संशायकतामते प्रथमलक्षणं· व्याप्तिग्रहादिविरोधितामते च तादृशाविरोधि
ताघटितलक्षणं· तेन विरोधित्वघटितलक्षणलक्ष्ये विरुद्धे संशयप्रयोजकस्य सपक्षवृत्तित्वघटितसाधारण्यस्य विपक्षव्यावृत्तत्वघटितासाधार
ण्यस्य च विरहेपि प्रथमलक्षणस्य नाव्याप्तिः। प्रथमलक्षणालक्ष्ये तत्र तत्र च विरोधिताघटितलक्षणस्य वा नातिव्याप्तिरिति भावः। तेषां। कोटि
द्वयोपस्थापकतावच्छेदकत्वादिरूपानुगतधर्मावच्छिन्नानां तादृशरूपात्मकलक्षणानां। हेत्वाभासतावच्छेदकत्वं· अनुमितिप्रतिबंधकतायां विष
तयावच्छेदकत्वं। विभागमात्रेति· मात्रपदेन दुष्टव्यवहारव्यवच्छेदः। दुष्टव्यवहारनियामकोनुमितिप्रतिबंधकतावच्छेदकधर्म एवाविभाजक इति नियमे
मानाभावादिति भावः। नन्वत्र लक्षणे पक्षधर्मताप्रहानुपादात्· नित्यत्वादिसाध्यकस्यले कोटिद्वयोपस्थापकसाधारणधर्मवत्ताज्ञानविषयीभूते

ग०टे०
७६
76

द्व्यणुकादावतिव्याप्तिरित्याशंकां निराचिकीर्षुरभिप्रायं वर्णयति संदेहमित्यादिना। एवकारेण कोट्युपस्थितौ तादृशरूपेण हेतुताव्यवच्छेदः। तादृ
शधर्मेति। साधारण्यादिविशिष्टधर्मेत्यर्थः। मात्रपदेन धर्मिविषयकत्वस्य कोटिद्वयोपस्थितिजनकतावच्छेदकघटकत्वव्यवच्छेदः। तथा च कोटिद्वयो
पस्थितिजनकतावच्छेदकीभूता या विषयता तदवच्छेदकत्वं नोक्तस्थले द्व्यणुकादेर्जन्यत्वादिविषयताया एव तथात्वादिति न तत्राव्याप्तिरतिव्याप्ति
रिति भावः। अथैतन्मते संशयं प्रति साधारणधर्मवद्धर्मिज्ञानत्वेन हेतुताया आधिक्यात् गौरवमिति चेन्न। भवन्मतेपि कोटिद्वयोपस्थितिं प्रति तेन रू
पेण हेतुताया आधिक्यात्। संबंधि हस्त्यादिविशेष्यकज्ञानाद्धस्तिपकादिस्मृतेरिव तत्कोटिसहचरितधर्मविशेष्यकज्ञानादपि तत्कोटिस्मृ
तेर्निर्विवादत्वात्। तथा साधारणधर्मविषयकज्ञानत्वेन कोट्युपस्थितिहेतुताया उभयवादिसिद्धत्वात्। तस्मात् कोट्युपस्थितौ साधारणधर्मवद्ध ७६
र्मिज्ञानत्वेन न संशयं प्रति च साधारणधर्मवद्धर्मिज्ञानजन्यकोट्युपस्थितित्वेन हेतुत्वमिति पूर्वपक्षलक्षणोपष्टंभकमतापेक्षया साधारणध
र्मवद्धर्मिज्ञानत्वेन साधारणधर्मज्ञानजन्यकोट्युपस्थितित्वेन हेतुतामतमेव सम्यक्। अथास्तु कोट्युपस्थितौ साधारणधर्मज्ञानत्वेनैव
हेतुता तथापि संशये धर्मिभाननियमाय तत्र साधारणधर्मवद्धर्मिज्ञानत्वेन हेतुत्वमफलं कोट्युपस्थितेः संशयहेतुतायां साधारणधर्मज्ञा

नजन्यत्वनिवेशस्थाने साधारणधर्मवद्धर्मिज्ञानजन्यत्वनिवेशनादेवसन्नियमोपपत्तेः। स्वतंत्रकारणताकल्पनापेक्षयाऽक्लृप्तकारणतायामवच्छे
दकगौरवस्यैवोचितत्वात् न च धर्मिज्ञानस्य संशये साक्षाद्धेतुतायाअपिक्लृप्तत्वात्तत्र साधारणधर्मप्रकारकत्वमात्रं निवेश्यतामिति नास्माकम
पि स्वतंत्रकारणताकल्पनं मानसेपि च विप्रतिपत्तिवाक्याधीनसंशये कोट्योरिव धर्मिणोपि पदजन्योपस्थितिः कारणमिति पदजन्यत्वेन
धर्मिज्ञानस्य विप्रतिपत्तिवाक्याधीनसंशये पृथक्कारणताया आवश्यकत्वात्तदन्यसंशयकारणतायां साधारणधर्मादिविषयकत्वां
तर्भावे बाधकाभावादिति वाच्यं संशये साधारणासाधारणधर्मवद्धर्मिज्ञानत्वेन हेतुताद्वयस्य तादृशतादृशधर्मज्ञानजन्यकोट्युपस्थि
तित्वेन हेतुताद्वयस्य च कल्पनापेक्षया तादृशतादृशधर्मविषयकत्वमनंतर्भाव्य धर्मिज्ञानहेतुतायास्तादृशतादृशधर्मवद्धर्मिज्ञान
जन्यकोट्युपस्थितित्वेन हेतुताद्वयस्य च कल्पने स्फुटतरलाघवात् एवं कोट्युपस्थितिकारणतायां तत्तत्कोटिसहचरितधर्मवद्धर्मि
विशेष्यविषयकज्ञानजन्यत्वनिवेशो धर्मिभेदेन गुरुधर्मावच्छिन्नकारणताया आनन्त्यापत्तेस्तदपेक्षया धर्मिविशेष्यमनंतर्भाव्य तत्तत्को
टिसहचरितधर्मज्ञानजन्यकोट्युपस्थितित्वेन धर्मिविशेष्यमनंतर्भाव्य साधारणधर्मवद्धर्मिज्ञानत्वेन लघुशरीरेण हेतुत्वस्य च कल्पयितुं

हे०गा० प्रकृतत्वात्· न चोपस्थितिकारणतावच्छेदकशरीरे धर्मिणोनंतर्भावेपि कार्यतावच्छेदकीभूतसंशयत्वस्य धर्मिविषयताघटितत्वात्कोट्यु-
७१ पस्थितेर्धर्मिभेदेन कारणताभेद आवश्यक इति वाच्यं· संशयत्वशरीरे धर्मिविषयताया विशेष्यतात्वेन किंचिद्धर्मावच्छिन्नविशेष्यतात्वेने-
वतासामान्यतो निवेशनीयतया धर्मिभेदेन कारणताभेदानावश्यकत्वादित्यादिक्· पूर्वलक्षणोक्तातिप्रसंगवारणाय साध्यसंदेहजन-
७१ कत्वस्य कोट्युपस्थितिविशेषणतया आवश्यकत्वादत्र तु पक्षस्यापकपदानुपादाननिबंधनं तदनिवेशश्च मंनिराकृते साध्यसंदेहे-
ति· प्रकृतं· प्रकरणवशात्सामान्यशब्दस्य विशेषपरतया प्राहं· तथा च साध्यसंदेहजनिकाया साध्योपस्थितिस्तज्जनकतावच्छेदको-
मतीतथाविधसाध्याभावोपस्थितिजनकतावच्छेदकीभूतायाविषयतात्वव्यवच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वं तत्त्वमिति पूर्वो-
क्तदिशा लक्षणार्थो निष्कर्षयितव्यः। वह्निसाहचर्यवद्धूमो वह्निव्याप्यत्वावच्छिन्नधूमादिविषयतायाः पूर्वदर्शितरीत्या तथाविध- ७७
पि साध्यसाध्याभावोपस्थितिजनकतावच्छेदकत्वे तामादायातिप्रसंगः पूर्ववद्वारणीयः। समवायादिघटितसामानाधिकरण्यमादा-
यसंयोगादिना धूमादेर्वह्न्यादिसाध्यकस्य व्यभिचारतावारणाय प्रकृतसंबंधेन यत्साध्यवद्वृत्तित्वं साध्याभाववद्वृत्तित्वं च तद्व-

टितत्वेन च विषयतावच्छेदकधर्मो विवक्षणीयः। असाधारण्यशरीरे प्यभावप्रतियोगितया साध्याद्विमद्भिन्नत्वनिवेशान्न तदसंग्रहः। साधारण
धर्मवद्धर्मिज्ञानसत्वे उद्बोधकांतराधीनकोटिस्मरणादनुभवात्मककोट्युपस्थितेर्वा संशयोपगमे क्षतिविरहात् विशेषणज्ञानादिमुद्र्याकोट्यु
पस्थितिहेतुतयैवोपपत्तेः साधारणधर्मज्ञानजन्यकोट्युपस्थितित्वेन स्वतंत्रहेतुताकल्पनमनर्थकमिति व्याख्यानकल्पे साध्यसंदेहज
नकत्वरूपकोट्युपस्थितिविशेषणस्याव्यावर्तकतया विलक्षणजनकतायाश्चासत्वेन निवेशासंभवात् ज्ञातिप्रसंगोपरिएवेत्यभि
प्रेत्य तादृशानिष्टप्रसमते प्रकारांतरेण लक्षणं व्याचष्टे यथाकथंचिदिति साधारणधर्मज्ञानजन्यातदजन्या चेत्यर्थः। विशेषणज्ञानादिमु
एव द्र्यालक्षतकारणतातैनिर्वाहेन तुस्वातंत्र्येण तद्धेतुत्वमिति सूचयितुं स्मृत्यनुभवसाधारणीति। ननु एवं साधारण्यादिविशिष्टधर्मवत्ता ज्ञा
नस्य तन्यकाले कथं न संशय इत्यत आह नियामकमिति। नियामकं तादृशधर्मदर्शनदशायामेवेति नियमनिर्वाहकं। साधारण्यादिरित्यस्य
साक्षात्संशयहेतुभूतमित्यादिः। आदिपदादसाधारण्यपरिग्रहः। अत एव। अनुभवसाधारण्यः। कोट्युपस्थितेर्हेतुत्वादेव। धारावाहिसंदे
हः। अविरलक्रमोत्पन्नसंदेहत्रयादिकं। साधारणधर्मज्ञानजन्यकोट्युपस्थितित्वेन संशयहेतुत्वे स्मरणात्मककोट्युपस्थितेरेव तथात्वात् साधार

याधर्मवद्धर्मिविषयकत्वतथाविधैकोपस्थित्यासंशयद्वयजनन संभवेपिसंशयांतरोत्पत्तौतथाविधस्मृत्यात्मकोपस्थित्यंतरस्यापेक्षणीय
है० गा० तापत्त्याऽविरलजन्मसंशयद्वित्वयादिकं नोपपद्यते ए तन्मतेतुसंशयात्मककोटिद्वयोपस्थित्याहेरपिसंशयांतरोत्पादसंभवेनांतराकोटिस्मर
७८ णानपेक्षणात्‌ साधारणधर्मवद्धर्मिविषयकत्वहितीयादिसंशयान्तरदृश्रिमक्षणेषुसंशयांतरोत्पादेबाधकाभावः। नचास्मन्मतेपिसंशयात्म
78 ककोटिद्वयज्ञानस्यापिसाधारणधर्मज्ञानजन्यतयांतराकोटिस्मृतिविनैवसंशयांतरोत्पादः संभवतीतिवाच्यं अवच्छेदकभेदभिन्नयोः स्मृतिसंशयनिष्ठ
ताद्दशज्ञानजन्यतयोरननुगततयास्मृतिनिष्ठजन्यतायाएवनिवेशनीयतया स्मरणापेक्षायाः आवश्यकत्वादितिभावः। स्वसामानाधिकरण्या
वच्छिन्नस्वाव्यवहितोत्तरत्वसंबंधेनसाधारणधर्मज्ञानविशिष्टोपस्थितित्वेनहेतुत्वोपगमेतुसंशयाद्यपिसंशयः संभवतीतिगौरवमेवउपस्थितेः
स्वतंत्रहेतुतायांबाधकमित्यवधेयं धर्मितावच्छेदकेति धूमवान्पर्वतोवह्निमान्नवेतिसंशयेधर्मितावच्छेदकप्रकारकज्ञानमुद्रयपर्वतत्वावच्छि ७८
न्नविशेष्यकधूमत्वादिविशिष्टवत्ताज्ञानस्यजनकतयाधूमत्वादिमत्वमादायातिप्रसंगवारणायधर्मितावच्छेदकविशिष्टइति धर्मितावच्छेदक
पदं फलीभूतसंशयधर्मितावच्छेदकतापर्याप्त्यधिकरणपरं अन्यथापर्वतत्वादेरपिदर्शितसंशयधर्मितावच्छेदकघटकतयोक्तातिप्रसंगवा

रण्यासंभवात्· एवं च तद्धर्मपर्याप्तधर्मितावच्छेदकताकयत्किंचित्संशयनिरूपितायां जनकतायामवच्छेदकीभूतायां तद्धर्मनिष्ठधर्मितावच्छेदक
तानिरूपकप्रकारतातन्निरूपितावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वमिति प्राङ्निरुक्तोर्थः पर्यवसितः। तेन सत्ताव्याप्यजातेरित्यादौ सत्ताभावव
त्त्वमवेतत्वाद्यसिध्या यद्रूपपदेन सत्तावत्त्वमवेतत्वमात्रोपादाने संभवे नातिव्याप्तिरिति परास्तं· वक्ष्यं· व्याख्येयं· एवं च मूलस्थमुभयकोट्युप
स्थापकपदं संशयकार्थकमित्यभिप्रायः। मूलमुपेक्ष्य निष्कृष्टमतेस्त्वासंत्र्येणैव तल्लक्षणमित्यपि केचित्· प्राचीनास्तु· साधारण्या
द्यवच्छिन्नप्रकारताशालिज्ञानत्वेन न संशयजनकता· पुरुषत्वतदभावसहचरितत्वेन यदा कदाचित् ज्ञातस्योर्द्ध्वत्वादेरूर्द्ध्वत्वादिमात्रेण
ज्ञानादपि अयं पुरुषो न वेति संशयात्· किं तु अनुद्बुद्धसंस्कारान्यसाधारण्यादिप्रकारकविशिष्टधर्मिज्ञानत्वेनैव· साधारण्यादिप्रका
रकत्वं च संस्कारज्ञानसाधारणमतस्तत्प्रकारकज्ञानात्सत्त्वेपि तज्जन्यतथाविधसंस्कारविशिष्टोर्द्ध्वत्वादिज्ञानात्संशयनिर्वाहः। वैशि
ष्ट्यं च स्वाविशेष्यतावच्छेदकावच्छिन्नप्रकारकत्वसामानाधिकरण्योभयसंबंधेन· अत एकधर्मावच्छिन्नविशेष्यकसाधारण्यादिप्रका
रकज्ञानादिसहितादपरधर्मावच्छिन्नप्रकारकधर्मिज्ञानान्न संशयः। ईदृशापत्तिवारणायैवैकविशिष्ट्यपरस्य हेतुतास्वीक्रियते· तेन

ग०हे०
७२
79

तूभयोः पृथक्कारणता एकविशिष्टापरत्वेन हेतुत्वे विशेषणविशेष्यभावे विनिगमनाविरहेण कारणताद्वयमात्रं पृथक्कारणतामते तु ए
कधर्मावच्छिन्नविशेष्यकसाधारण्यादिप्रकारकज्ञानादिसहितादन्यधर्मावच्छिन्नप्रकारकधर्मिज्ञानात्संशयापत्तेः तत्तद्धर्मावच्छिन्नविशे
ष्यकसाधारण्यादिप्रकारकत्वेन तत्तद्धर्मावच्छिन्नप्रकारकधर्मिज्ञानत्वेन च हेतुताकल्पनमंतरेण दुर्वारत्वया तादृशहेतुतास्वीकारे ऊर्ध्वत्व
त्वादिरूपविषयतावच्छेदकानंतधर्मभेदेन हेतुतायाः आनंत्यं स्यादिति वदंति तन्मते यथाव्याख्यातलक्षणे शुद्धधूमत्वाद्यवच्छिन्नप्रकारता
ताया अपि वह्न्यादिसंदेहजनकतावच्छेदकत्वाच्छुद्धधूमत्वादिकमादायातिप्रसंगवारणमशक्यमिति तन्मते कल्पांतरमाह कोटिद्वयेति ऊर्ध्वत्व
त्वादिनेत्यस्य केवलेनेत्यादिः तदानीं संशयप्रकाले । यद्रूपेति यद्रूपप्रकारकविशिष्टत्वेन यत्किंचित्संशयजनकतातद्रूपवत्त्वमित्यर्थः ।
यत्किंचित्संशयजनकतावच्छेदकतावच्छेदकत्वनिरूपिता या निरूपकत्वसंसर्गावच्छिन्नावच्छेदकता तदाश्रयविषयतापर्याप्त्यधिकर ७२
णधर्मवत्त्वं यत्किंचित्संशयजनकतावच्छेदकवैशिष्ट्यघटकविशेष्यतानिरूपितप्रकारतापर्याप्त्यधिकरणधर्मवत्त्वमिति तु पर्यवसि
तार्थः । तच्चेत्यादिमूलग्रंथः साधारण्यासाधारण्यादिरूपसंशयप्रयोजकरूपमादाय लक्षणसंगमनपरः । तत्र यादृशासाधारण्यस्य सं

शयप्रयोजकत्वंविचारसहं तत्सद्धेतुसाधारणमितिद्वेषेणलक्षणांतरमुपस्थापयितुंतादृशग्रंथंधारयतितत्रेत्यादीति·असाधारण्यं·संशयप्रयोजकी
भूतासाधारण्यपदार्थः।वृत्तिमतइति·तथाचशब्दोऽनित्यःशब्दत्वादित्यादावसाधारणेव्याप्तिरितिभावः।ननुवृत्तिमतोनासाधारण्यमुपगंतव्यंतं·किंत्व
वृत्तेरेवेतिनैतद्दोषावकाशइत्यतआहएककोटीति·व्याप्यस्य·व्याप्यतयागृहीतस्य·व्याप्तस्य·तद्वृत्तित्वेनगृहीतस्य·एतेनैककोटिमव्याप्तस्यैक
कोटिव्याप्यतयाआवश्यकत्वेऽपिनभेदघटितत्वेवार्थासंगतिः।तद्वद्वृत्तित्वंचनतदभावव्याप्यत्वंतच्छरीरेतदभावाभावत्वेनतस्यानिवेशादित्यवधेयं·वि
शेषदर्शनतया·विरोधिधर्मदर्शनतया·संशयविरोधित्वादिति·पुरुषत्वाभावाभाववद्वृत्तिशाखादिमानयमित्याकारकनिश्चयदशायामपिपुरुषाद्
त्तिशाखादिमानयमित्यादिनिश्चयदशायामपिपुरुषत्वादिविशिष्टबुद्ध्यनुत्पादस्यसर्वानुभवसिद्धत्वात्तद्विशिष्टबुद्धौतद्वद्वृत्तित्वेनगृहीतधर्मवत्ताज्ञानस्य
प्रतिबंधकतायाआवश्यकत्वादितिभावः·तथाचनिरुक्तासाधारण्यविशिष्टधर्मवत्ताज्ञानस्यसंशयप्रतिबंधकतयासंशयजनकत्वासंभवात्कथंता
दृशासाधारण्यस्यसंशयप्रयोजकता·नचतादृशज्ञानस्यसंशयप्रतिबंधकत्वेऽपितज्जन्यकोट्युपस्थितेःसंशयजनकत्वंसंभवत्येव·तन्नाशानंतरंतज्ज
न्यकोट्युपस्थित्यासंशयजननसंभवात्असाधारणधर्मवद्धर्मिज्ञानस्यातएवबाधकात्साक्षाद्धेतुत्वासंभवेनतज्जन्यकोट्युपस्थितित्वेनहेतुतायांगौ

ग॰हे॰ रवस्याकिंचित्करत्वादितितादृशकार्यकारणभावघटितलक्षणपरतयैवमूलंव्याख्येयमितिवाच्यं।अयंनिर्वाच्यासाधारण्यस्यबुद्धेः संशयाविरो
१० धितयातत्ज्ञानस्यैवसाक्षात्संशयजनकत्वसंभवेनगौरवाऽङ्करूपेणकोट्युपस्थितेरहेतुत्वात्कोटिस्मृतिजनकताघटितलक्षणस्यासंभवात्॰
संशयजनकताघटितलक्षणकरणेचतादृशासाधारण्यमादायव्याप्यविरुद्धयोरतिव्याप्तेश्च॰ननुसत्प्रतिपक्षसंवलनदशायामिवकोटि
४० द्वयव्याप्यतद्धर्मवत्ताज्ञानदशायामपिसंशयोत्पत्तिरनुभवसिद्धैवेतितद्भाववद्व्याप्यवत्ताज्ञानस्यैवतत्कोटिमद्वृत्तिधर्मवत्ताज्ञानस्योत्तेज
कत्वमगत्याकल्पनीयमितिकोटिद्वयव्याप्यतद्धर्मवत्ताज्ञानस्यसंशायकत्वमव्याहतमेव॰येनरूपेणप्रतिबंधकतातेनैवरूपेणजनकता
नुपगमात्॰इत्यतआहसत्प्रतिपक्षेचेति॰विरोधिकोटिद्वयव्याप्यवत्ताज्ञानसमयइत्यर्थः।परामर्शप्रामाण्यसंशयेति॰तथाचतुल्ययुक्त्याप्रकृ
तेपितत्तत्कोटिमद्वृत्तित्वविशिष्टवत्ताज्ञानेप्रामाण्यसंशयादेवसंशयःस्यात्किंपतइतिनैककोटिमद्व्याप्यतद्धर्मवत्ताज्ञानप्रतिबंधकतायामपरको १०
टिमद्व्याप्यतद्धर्मवत्ताज्ञानस्योत्तेजकत्वंप्रामाणिकं अप्रामाण्यज्ञानोत्तेजकतयैवोपपत्तेः।अप्रामाण्यज्ञानानास्कंदितस्यैवज्ञानस्यसंदेहज
नकतयानिरुक्तासाधारण्यस्यबुद्धेर्जनकत्वोपगमेप्रतिबंधकतावच्छेदकरूपेणैवजनकताप्रसंगइतिभावः।निश्चितसाध्यतदभाववद्व्या

हृत्तत्वमिति॰ असाधारण्यमिति॰ येन येन रूपेणेति॰ यद्यद्रूपं धर्मितावच्छेदकीकृत्येत्यर्थः। तेन रूपेण तद्व्यावृत्तत्वं॰ तत्तद्धर्मविशिष्टतत्तद्धर्मिव्यावृत्तत्वं॰
प्रमेयत्वादिसामानाधिकरण्येन घटादौ साध्याभावादिनिश्चयदशायामपि शब्दोऽनित्यः शब्दत्वादित्यादावसाधारण्यसत्त्वाद्धर्मिनिवेशः। प्रथमपक्षे
वक्ष्यमाणाया निर्धर्मितावच्छेदकक साध्यनिश्चयविषयवृत्तिहेतावसाधारण्यानुपपत्तेर्वारणाय घटत्वादिना साध्यादिनिश्चयदशायां रू
पान्तरावच्छिन्नघटादिव्यावृत्तत्वज्ञानात्संशयापत्तिवारणाय च धर्मितावच्छेदकत्वनिवेशः। साध्यव्याप्यवत्त्वेन पक्षातिरिक्तमात्रविषयकसाध्य
निश्चयदशायामसाधारण्यानुपपत्तेरनवकाशात्पक्षस्यापि निश्चयविषयत्वमाविष्कर्त्तुं सर्वाणीति॰ सर्वपदेन सर्वत्वावच्छिन्नोद्देश्यताकबो
धः केवलान्वयिसर्वत्वावच्छेदेन विधेयविषयक एव जन्यत इति तथाविधबोधस्यैव सर्वाणि साध्यवन्तीत्याकारकता॰ तथा च विशिष्यपक्षे
साध्यनिश्चयदशायामिव साध्यसंदेहाविरोधिनः सर्वाणि साध्यवन्तीति निश्चयस्य सत्वेप्यसाधारण्याभावस्येष्टत्वात्॰ साध्यव्याप्यवन्तीति॰
तथा चैतादृशनिश्चयदशायां विशिष्यपक्षे साध्यसंदेहस्यानिवृत्तेस्तादृशनिश्चयस्य नासाधारण्यज्ञप्तिकारकत्वमिति भावः। प्रथमपक्षे धर्मि
तावच्छेदकानिवेशात्सामान्यधर्मावच्छिन्नधर्मिकं विशिष्य संशयानिवर्तकं निर्णयमिवानिर्धर्मितावच्छेदकतया प्रसक्तसंशयानिवर्तकताक

ग०हे०
८१
४१

निश्चयमादायापिदोषदानंसंभवतीत्यभिप्रेत्याह सर्वाणीवेति। पूर्वंसाध्यवत्वेनपक्षस्यापिनिश्चयविषयत्वंस्फुटीकर्तुंसर्वाणीति। साध्यव
त्त्वावच्छिन्नेसर्वत्वविधेयकत्वस्यसाध्यवन्तीतिसर्वाणीत्याकारकज्ञानस्यपक्षाविषयकस्यापिसंभवात्सर्वसाध्यवदुद्देश्यकप्रमेयत्वविधे
यकज्ञानानुधावनं। एतादृशज्ञानस्यवस्तुत्वव्यापकसर्वत्वावच्छेदेनसाध्यवत्त्वानवगाहितयातत्सत्त्वेनपक्षेसाध्यसंदेहनिवर्तकमिति
तदानीमसाधारण्यमक्षतमेवेतिभावः। आदिपदात्शब्दोनित्यःशब्दत्वादित्यादौसर्वाणिसाध्याभाववव्याप्यवन्तीतिसाध्याभाववन्तीत्यादि
निश्चयपरिग्रहः। साध्यादीत्यादिपदात्साध्याभावपरिग्रहः। अतएवतथात्वमसाधारण्याभावः। द्वितीयपक्षेतन्मध्यवर्तित्वरूपधर्मिता
वच्छेदकविवक्षणेप्रथमपक्षोक्तप्रथमदोषस्याद्वितीयदोषस्यचयथाश्रुतेप्यनवकाशात्तत्रदोषान्तरमाहद्वितीयेत्विति। विशिष्टध
र्मितावच्छेदकप्रकारेण। सामान्यतःपक्षेसाध्यवत्तानिश्चयंविनापक्षमात्रवृत्तिहेतौसाध्यवद्वृत्तित्वघटितव्याप्तिनिश्चयएवनसंभवती ८१
त्यभिप्रेत्यैतदभिहितं। अथवाविशिष्टविशेषधर्मंधर्मितावच्छेदकीकृत्योक्तविवक्षणेसामान्यधर्मंधर्मितावच्छेदकीकृत्यनिश्चयस्तादृशस्याप्य
तद्दोषस्यसंभवात्तादृशस्थलसंग्रहायतादृशधर्मस्यधर्मितावच्छेदकत्वानुसरणं। विशेषलक्षणस्येति। विशेषणादित्यग्रिमेणान्वयः। वैशिष्ट्यं

चसामानाधिकरण्यप्रसाससावोध्यं॰ तदविशेषितस्यैवतस्यसंशयप्रयोजकतयासव्यभिचारसामान्यलक्षणस्यातिव्याप्तिंवारयितुमाह
साधारण्येति॰एतच्चव्याप्तिग्रहदशायांसाधारणसंग्रहाय॰वैशिष्ट्यं॰विशेषणताविषयतोभयघटितसामानाधिकरण्येनवोध्यं॰कंचि
दपीति॰व्याप्तिग्रहशून्यपुरुषंप्रत्यपीत्यर्थः।ननुतत्तत्पुरुषीयव्याप्तिग्रहाभावः तत्तत्पुरुषीयासाधारण्यलक्षणेनिवेशनीयइतिनायंदोष
इत्यतआहस्यादिति॰तदपि॰सामान्यसव्यभिचारत्वमपि॰तत्तत्पुरुषघटितमिति॰तथाचासाधारणइवसाधारणेपिपुरुषविशेषानि
यंत्रितसव्यभिचारव्यवहारापत्तिः।धूमादौसाध्येवह्न्यादेरमुकंप्रतिव्यभिचारीतिव्यवहाराभावेनेष्टापत्तेरयोगादितिभावः।यथा
श्रुतेतत्कल्पेप्रथमपक्षीयप्रथमदोषमप्याहसाध्यादीति॰आदिपदात्साध्याभावपरिग्रहः।ननुतदानीमसाधारण्याभावेपितद्रू
मादेवानुमितिप्रतिबंधादितिशंकानिराचिकीर्षयातद्रूमाभावमप्युपपादयति॰नहीति॰तदानीं।पक्षेसाध्यसंदेहदशायां।
तथाचतदानीतच्चतद्व्याप्यवत्तासंशयस्याप्यौचित्यावर्जितत्वसाध्यव्याप्यवद्धीत्वस्यापिहेतौसंशयापादितिभावः।एतेनोक्तस्यल
लक्षणस्याव्याप्तिवदसाधारण्यनिश्चयरूपकारणाभावेनसंशयानुपपत्तिरपिदुष्टव्या॰उक्तविवक्षायामेतद्दोषानवकाशात्॰मा

ग॰हे॰
८२
४२

धारणे पुरुषविशेषनियंत्रितसव्यभिचारव्यवहारेकस्याचिद्दिशा पत्तेऽसंभवाद्दोषांतरमाहाभिहितं चेति॰ परेत्विस्यादिना॰ अग्रंथएतला
दिस्मादिपूर्वमिश्रीय पंक्तिव्याख्यानावसरइतिशेषः॥ न संशयप्रयोजकइति॰ तथा च तदादाय साधारणेन लक्षणगमनसंभवइतिभा
वः॥ ननु तर्हि कीदृशमसाधारण्यं संशयप्रयोजकमत आह किंत्विति॰ तत्सहचरितेति॰ साध्यतदभावसहचरितेत्यर्थः॥ एतादृशा
साधारण्यस्य च न हेतुदोषतासंभवः॥ सद्धेतुसाधारण्यादनुमितिप्रतिबंधकज्ञानाविषयत्वेन दोषसामान्यलक्षणानाक्रांतत्वा
दितिभावः॥ ननु व्याप्यविरुद्धसाधारणस्यैतादृशधर्मस्य संशयप्रयोजकत्वे व्याप्यादिदर्शनादपि संशयापत्तिरित्यत आह व्या
प्यविरुद्धयोरिति॰ व्याप्यादिग्रहदशायामन्यकाले व्याप्यादिदर्शनस्य संशयाप्रतिबंधकतया तत्त्वेनानिश्चितयोरिति॰ व्याप्यत्वादि
नाऽनिश्चितस्य व्याप्यादेर्निरुक्तरूपज्ञानात्संशयइष्टएवेतिभावः॥ विरुद्धान्यत्वस्य हेतुविशेषणत्वे साधारणासंग्रहः॥ विरो ८२
धपदार्थसाध्यासामानाधिकरण्यत्वादिनाऽनिवेशपतदन्यत्वेनानुमितिविरोधिताविशेषणेऽपि साध्याप्रसिद्ध्यादिवारणासं
भवः इत्यत आह विशिष्टेति॰ साध्यतावच्छेदकादिविशिष्टेत्यर्थः॥ एतदर्थः पूर्वपक्षएव विवृतः॥ यथाश्रुतमूलंतो धर्मिविशे

षणतायाएवलाभास्यतरति· तात्पर्यबललभ्य इत्यर्थः॥ विरोधिविशेषणं· अनुमितिविरोधिविशेषणं· अवृत्तित्वे परस्परासामानाधिक
रण्येचसाध्यसाधनयोरित्यनुषज्यते· पक्षतानिवेशनेप्रयोजनाभावादाह पक्षपदमिति· पक्षवृत्तित्वस्यधर्मिविशेषणत्वेस्वरूपासिद्
स्यव्यभिचारिणो·संग्रहप्रसंगः। हेतौ पक्षवृत्तित्वग्रहाविरोधित्वेन विरोधिविशेषणेपिबाधसत्प्रतिपक्षातिप्रसंगवारणमशक्यमेवे
तिपूर्ववत्पक्षवृत्तित्वेसत्यनुमितिविरोधिसंबंधाव्याप्तिरितिदलद्वयेनव्याप्तिग्रहविरोधिधर्मवत्वस्यविवक्षणेचमणिकार
मतसिद्धस्यसाध्यव्यापकीभूताभावप्रतियोगित्वरूपासाधारण्यस्यासंग्रहः॥ विशेषणांतरप्रक्षिप्यबाधादिवारणेचगौ
रवमित्यभिप्रेत्यपूर्वपक्षोत्करीतिं परित्यज्यात्रकांतरेणबाधादिकंवारयितुंएकदलद्वयनिष्कृष्टार्थमाह तथाचेति· यद्धू
मेइति· सधर्मितावच्छेदककहेतुमत्तानिश्चयकालीनयादृशविशिष्टविषयकनिश्चयसामान्यस्यसमानकालीनहेतुमत्तानिश्चय
समानधर्मितावच्छेदककानुमितिसामान्यप्रतिबंधकं तादृशधर्मवत्वमित्यर्थः। समूहालंबनात्मकस्योदासीनपदार्थविषयकनिश्च
यस्यापिअनुमितिप्रतिबंधकतयाउदासीनपदार्थविषयकनिश्चयसामान्यस्यापितद्विपरीतकोटिविषयकसमूहालंबनात्मक

ग० हे०

८३

प्रकृतानुमितिप्रतिबंधकतयालक्षणातिव्याप्तिवारणाय सामान्यपदद्वयं · हेतुमत्ताज्ञानासमानकालीनस्य व्यभिचारानिर्णयस्य व्यभि
चारनिश्चयसामान्यांतर्गतस्य स्वसमानकालीनहेतुमत्ताज्ञानाऽप्रसिध्याऽसंभवः स्यादिति प्रथमं कालीनांतं निश्चयविशेषणं ·
निरूढधर्मितावच्छेदकहेतुमत्तानिश्चयकालीनव्यभिचारनिश्चयकालीनहेतुमत्ताज्ञानधर्मितावच्छेदकाऽप्रसिध्यातद्दोषतादवस्थ्य
मतो हेतुमत्ताज्ञाने स्वधर्मितावच्छेदकत्वविशेषणं · अनुमितिसामान्यांतर्गतायां स्वसमानकालीनहेतुमत्ताज्ञानासमानधर्मि
तावच्छेदककसाध्यानुमितौ हेतुतावच्छेदकावच्छिन्नस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानं न प्रतिबंधकं · नित्यत्वव्यापकी
भूताभावप्रतियोगि शब्दत्वमित्यादिज्ञानदशायामयं नित्यः इत्यादिज्ञानोत्पत्ताववि वादादित्यसाधारण्यातिव्याप्तिरतः समानधर्मि
तावच्छेदकांतमनुमितिविशेषणं · तथा चेदंत्वादिधर्मितावच्छेदककनित्यत्वादिविशिष्टबुद्धौ शब्दत्वादिधर्मिकनित्यत्वादिव्याप ८३
कीभूताभावप्रतियोगित्वादिरूपानित्यत्वीयव्यतिरेकव्याप्तिनिश्चयविशिष्टस्य तद्धर्मितावच्छेदकके शब्दत्वादिमत्ताज्ञानस्य तद
भाववत्ताज्ञानमुद्रया प्रतिबंधकतावद्विशेषणविशेष्यभावे विनिगमनाविरहेण तादृशशब्दत्वादिमत्ताज्ञानविशिष्टत्वस्य

तथाविधव्याप्तिनिश्चयस्यापिप्रतिबंधकतयातादृशहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितिसामान्यप्रतिबंधकत्वंतथाविधा
साधारण्यनिर्णयस्याक्षतमेवेत्यसाधारण्यसंग्रहः।अनुमितिपदंसाध्यव्याप्योहेतुःसाध्यवांश्चपक्षइत्येतादृशसमूहालंबनानुमितिपरं
के तेनसाधारण्यज्ञानस्यसाध्यवत्ताज्ञानाप्रतिबंधकत्वेपिनतत्संग्रहः।एतेनानुमितिविरोधित्वं·यादृशविशिष्टविषयकनिश्चयत्वेनानु
मितिप्रतिबंधकत्वंतादृशत्वं·तत्रावच्छेदकत्वंप्रागुक्तयुक्त्यानतिरिक्तवृत्तित्वरूपमेवविवक्षणीयं·एवंचसाध्यव्यापकीभूताभावप्र
तियोगिहेतुरितिज्ञानस्यहेतुमत्ताज्ञानासमानकालीनस्यसाध्यवत्ताज्ञानाप्रतिबंधकतयातादृशज्ञानविषयस्यनिरुक्तलक्षणाना
क्रांतत्वेननासाधारण्यस्यरूपतोपपद्यते·पक्षवृत्तित्वविशेषितस्यतस्यचबाधादिवद्धर्मिविशेषघटितमूर्त्तिकतयानियतपक्षधर्मिका
नुमितिविरोधित्वमेव·नतुयत्रहेतुमत्त्वंज्ञायतेतत्तद्धर्मिकानुमितिसामान्यविरोधित्वमितिनतथात्वसंभवइतिपरास्तं·यत्तुहेतुमत्ताज्ञा
नमनिवेश्यतत्तद्धेतुधर्मिकसाध्यव्यापकीभूताभावप्रतियोगित्वनिश्चयत्वेनैवप्रतिबंधकता·प्रतिबध्यतावच्छेदकंधर्मिविशेषहेतुमद्विष
यकत्वाघटितंतत्तद्धेतुमत्ताज्ञानजन्यानुमितित्वं·अतःशब्दत्वंनित्यत्वव्यापकीभूताभावप्रतियोगीतिनिश्चयसत्त्वेसमानधर्मितावच्छेदकक

ग॰टी॰
८४
84

शब्दत्ववत्तानिश्चयस्यासत्वेपि साध्यानुमितेर्नानुपपत्तिस्तदानीं हेत्वंतरज्ञानेनैवानुमितिजननात् तस्याश्च शब्दत्वधर्मिकताद्दशाभावप्रतियो
गित्वनिश्चयाप्रतिबध्यत्वात्॰ एवं च पक्षवृत्तित्वाविशेषितं निरुक्तरूपमेवासाधारण्यं लक्षणेऽनुमितिपदस्य प्रकृतहेतुकानुमितिपरत
याप्रकृतहेतुकानुमितिसामान्यविरोधित्वस्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वघटितस्यापि तत्रसत्वेन तत्संग्रहाद्यसंकेरिति समाधानं
क तन्न मनोरमं विज्ञानां। शब्दत्वादिधर्मिताद्दशप्रतियोगित्वादिनिश्चयस्य शब्दत्वादिहेतुमत्ताधीजन्यानुमितित्वावच्छिन्नं प्रति प्रतिबंधकत्वे
ताद्दशनिश्चयसहकृतशब्दत्वादिप्रकारकनिश्चयदशायां तत्समानधर्मितावच्छेदककशब्दबोधाद्यापत्तेरन्यहेतुकताद्दशानुमित्या
पत्तेश्च दुर्वारत्वात्॰ न चान्यहेतुकापि समानधर्मितावच्छेदककतद्वत्ताज्ञानकालीनानुमितिस्तद्वत्ताज्ञानजन्यैवेति न तदापत्तिसंभव इति वाच्यं॰
व्याप्यत्वानवच्छिन्नहेतुप्रकारताशालिज्ञानस्यानुमितिजनकत्वे मानाभावात्॰ अन्यलिंगकपरामर्शघटितसामग्र्यां तत्तद्धर्मिकताद्दशानिश्चयाभाव ८४
स्यानंतर्भावेन तद्वत्त्वापत्तेः कथमात्रेण वारयितुमशक्यत्वच्च॰ एतेन समानधर्मितावच्छेदककतद्वत्ताज्ञानानंतरोत्पत्तिकत्वनिवेशेपि न निस्तारः स्वल
मसावेशेन॰ एतन्नये पक्षवृत्तित्वाविशेषिताहेतुनिष्ठसाध्याभावीयाव्याप्तिरप्यसाधारण्यमेवेति न तत्रातिव्याप्तिरित्यवधेयं॰ तथा॰ नि

रुक्तानुमितिसामान्याविरोधि॰धर्मिविशेषितत्वात्॰धर्मिविशेषघटितत्वात्॰न तादृशौ॰न तादृशानुमितिसामान्यविरोधिनौ॰नन्वेवमपि सर्वमा
काशवत्प्रमेयत्वादित्यादिस्थलीयबाधप्रतिरोधयोरतिव्याप्तिः। सर्वमाकाशाभाववदित्यादिनिश्चये केचिद्व्याकाशाद्यनुमितेरनुदयात्॰अनुभ
वानुरोधेनासमानधर्मितावच्छेदककज्ञानेपि तत्प्रतिबंधकत्वकल्पनात्तयोरनुमितिसामान्याविरोधित्वादित्यत आह सर्वमिति॰इत्यादिकं॰इत्याका
रकज्ञानविषयबाधादिकं॰अग्रिमविरोधिपदस्य॰[illegible]॰प्रतिबंधकपरतयाद्यत्यादिकमित्यस्येत्याकारकज्ञानमित्येवार्थः। सामानाधिकरण्यग्र
हविरोधीति॰साध्यसामानाधिकरण्यस्य साध्यवत्वघटितत्वादिति शेषः। तथा चाविरोध्यं तेनैव तद्वारणमिति भावः। निर्धर्मितावच्छेदकज्ञान
स्य बाधाद्यप्रतिबध्यत्वे साध्यसामानाधिकरण्यज्ञानस्य साध्यांशे निर्धर्मितावच्छेदकतया तद्विरोधित्वमुक्तबाधादेरक्षतमेवेत्याशयेनाहानु
मितीति॰व्यभिचारस्यापि प्रकृतसाध्यहेतुकानुमितिविरोधित्वात्सामान्येति॰तथा च तस्यान्यहेतुकानुमित्यविरोधित्वान्न तद्संग्रहः। उक्तबाधा
देश्च सर्वहेतुकानुमितिविरोधित्वात्तद्वारणमिति भावः। इदं त्ववधेयं॰सर्वमाकाशाभाववदित्यादिज्ञानस्यासमानधर्मितावच्छेदककानुमितिविरोधि
त्वे मानाभावः। तादृशज्ञानकाले इदमपि सर्वांतर्गतमित्यादिसत्व एवेदमाकाशवदित्याद्यनुमित्यनुदयात्तत्र च तादृशज्ञानस्यैव ग्राह्याभावावच्छेद

कधर्मदर्शनविधया तादृशानुमित्यभावनिर्वाहकत्वात्· तथा च तादृशबाधबुद्धेर्निरुक्तानुमितिसामान्यविरोधित्वाभावादेव नातिव्याप्तिशंकेति·
ग॰ हे॰ वस्तुतस्तु। तद्धर्मितावच्छेदककबुद्धेस्तत्सामानाधिकरण्यमात्रेण ग्राह्याभावावगाहिबुद्धेः प्रतिबंधकतया ग्राह्याभावांशे तत्तद्धर्मितावच्छेदक
८५ व्यापकत्वावगाहित्वमेव तंत्रं· तथा च ग्राह्याभावे तत्तद्धर्मव्यापकतानिश्चयस्य तत्तद्धर्मावच्छिन्नांशे ग्राह्याभावप्रकारकस्यापि तत्तद्धर्मधर्मिताव
85 च्छेदककग्रहप्रतिबंधकत्वं। तत्तद्धर्मव्यापकता च तत्तद्धर्मसमानाधिकरणाभावाप्रतियोगित्वं· तत्र ज्ञानस्य प्रतिबंधकत्वे वृत्तिमत्त्वांताभावाप्र
तियोगित्वज्ञानमपि तथा· सामान्यघटितविशेषाभावग्रहस्य यत्र प्रतिबंधकत्वं तत्र तत्सामान्याभावग्रहस्यापि तथात्वानुभवात्· सर्व
माकाशाभाववदिति बुद्धेश्चाकाशाभावे वृत्तिमदभावाप्रतियोगित्वं विषयः स एव बाधः आकाशानुमितिसामान्यविरोधी चेति मू
लस्य नतेनेत्यनेन संशयप्रयोजकयोर्विभाजकीभूतसपक्षवृत्तित्वविपक्षव्यावृत्तत्वघटितसाधारण्यासाधारण्ययोः परामर्शे संगतिः ८५
सपक्षवृत्तित्वाद्यंशज्ञानस्यानुमित्यविरोधितया तद्घटितस्य हेत्वाभासताविरहादिति तस्यानुमितिविरोधितयाऽऽक्रांतविपक्षवृत्तित्वा
द्यंशमात्रपरामर्शकतामाह तेनेति· विपक्षवृत्तित्वत्वादिनाऽऽक्रांतत्वात्स्वाक्रांततयाऽभावादनुमितिविरोधित्वेनोक्तं· अनुमितिविरोधित्वा

वछिन्नस्यानुमित्यविरोधित्वात्तत्पदस्य विपक्षवृत्तित्वत्वावछिन्नपरत्वमावश्यकमिति तद्भूताभाव विपक्षवृत्तित्वत्वादिनेति॰ विपक्षवृत्तित्वत्वाद्यव
छिन्नेमेत्यर्थः। तेनैवैसेवकारस्य विभाजकधर्मस्यानुमितिप्रतिबंधकहेतुज्ञानप्रकारत्वव्यवछेदपरत्वेऽसंगतिः। तादृशज्ञानप्रकारीभूत
विपक्षवृत्तित्वादेरेवानुगतधर्मप्रकारेणाविभाजकत्वात्॰ एवंप्रसेकमेवेसेवकारस्यापि विभाजकधर्मस्य हेत्वाभासताव्यवछेदपरत्वं नो
पपद्यत इति अनुमितिविरोधित्वादिरूपानुगमकविभाजकतावछेदकधर्मस्य प्रतिबंधकताज्ञानप्रकारतावछेदकत्वहेत्वाभासपदप्रति
पाद्यतावछेदकत्वव्यवछेदपरतयास्वकारद्वयं व्याचष्टे एवकारेणेति॰ प्रथमेवकारेणेत्यर्थः। व्यवछिद्यं॰ प्रतिबंधकज्ञानप्रकारतावछेद
कत्वव्यवछेदपरतया प्रतिपाद्यं॰ हेत्वाभासस्येति पूरणं॰ एवं च प्रसेकमेवेति मूलस्य विपक्षवृत्तित्वादिप्रत्येकमात्रवृत्तिरूपावछिन्नस्येवे
त्यर्थः। तेनासाधारणस्येत्यादिमूलस्यानुमितिविरोधिताघटितलक्षणं परित्यज्य लक्षणांतरकरणेनासाधारणस्य साध्यतदभावोपस्था
पकतयासंशायकतया दूषणत्वपक्षे नाव्याप्तिरित्यर्थकत्वेऽसंगतिः। संभवत्संशयप्रयोजकताकसाध्यतदभावसहचरिताभाववृत्तियो
गित्वरूपासाधारण्यस्य सद्धेतुसाधारणताप्रयुक्तदोषत्वासंभवदोषेणैवानुमितिविरोधिताघटितलक्षणस्यावतारितत्वात्॰ तेनेस

हे॰ गा॰
८६
86

स्य संशायकताघटितलक्षणपरित्यागपूर्वकापरलक्षणद्वयकरणस्यासाधारण्यसंग्रहप्रयोजकतार्थकत्वं· साध्यतदभावोपस्थापकता
येत्यस्य च सत्प्रतिपक्षोत्थापकतये त्यर्थकत्वमपि न साधु· असाधारण्यस्य सत्प्रतिपक्षोत्थापकतामते साध्यव्यापकीभूताभावप्रतियोगि
त्वस्यैवासाधारण्यतया तस्य व्याप्तिग्रहाविरोधितया विरुद्धादिसंकीर्णासाधारण्यानुरोधेन व्याप्तिग्रहविरोधितापरतया व्याख्ये
यस्याव्यवहितलक्षणस्य तत्राव्याप्तेरावश्यकत्वात् तत्तत्पदं मध्यमलक्षणमात्रपरतया व्याख्येतेनेति· असाधारण्यस्य संशायकतापक्षे च
प्रथमलक्षणस्यैव साधुता न तु मध्यमस्य· संशयप्रयोजकस्य निश्चितसाध्यतदभाववद्वृत्तित्वादेरनुमित्यविरोधित्वादित्युपष्टंभासंगति
भयेन साध्यतदभावोपस्थापकतयेत्यस्य संशायकतयेत्यर्थं परित्यज्यार्थांतरमाह सत्प्रतिपक्षोत्थापकतयेति· इतरलक्षणयोस्तन्मतेऽ
साधारण्याव्याप्तिसत्त्व एवोपष्टंभसंगतेः उपष्टंभकतां स्फुटीकर्तुं तत्पूरयति अन्यथा पुनरिति· इतरलक्षणयोरित्यस्यार्थः अव्याप्तिरेवेति स ८६
त्प्रतिपक्षोत्थापकतया दूषणत्वपक्षे इत्यनुषज्यते· यथाश्रुतं साध्याभावज्ञापकत्वं न बाधसाधारणमत मतस्तदर्थं व्याचष्टे· साध्याभावेति·
व्यभिचारादिव्यावृत्तस्य कारणीभूताभावप्रतियोगित्वरूपप्रतिबंधकताघटितस्याविरोधित्वस्याविरोधितापदार्थतालाभाय साक्षादिति· श्रीः।

विरोधितयातस्यदोषत्वायोगात्‌ स्वरूपादिसंबंधावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगितानिरूपितानुयोगितासंबंधस्य चाप्रसिद्ध्याता
दृशसंबंधावच्छिन्नाभावेप्यप्रसिद्धेरिति न तादृशस्य दोषतोपगमसंभवः। साध्यतावच्छेदकस्य स्वावच्छिन्नसंबंधविशेषावच्छिन्नप्रतियोगि
ताकत्वसंबंधावच्छिन्नप्रतियोगिताकाभावोभावांशे तादृशसंबंधेन प्रतियोगिविशेषणतापन्नसाध्यतावच्छेदकादिप्रकारकव्यतिरेकव्या
प्तिग्रहविरोधितयानुपसंहारित्वमित्यपि न सार्वत्रिकं। विशेषणांतरानवच्छिन्नज्ञानत्वादेर्यत्र साध्यतावच्छेदकतातत्र स्वरूपतस्तत्प्र
कारकव्यतिरेकव्याप्तिबुद्धेरेव हेतुतया तत्र तदभावप्रकारकज्ञानस्य नियमेन तदंशे प्रतियोगितावच्छेदकज्ञानत्वत्वादिप्रकारतयाऽविरो
धित्वात्‌ प्रतियोगितावच्छेदकप्रकारकप्रतियोगिमत्ताबुद्धेरेव समानप्रकारकतयाऽभावग्रहप्रतिबंधकत्वात्‌ वृत्त्यनियामकसंबंधस्य
संसर्गाभावप्रतियोगितानवच्छेदकतया तादृशसंबंधावच्छिन्नाभावाप्रसिद्धेश्च। एतेन तत्संबंधेन तत्प्रकारकबुद्धेः समानधर्मिकतत्संबंधा
वच्छिन्नतदभाववत्ताबुद्धिं प्रति तद्धर्मिकस्य तेन संबंधेनासंबद्धत्वग्रहस्यापि प्रतिबंधकत्वमानुभविकं। अत एव साध्यादेरवृत्तित्वस्य बाधा
दिप्रभेदत्वोक्तिरपि संगच्छते। एवं च साध्यादेरत्यंताभावाप्रतियोगित्वादिकमिति यथाश्रुतस्यैव संगतिरित्यप्यपास्तं। केवलान्वयिन्यापि हि

हे० ग० त्वाद्यवच्छिन्नाभावप्रतियोगित्वसत्त्वेन तन्निष्ठतदप्रतियोगित्वाद्यसिद्धेः। स्वरूपादिसंबंधावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगितायाऽप्र
१२६ प्रसिध्यातदभावस्याप्रसिद्धेः। साध्यताद्यवच्छेदके संबंधविशेषावच्छिन्नप्रतियोगितानवच्छेदकत्वमनुपसंहारित्वमित्यपि स्वरूपतो ज्ञानत्वा
दि साध्यतावच्छेदकस्यत्वेन संभवति· निर्विशेषणकज्ञानत्वादिविषयकव्यतिरेकव्याप्तिग्रहे ज्ञानत्वत्वादिप्रकारेणासंबद्धत्वग्रहस्यासमान
126 प्रकारकतयाऽविरोधित्वात्· साध्यतावच्छेदकावच्छेदेन वृत्तिमानः साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगित्वाभावोऽनुपसंहारित्वमिति
प्रगल्भानुसारिमतमननुमतमेव दीधितिकृतां· व्याप्तिवादे निराकृतत्वात्· अत्राहुः। विशिष्टबुद्धौ विशेष्ये प्रकाराभावग्रहवद्विशिष्टसंस
र्गकबुद्धौ संसर्गे संसर्गतावच्छेदकाभावग्रहोऽपि विरोधी· संसर्गविशेषावच्छिन्नविषयतायाः एव ग्राह्याभावधीप्रतिबध्यतावच्छेदकत्वात्·
विशिष्टसंसर्गकबोधस्य त्वे संसर्गतावच्छेदकाऽपवैशिष्ट्यस्याऽपि संसर्गतांतःपातिसंसर्गतया संसर्गतावच्छेदकविषयतायाऽपि संस १२६
र्गावच्छिन्नत्वात्· एवं च वाच्यत्वत्वाद्यवच्छिन्नत्वस्वरूपसंबंधावच्छिन्नत्वोभयविशेषितप्रतियोगितासंसर्गकवाच्यत्वाभावव्यापका
ह्यत्वभावइतिज्ञाने प्रतियोगितात्वावच्छेदेन तदुभयाभावग्रहस्य विरोधितया तद्विषयताद्यशाभाव एवानुपसंहारित्वमिति विव

स्थितं· अधिकमन्यत्रानुसंधेयं· ननूक्तलक्षणस्य हेतुनिष्ठसाध्याभाववद्वृत्तित्वरूपसाधारण्येतिव्याप्तिः। न· ज्ञानस्यापि हेत्वभावप्रतियोगिकाभावे हे
तौ साध्याभावसामानाधिकरण्यावगाहितया हेत्वभावे साध्याभावसमानाधिकरणाभावाप्रतियोगित्वज्ञानविरोधित्वात्· साध्याभावसमानाधि
करणत्वेन भासमानेऽभावे हेत्वभावप्रतियोगिकत्वग्रहस्य तुल्यवित्तिवेद्यतया हेत्वभावे तादृशाभावप्रतियोगित्वावगाहनादित्यभिमानं निराक
रोति वह्न्यभावाभावत्वेनेति· कदाचिद्विरुध्यादिति· संभावनायां लिङ्· तुल्यवित्तिवेद्यतायां मानाभावात्· भावेपि वा असमानप्रकारकतया
उक्तज्ञानस्य व्यापकताज्ञानविरोधितायाविचारासहत्वादिति भरः। ननु वह्नित्वेनेति· तेन रूपेण भाने हेत्वभावांशे प्रतियोगितायाअसंस्पर्शादिति
भावः। नातिप्रसंग इति· हेतुतावच्छेदकावच्छिन्नस्य साध्याभाववद्वृत्तितायाएव साधारण्यत्वात्· उक्तबुद्धेर्विरोधितायाः प्रामाणिकत्वे हेत्व
भावाभावत्वावच्छिन्नस्य साध्याभाववद्वृत्तितायालक्ष्यत्वादेवेति भावः। तत्संभवेपि· अभावाप्रतियोगित्वरूपानुपसंहारित्वसंभवेपि·
अन्वयव्याप्त्युपाहानेन· अन्वयव्याप्तिधीसंभवेन· नानुमितिप्रतिरोधः। विशेषदर्शिनोपि नानुमित्यनुत्पादः। न चैवमपि केवलान्वयिसाध्य
कहेतोराभासतया तत्प्रयोक्तुर्निग्रहप्रसंग इति वाच्यं· अभिमत साधकताविघटकाभासस्यैव निग्रहप्रयोजकतया अन्वयिमुद्रया

दे० ग०
१२७
127

गमकतायत्राभिमतात्तत्रानियहायोगात्‌· व्यतिरेकिप्रयोगेनिग्रहस्पेष्टत्वात्‌· इति ॥ इत्यनुपसंहारिग्रंथः॥ श्रीः॥ साध्याभावत्वं साध्यविरोधि
त्वमात्रं इत्यत्र मूले साध्यविरोधित्वं यदि साध्यासामानाधिकरण्यं तदा साध्यासमानाधिकरणपदोपादानवैयर्थ्यमिति तच्छ्राचुक्ते साध्येति·
साध्यासमानाधिकरणत्वं· साध्यानधिकरणवृत्तित्वं· न तु साध्याधिकरणावृत्तित्वं· अतो न साध्याभावपदोपादानवैयर्थ्यं· अधिकरणभे
देन संयोगाद्यभावभेदमते इदं लक्षणं· अतो न संयोगी द्रव्यत्वादित्यादावतिव्याप्तिः॥ साध्यासमानाधिकरणपदं प्रतियोगिवैयधिकर
ण्यविशिष्टार्थकं इत्यपि केचित्‌· तन्न· साध्याभावप्रतियोगित्वेन साध्योपादानस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात्‌· मूले स्वमात्रप
देन भावव्यावर्त्तकाभावत्वानिवेशव्यवच्छेदः॥ अभावाभावस्य· अभावप्रतियोगिकस्य· भावत्वेपि· भावतया अभावत्वविरहेपि· अभावत्वनि
वेशाभ्युपगमेनाभावाभाव इत्यादिकल्पांतराभिधानस्य क्लिष्टतां तत्त्वभ्रमनिरासायाह दीधितौ एकदेशीति· ननु घटाभावो नास्तीत्या
दिप्रतीत्या घटाभावाभावत्वविशिष्टधर्मः सिध्यति· तस्यातिरिक्तत्वं च सैव विरुणद्धि· तस्या एव घटादिरूपभावे स्वाभावाभावत्वरूपस्वाभा
वप्रतियोगित्वावगाहित्वात्‌· इत्याशंक्य तेन चेति· संबंधांतरत्वात्‌· अभावत्वान्यसंबंधत्वात्‌· स च संबंधः स्वरूपादतिरिक्तो नातिरिक्तो वेत्यु १२७

भयथैव नक्षतिरिति भावः। बाधादित्यस्य भावइत्यादिः। अविरोधादिति· अभावाभावस्यातिरिक्तत्ववादिनापि प्रतियोगिमज्ज्ञानस्याभावग्रहप्रति
बंधकत्वोपगमादिति भावः। प्रत्यक्षेणेति· तद्ग्रहप्रतिबंधकग्रहविषयत्वस्य ज्ञानादिघटितत्वेन चक्षुराद्ययोग्यत्वादिति भावः। अनवस्था· अतिरि
क्तानामभावानामपि अतिरिक्ताभावकल्पनयाऽनंताभावकल्पनागौरवं· बाधकाभावादिति· भावस्यैवाभावत्वकल्पनायोगादिति भावः। मू
ले भावे नैवेति· घटाभावो नास्तीतिप्रतीतेर्घटादिरूपभावविषयकत्वेनैवेत्यर्थः। किमधिकेन· घटाद्यतिरिक्तविषयकत्वेन· यथातिरिक्त
स्यापि तेजोऽभावादेरिदंत्वादिविशिष्टस्य न प्रतियोगिग्रहसापेक्षग्रहकत्वं· किंत्वभावत्वावच्छिन्नस्यैव तथा· घटत्वादिविशिष्टस्य प्रति
योग्यनिरूप्यत्वेपि घटादेरभावाभावत्वेन प्रतियोगिनिरूप्यत्वे बाधकविरहादिति भावः। अभावाभावप्रतीतेः प्रमात्वाभिधानस्य भावेऽ
भावप्रतियोगिकत्वबाधकतादृशप्रतीतिप्रमात्वप्रसंजनसूचकतां स्फुटीकरोति· दीधितौ भावस्येति· भावस्याभावप्रतियोगिकत्वेपि घटाभा
वो नास्तीत्यादिप्रतीतेरभावादिवैशिष्ट्यांशे प्रमात्वसंभवात्· अभावरूपप्रतियोगिधर्मितावच्छेदकतापन्नाभावत्वांशे प्रमात्वानुपपत्तिरित्ला
भायव्याचष्टे अभावेति· अभावत्वं भाववैधर्म्यं· तच्च भावे न संभवतीति तादृशविशिष्टवाचकनञुल्लेखिन्या घटाभावो नास्तीत्यादिप्रतीतेस्तेन रूपेण घ

टाघवगाहित्वेन तदंशेऽप्रमात्वं व्याहन्येतेति मूलाभिप्रायः। अभावत्वं यद्भावभिन्नत्वं तदाभावे तदप्रसक्त्याभावेऽप्यभावत्वस्वीकार इत्य
हे० ग० र्थकान्यथेति मूलानुपस्थितिः। अतोऽभावत्वस्य तदन्यत्वं व्यवस्थापयति· अभावत्वं चेति· प्रथमं· भावत्वादिप्रकारकज्ञानानुत्तरदशायां·
१२८ अभावो न भाव इति· एतावतापि अभावत्वस्य भावभिन्नत्वस्वरूपता निराकृता· तथा सत्यभावो न भाव इत्यनयोः समानार्थकतया वि
128 षयभेदाधीनत्वियम्भेदस्थीनद्विधाऽभिधानानुपपत्तेः। ननु तथाप्यभावत्वस्य निर्विकल्पकावेद्यतायाः सिद्धांतसिद्धत्वात्· विशेषणज्ञा
नविरहेण प्रथमं तत्प्रकारकप्रत्यक्षानुपपत्तिरित्यत आह तद्भेति· अनुपस्थितमिति· विशिष्टबुद्धौ विशेषणज्ञानहेतुतायां विशेषण
भेदेन भिन्नतयाऽभावत्वविशिष्टबुद्धेरुक्तज्ञानहेतुत्वाकल्पनादित्यभिप्रायः। ननु केवलं प्रमेयत्वादिना अभावत्वादिप्रकारकोपनी
तभाने स्वरूपतोऽभावत्वप्रकारतानैयत्यवारणाय स्वरूपतस्तत्प्रकारकबुद्धौ लौकिकान्यत्वं कार्यतावच्छेदककोटाववनिवेश्यैवं स्व १२८
रूपतस्तद्विषयकज्ञानत्वेन हेतुताकल्पने लाघवात्· तथा च घटो नास्तीत्यादिलौकिकप्रत्यक्षपूर्वकालेऽपि स्वरूपतस्तद्विषयकज्ञा
नमपेक्षितमित्याशयेनाह निर्विकल्पकोपस्थितमिति· तथा चाभावत्वस्य निर्विकल्पकावेद्यत्वप्रवादो भावभिन्नत्वरूपाभावत्वम

तएव तस्य पदार्थांतरत्ववादिनां तु तस्या निर्विकल्पकवेद्यत्वमिष्टमेवेति भावः । न त्वेवमभावत्वस्यानित्यत्वे सत्यनेकव्यक्तिवृत्तितया जातित्वा
पत्तिरित्यत आह अभावत्वञ्चेति । इदं तु बोध्यं । अभावत्वं अनुयोगितारूपः प्रतियोगिनिरूपितः संबंधविशेषः । स च प्रतियोग्यादिभेदाद्भि
न्न एवेत्यननुगमकधर्मांतरप्रकारेणैव तस्य नास्तीति बुद्धौ प्रकारता । स संबंधिकतया च तस्य प्रतियोग्युपरागेणैव भानं । निर्विकल्प
कवेद्यता चाननुगमकधर्मस्यैव प्रपंचितं चेदधिकमधस्तात् । अधिकरणस्याभावरूपत्वे अभावाधिकरणत्वानुपपत्तिरतस्तद्धर्मे
वेति । अभावव्यवहारोपपत्तेरिति । भावे अभावाभावत्वस्वीकारे भावाभावत्वस्यापि तत्र संभवादिति भावः । प्रतिबंदिमात्रस्यायुक्ततरत
या युक्तिं दर्शयति लाघवादिति । अनंतधर्मिषु भावत्वकल्पनापेक्षया एकत्र तत्कल्पने इत्यादिः । घटत्वाद्यभावाभावस्याति त
रिक्तत्वे इष्टापत्त्यसंभवात् भावो नाभाव इति प्रतीते दुरपह्नवतया । भावत्वं भावव्यावृत्तमेवेति युक्तावेव निर्भरं दर्शयति ।
अबाधितेति । प्रमात्मकेत्यर्थः । एतेन । क्लृप्तधर्मिणां वक्तृत्वस्य तत्राभावत्वकल्पनायामबाधकत्वे । भावमात्रासिद्धिप्रसंगे
न । संयोगादिसाधारण्यापत्तेः तस्य सप्रतियोगिकत्वस्येत्यादिः । तथा च सप्रतियोगिकत्वस्य नास्तीति प्रतीतिविषयत्वे

हे॰ग॰ घटसंयोगादिमत्यपि घटो नास्तीत्यादिप्रतीतिः स्यादिति भावः ॥ अत्र सिद्धांतानुसारिणः ॥ अभावत्वं भावाभावसाधारणमेव ना
स्तीतिप्रत्ययनियामकं ॰ यद्भावो नाभाव इति प्रत्ययः प्रामाणिकः तद्दाभावत्वाहृतमप्यभावत्वं तादृशप्रत्ययनियामकतया स्वी
क्रियतां ॰ ननु नदेव नास्तीति प्रत्ययनियामकतया स्वसनंताभावकल्पनगौरवात् भावाभावसाधारणैकधर्मस्यैव
१२९ लाघवेन नास्तीति प्रत्ययनियामकतया कल्पनैवोचितास्यात् ॰ प्रत्वनंत घटादीनां घटाद्यभावाभावत्वकल्पने गौरवात् लाघवेनातिरि
क्तैकैकाभावेतत्कल्पनमुचितमिति तत्रेदं प्रतिभाति ॰ घटाभावाभावत्वं घटाभावनिरूपितानुयोगिताविशेषः ॥ स च घटनिष्ठघ
129 टाभावीयप्रतियोगितातो नातिरिच्यते ॰ सा चानंतघटेषु कृप्तैव ॰ न चैवमत्र घटाभावप्रतियोगी अत्र घटाभावाभाव इति प्रती
त्योरविशेषापत्तिः ॥ प्रतियोगिताख्यानुयोगितात्वरूपविभिन्नधर्मावगाहनेनैव तद्विशेषात् अभावविरहात्मत्वं वस्तुनः प्र १२९
तियोगितेति प्रवादाविरुद्धश्चायं पंथाः ॥ घटादेः संयोगादिसंबंधस्यैव संयोगादिसंबंधावच्छिन्नस्वाभावाभावत्वविशिष्टनि
रूपितत्वं ननु समवायादेरतो न कपालादौ संयोगादिसंबंधावच्छिन्नघटाभावे नास्तीत्यादिप्रत्ययप्रसंगः इत्यलंपल्लवितेन ॰

साधारणविरुद्धयोर्गमकत्वभ्रमरूपाशंकोनकथंचिद्विशेषइतिमूलेनोक्तंदूषयति· व्यभिचारिणीत्यादिना· अव्यभिचारिमात्रइतिभ्रमद
सङ्क्रमेणान्वयः। मात्रपदेनसाध्यसामानाधिकरण्यभ्रमव्यवच्छेदः। सामानाधिकरण्यांशेऽपि·इत्यपिना। अव्यभिचारसमुच्चयः। नन्वेवम
प्यनुमितिविरोधित्वरूपं उभयोरपिसाध्याभावसामानाधिकरण्यात्मकमेवेतिसाधारणविरुद्धयोः पृथक्परिगणनमसंगतमि
त्यतआह दूषकतायामिति· अनुमित्यनुपधानप्रयोजकत्वरूपभेदविरहेपीत्यर्थः। निग्रहस्थानत्वेनविशेषादिति· निग्रहविशेषप्र
योजकत्वेनानैकांतिकत्वबहिर्भावादित्यर्थः। भेदेनोपन्यासः। विरुद्धस्यस्वातंत्र्येणपरिगणनं· अतएव उक्तयुक्त्याविरुद्धस्यानैकां
तिकबहिर्भूतत्वादेव· विरुद्धस्यानैकांतिकलक्षणाक्रांतत्वेपिस्वातंत्र्येणतद्विभजनंसंगमयति· छलजात्योरिति· छलजात्योः नि
रनुयोज्यानुयोगपदार्थविभाजकनिग्रहस्थानत्वाक्रांतत्वेपियथापदार्थेषुस्वातंत्र्यविभजनमविरुद्धं तथाविरुद्धस्यानैकांति
कविशेषत्वरूपानैकांतिकत्वरूपहेत्वाभासविभाजकरूपाक्रांतत्वेपिहेत्वाभासेषुस्वातंत्र्यविभजनमविरुद्धमित्यर्थः। मूलेवि
रुद्धलक्षणइति· विरुद्धपक्षकेतरभेदानुमानइत्यर्थः। नव्यर्थत्वं· ननियमांशस्यव्यर्थत्वं· हेतुमन्निष्ठाभावाप्रतियोगित्वरूपा

हे० ग०
१३०
130

माः साध्याभावनिष्ठहेतुव्यापकतायाहेतुसाध्याभावसामानाधिकरण्याघटिततया न तद्घटितविरोधमाने सामानाधिकरण्यभानस्यावश्य
कत्वाभिधानं मूलकृतो न संगच्छत इति तत्संगमनाय वितर्कयति व्यापकत्वमिति· अविरोधित्वादिति· ग्राह्याभावाद्यनवगाहनेन तज्ज्ञानस्य
व्याप्तिज्ञानाद्यप्रतिबंधकत्वादित्यर्थः। ननु हेतौ साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानस्य व्याप्तिज्ञानादौ ग्राह्याभावाद्यनवगाहितया
प्रतिबंधकत्वं न संभवतीति कथं हेतुनिष्ठतादृशप्रतियोगित्वस्य विरोधरूपतया सिद्धांतग्रणायनमित्यत आह तत्प्रतियोगिकेति· हेत्व
भावप्रतियोगिकेत्यर्थः। हेत्वभावाभाववत्त्वेनभासमाने एव साध्यसामानाधिकरण्यग्रहस्तदभावे तु व्यविचितिवेद्यतया साध्यसमा
नाधिकरण्याभावप्रतियोगित्वमवगाहत इति तादृशप्रतियोगित्वाभावरूपव्यापकताग्रहप्रतिबंधो न तु हेतुतावच्छेदकरूपेणाभा
समाने साध्यसामानाधिकरण्यग्रह इत्यरुचेरनुपदं वक्ष्यमाणतया· अभिप्रायेणेति· यदि चेत्सतंतरं हेत्वभावे साध्यव्यापकताग्रहदशा १३०
यामिति पूरणीयं· तदभावेति· हेत्वभावेत्यर्थः। असामानाधिकरण्यग्रहेपि· सामानाधिकरण्यग्रहासंभवेपि· साध्यव्यापकत्वं साध्यासमा
नाधिकरणस्वाभावकत्वरूपं यदि विवक्ष्यते तदा पूरणं विनेव असामानाधिकरण्यग्रहेपीत्यस्य सामानाधिकरण्याभावग्रहदशा

यामिति यथाश्रुतार्थकतयैव च संगतिर्बोध्या· तत्वेन· हेतुतावच्छेदकरूपेण· अव्याप्तिहेतोर्विरुद्धत्वस्याव्याप्तिर्यो तां विरोधरूपतायाश्चेष्टत्वात्
वृत्तिमत इति धर्मेति च व्यर्थमित्यत आह वृत्तीति· पक्षधर्मत्वाविरोधित्वप्रदर्शकमिति· एतत्प्रदर्शनं च स्वरूपासिद्धिवैलक्षण्यस्य विरोधे ला
भायेति ध्येयं· विशेषकमिति· विरोधशरीरप्रविष्टार्थकं· दूषकतायां· प्रतिबंधकतायां· अनुपयोगित्वात्· तदर्थविषयतायाअनुपयोगित्वात्·
अव्याप्तिकरत्वात्· अवृत्तिविरुद्धासंग्रहप्रयोजकत्वात्· वृत्तिविशेषेति· येन संबंधेन विरुद्धत्वमभिमतं तत्संबंधावच्छिन्नसाध्यवद्वृत्तिनिवे
शलाभायेत्यर्थः॥ तन्निवेशप्रयोजनमाह तेनेति· लक्षणचतुष्टयस्य भेदं स्फुटयति· आद्ययोरिति· अभावद्वयेति अत्यंताभावाविल्यर्थः॥ पृ
थिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादेर्व्यतिरेकिणि साध्यवद्वृत्तित्वाभावासत्वाद्विरुद्धत्वातिव्याप्तिर्न संभवतीत्याशयेनाह ज्ञानेति प्रस
क्तिमिति· हेतुमति साध्यवत्वाग्रहेण तत्र साध्यवदवृत्तित्वग्रहसंभवादिति भावः॥ असाधारणे शब्दो नित्यः शब्दत्वादित्यादेर्विरुद्धत्वातिव्याप्ति
शंकां लक्ष्यतां स्वीकृत्य निराकुरुते मूले असाधारणे चेति· संकर एवेति· विरोधस्य दोषांतरसामानाधिकरण्यमिष्टमेवेत्यर्थः॥ अनेन· वि
रुद्धत्वेन· तस्य· असाधारणहेतोः॥ दोषत्वात्· दुष्टत्वेक्षतिविरहात्· साध्याभाववद्वृत्तित्वज्ञानाभावस्य साध्यवदवृत्तित्वाज्ञानप्रयोजकत्वेन

संभवति· कार्यभावस्य कारणव्यतिरेकाप्रयोजकत्वादिति· तेनाविनेयादिमूलासंगतिरिति तदन्यथाव्याख्यातुमुपादत्ते दीधितौ नेनेत्यादी

हे० ग० ति· व्याप्तिमत्वेति· व्याप्तिमत्व विशिष्टसाध्यवदवृत्तित्वरूपहेतुज्ञानघटितसाध्याभाववद्वृत्तित्वानुमितिसामग्र्याः फलोपहितत्वानिर्वाहादि

१३१ त्यर्थः। तथा च सामग्र्याः फलोपधानार्थं नियमानुरोधात्तज्ज्ञानस्यावश्यकत्वमिति भावः। मूलेउपजीव्यत्वेन भिन्नत्वादिति· व्यभिचारज्ञानो

131 पजीव्यत्वेनाविरोधस्यापि पृथक्‌दोषतायाआवश्यकत्वादित्यर्थः। नस्वतोदूषकमिति· उपाधिरिव न हेत्वाभास इति शेषः। व्याप्तिग्रहप्र

तिबंधकत्वादित्यस्य स्वतोपीत्यादिः। व्यभिचारज्ञानविरोधित्वेनेति मूलस्य व्यभिचारज्ञानाभावविरुद्धत्वेनेत्यर्थे न संभवति तावता व्या

प्तिज्ञानप्रतिबंधकत्वालाभादित्यन्यथा तद्व्याचष्टे दीधितौ व्यभिचारेतीति· व्याप्तेरव्यभिचारसामानाधिकरण्यघटितत्वमभिधायतन्न

दृशभानविरोधिनो ज्ञानस्य व्याप्तिज्ञानप्रतिबंधकतां स्फुटीकुर्वन्नाद्विषयस्य हेत्वाभासतायां निष्प्रत्यूहत्वं दर्शयति तदयमर्थ इत्यादिना· १३१

विरोधस्यैव निरुक्तत्वात्स चायमित्यस्य तत्परामर्शकतां भ्रमं निराकरोति· स चायमिति· साध्याभावव्याप्यत्वज्ञानवत्साध्यवद्वृत्तिव्याप्यत्व

ज्ञानस्यापि विरोधितया तदनभिधानेन्यूनतां परिजिहीर्षुः साध्याभावपदं साध्यतद्व्यत्वं दतान्योन्याभावपरतया व्याचष्टे तदभावत्वमिति·

साध्याभावव्याप्यव्याप्यत्वादिवारणायाभावपदं विरोधिताविशेषसूचकं उत्तरत्रापि· साध्यव्यापकाभावेत्यत्रापि· अन्यथा साध्यव्यापकवद्भेद
त्वासंग्रहादिति भावः। व्यापकाभावव्याप्यत्वव्यापकविरुद्धत्वयोरभेदात्· द्वितीयव्याप्यपदार्थाविवक्षायामाह व्याप्यपदमिति· विरुद्धपदस्य
तदभावव्याप्यतद्ग्रहस्योभयपरतामाह साध्यव्यापकेति· सामानाधिकरण्यविरोधित्वं· तद्ग्रहप्रतिबंधकधीविषयत्वं· न तु तदधिकरणा
वृत्तित्वं· तदभावत्वादेरपि तत्समानाधिकरणावृत्तित्वात्· व्यापकवदवृत्तित्वादीत्यादिना व्यापकाभावव्याप्यत्वपरिग्रहः। इदं च तद
भावव्याप्यत्वग्रहस्य तत्सामानाधिकरण्यग्रहविरोधितामंगीकृत्य। विरुद्धत्वादिग्रह एव विरोधी न तु तदुपलंभग्रह इत्याशयेनोप
लंभपदानामविवक्षितार्थकतामाह सर्वत्रेति· सर्वत्र व्यापकविरुद्धोपलंभादित्यत्राग्रिमत्रितयोग्युपलंभादित्यादौ चेत्यर्थः। सा
ध्याभावतद्व्यापकाभावव्याप्यत्वेनेत्यत्र मूले व्याप्यपदार्थाविवक्षायां साध्याभावव्याप्यत्वालाभः। तद्विवक्षायां च साध्यव्यापकाभावत्वाला
भः। अविवक्षिततद्व्याप्यत्वलाभश्चेत्यतो व्याचष्टे साध्याभावेनेति· ज्ञातस्य दोषत्वादिति मूलं· ज्ञानस्य विरोधित्वादित्यर्थकं· तथा
च सामानाधिकरण्यग्रहविरोधिप्रमाणानामपरिगणनीयतया न तदुपादानविरोध इति भावः। स्वव्यापकतायाः स्वासाधारण्य एव कथं

हे०ग०
१३२
13

साध्याभावत्वस्यकथितांतर्भावइत्याकांक्षायामाहदीधितौतथाचेति·प्रतियोग्युपलंभपदंसाध्यीभूताभावप्रतियोगितावच्छेदकलद्ध
र्मेदत्ववतदत्यंताभावत्वाद्युपग्राहकतयाव्याचष्टे प्रतियोग्युपलंभादिति·स्वरूपतइति·विरोधितावविशेषसूचकं·साध्यव्यापकाभाव
व्याप्यत्ववारणाय·विरोधित्वात्·विरोधिज्ञानप्रकारतावच्छेदकधर्मवत्वात्·निरग्निकान्यत्वादीति·निरग्निकान्यत्वादीत्यर्थः।सा
ध्यव्यापकविरुद्धोपलंभादित्यनेनसाध्याभावव्याप्यत्वोपसंग्रहायाहसाध्यव्यापकेत्यत्रेति·धूमवत्वादितीतितृतीयोदाहरणस्यसा
ध्यव्यापकाभाववत्परमध्यमेप्यंतर्भावःसंभवतीतिदशाविशेषेव्यापकविरुद्धांतर्भावंदर्शयति·धूमाभावस्येत्यादिना·दशायामित्यनं
तरमेवकारःपूर्वः।मध्यमे·साध्यव्यापकाभावत्वज्ञानविषयतयाऽनुक्ते·ग्रहे·ग्रहदशायां·चरमे·साध्यव्यापकविरुद्धत्वज्ञानविषयतयाऽनु
क्ते।स्वरूपतोज्ञातानामन्येवेति·एवकारोमध्येयोज्यः।तथाचसाध्याभावव्याप्यत्वादिनाअज्ञातान्यपिविरोधीनीत्यर्थः।असामानाधिकर १३२
ण्यव्याप्यत्वेनेतिसावधारणमतोनवक्ष्यमाणदूषणासंगतिः।व्यापकाभावव्याप्यत्वादेरित्यादिना।व्यापकवदवृत्तित्वपरिग्रहः
स्वरूपेणैवज्ञातयोरिति·तदभावव्याप्यत्वेनाज्ञातयोरपीत्यर्थः।साध्याभावःसाध्यसमानाधिकरणइत्यनाहार्यज्ञानानुत्पत्त्याधर्मितावच्छे

दकतासंबंधेनतत्सामानाधिकरण्यप्रकारकानाहार्यबुद्धौतदभावत्वादिपर्याप्तविषयतासंबंधेनज्ञानत्वेनप्रतिबंधकत्वादितिभावः।य
थाकथंचिद्विरोधिरूपाणामेवायंविभागइत्याशंकतेतथात्वेपीति·स्वरूपतोविरुद्धत्वेपीत्यर्थः।तत्वं·विरुद्धत्वं·अविरुद्धं·अक्षतं·असामा
नाधिकरण्यस्येति·अस्यस्वरूपतएवसामानाधिकरण्यधीविरोधित्वादितिभावः।समानाधिकरणेति·अयमर्थः·साध्याभावत्वादिसा
द्दौसाध्याभावत्वादीनामित्यर्थः।तेषामप्यभ्यत्वाद्यसामानाधिकरण्यव्याप्यत्वेनविरोधित्वादितिभावः।सचायमित्यादिग्रंथोनसामानाधि
करण्यधीविरोधिरूपपरिगणनपरः·किंतुविरुद्धहेतुप्रभेदपरिगणनपरः।एवंचसाध्यासामानाधिकरण्यादिरूपप्रवृत्तांधर्मिणांसा
ध्याभावव्याप्यत्वादिनैवोपग्रहान्नाधिक्यमितिशंकांनिरस्यतिनचैतानीति·सर्वेषां·साध्यव्यापकाभावादीनां·साध्याभावव्याप्यत्वेने
ति·तथाचतेषांपृथगुपादानानुपपत्तिरितिभावः।इदमुपलक्षणं·एतदज्ञानेपिस्वरूपसदमूलविरोधोपिद्रष्टव्यः।विभागसंगमयतांकेषांचिन्मत
माहविरोधोन्नायकेति·एवंचसाध्याभावव्याप्यत्वादिनापिज्ञानस्ययद्रूपकत्वमभिहितंतदपिविरोधज्ञानद्वारानतुसाक्षादितिनविरोध
इतिध्येयं·विरोधानुमापकहेतूनामानंत्यात्त्रैविध्यानुपपत्तिस्तदवस्थैवेत्यस्वरसस्सूचनायवदंतीति·मूलेसर्वश्चायंविशेषणद्वारापीतितु

क्तनिखिलप्रकारोविरुद्धः। विशेषणानिबंधनोपीत्यर्थः। तत्रविशेषणानिबंधनत्वस्यविरोधरूपविशेषणेसंक्रमोबोध्यः। रूपत्वगुणवदिति। अत्र
टि०ग० विशेष्यधूमत्वावच्छिन्नस्यासाध्यसमानाधिकरणत्वात्कद्वयादिनिशिष्टस्यैवविरुद्धत्वादितिभावः। अत्रप्रत्येकविशेषणावच्छिन्नस्यै
१३३ वविरुद्धताबोध्या। बाधस्वरूपासिद्धन्यतरसंकरस्यावश्यकतयाकादाचित्कत्वाभिधानंनसंगच्छतइत्याशंक्यतदुभयानुगमकेतररूपा
133 वच्छिन्नसंकरस्यकादाचित्कत्वंविवक्षितमित्याहदीधितौबाधेत्यादिना। ननुविरोधस्यत्वेदोषांतरस्यावश्यकत्वेकिमस्यदोषताभ्य
पगमेनेत्यतआहज्ञानासंकराद्वेति। दोषांतराज्ञानदशायांविरोधज्ञानेनाप्यनुमितिप्रतिबंधादस्यदोषांतरत्वमावश्यकमितिभावः
॥इतिविरोधटिप्पणी॥ ॥श्रीः॥ समानबलेत्यादिमूलस्यप्रकृतसाध्यानुमापकबलशालित्वेसतिप्रकृतसाध्याभावानुमापकबल
शालिहेत्वंतरकत्वमित्यर्थः। अत्रानुमापकत्वमनुमितिफलोपहितत्वं। अनुमितियोग्यत्वंवा। आद्येदूषणमाहपरस्परेति। उभयो १३३
रबाधकत्वादित्यस्यसत्प्रतिपक्षतादशायामित्यादिः। द्वितीयपक्षेएतद्दोषानवकाशात्तत्बलपदार्थंवितर्क्यदूषयतिबलंचेति। बलप
दार्थश्चेत्यर्थः। सपक्षसत्वादीति। आदिनापक्षसत्वविपक्षासत्वयोःपरिग्रहः। व्यतिरेकिणीति। अभावात्। सपक्षाप्रसिध्यातत्सत्वासंभवात्

एतदुपलक्षणं। सर्वत्रैव सत्प्रतिपक्षे एकहेतौ पक्षसत्त्वविपक्षासत्त्वयोरेकतराभावो पि द्रष्टव्यः। समानेति। संपातायातं। बलपदार्थ
स्य समानत्वाद्गृहीतत्वात्। विरोधेनेति। विरुद्धसाध्यतदभावव्याप्ययोरेकत्रासत्त्वनियमेनेत्यर्थः। तदङ्गेति। व्याप्तिपक्षधर्म
तयोरेकतराभावेत्यर्थः। व्याप्तिपक्षधर्मतया। व्याप्तिसहितपक्षधर्मतया। ज्ञातत्वं। ज्ञायमानत्वं। व्याप्तिविशिष्टस्य वैशि
ष्ट्यज्ञानविषयपक्षकत्वमिति समुदितार्थः। तेन नित्यत्वव्याप्यश्रावणत्वादिवैशिष्ट्याप्रसिद्ध्या व्याप्तिरसंगतिः। नित्य
त्वव्याप्येति। शब्दो ऽनित्यः कृतकत्वादित्यादौ श्रावणत्वादि प्रतिहेतौ बलस्य भ्रमात्मकव्याप्यत्वज्ञानस्यारोप्याप्रसिद्ध्या
संभवेन समानबलत्वासंभवादित्यर्थः। यत्राव्याप्यः प्रतिहेतुः तत्र पक्षधर्मे श्रावणत्वे ऽन्यत्राप्रसिद्धत्वात् व्याप्तेरारोप एव बलं।
यत्र पक्षधर्मः प्रतिहेतुः साध्यव्याप्यस्तत्र पक्षधर्मत्वारोप एव बलमिति शंकायां विशिष्टाप्रसिद्ध्या व्याप्तिविशिष्टपक्षधर्म
त्वारोपासंभवाभिधानमसंगतमित्याशयं पूरयति दीधितौ व्याप्येत्यादिना। व्याप्ते। व्याप्तिविशिष्टे। पक्षधर्मे। पक्षधर्मताविशि
ष्टे। प्रसक्ते। व्याप्तिविशिष्टस्वविषयकपक्षधर्मताज्ञानत्वादिना। अव्यापकः। सकलसत्प्रतिपक्षासंग्राहकः। अव्याप्यादिप्रतिप

हे०ग्रं० भस्य व्याप्यादिविशिष्टस्याप्रसिद्धेरितिभावः। विशिष्टारोपो व्याप्तिविशिष्टपक्षधर्मतायाः स्वस्मिन् ग्रहः। वाच्यः। बलपदेन विवक्षणीयः। एकध
१३४ र्मिणीत्यादिकं एकत्रेत्यादिमूलग्रन्थविवरणं। विशिष्टस्येति। यादृशसाध्यं पक्षे बाधितं तदीयव्याप्तिविशिष्टप्रकृतपक्षवृत्तित्वस्याप्रसिध्या। न संभ
134 वतीति। तथा च नित्यत्वव्याप्तिविशिष्टश्रावणत्वाप्रसिध्या यथा व्याप्यादिविशिष्टत्वं तु धर्मिकपक्षधर्मत्वादिग्रहोऽप्रसिद्धस्तथा नित्यत्वादिव्याप्ति
विशिष्टशब्दवृत्तित्वाद्यप्रसिध्या श्रावणत्वादौ न तद्धेत्वप्रसिद्धिरिति श्रावणत्वादेः समानबलत्वासंभवेन तत्कत्वादेः सत्प्रतिपक्षत्वानुपपत्ति
रितिभावः। व्याप्तिपक्षधर्मत्वोभयज्ञानविषयतायाबलत्वेनैषदोषः इत्यतो दोषांतरं स्वयमाह विरुद्धादाविति आदिना साधारणपरिग्रहः।
साध्याभाववद्वृत्तित्वरूपव्याप्तेरन्यत्राप्रसिद्ध्या विरुद्धादावप्यारोपसंभवात्। स्वव्यापके साध्ये अप्रसिद्धेश्चेति। तत्र ज्ञानघटितसमानब
लत्वत्वासंभव इति शेषः। व्याप्तिप्रकारेण पक्षे स्वप्रकारकज्ञानविवक्षणे सामान्यादौ पक्षे समवायादिरूपहेतुतावच्छेदकसंबंधेन वृत्ते
रप्रसिद्धिर्न क्षतिमावहतीति मानोक्तौ। व्याप्तिघटकानां खंडशः प्रसिद्धतावत्पदार्थानां परस्परारोपश्चैवावगाहिज्ञानस्य बलत्वया विव १३४
क्षणे नैतद्दोषोद्धारसंभवेऽपि अन्वयव्यतिरेकव्याप्तिज्ञानयोरननुगमेनैकोपादानेऽन्यतरव्याप्तिइ रुद्धैरेवेति भावः। साध्यानुमिति

साध्यवत्ताज्ञानविरोध्यनुमितिसमर्थत्वेनानुगमे तु सिद्धांतलक्षण एव पर्यवसानं· व्याप्तिभंगाभंगानुपपत्तिमूलं व्याप्तिपक्षधर्मताज्ञमितिविषयत्वतद्भ्रम
विषयत्वान्यतररूपं परस्परार्थकं। एकतरविषयकव्याप्तिपक्षधर्मताज्ञानस्य भ्रमत्वनियमेऽपि तदनवधारणेनानिर्धारिततद्विशेषत्वसंभवादेकत्र भंगानियमा
दिति दूषणमसंगतमित्यत आह तथा चेति· तादृशभंगानियमे चेत्यर्थः। तदवधारणं· भंगावधारणं· अनयोरेकतरं बाध्यं विरुद्धार्थग्राहकत्वादित्यनु
मानात्तत्संभवात्ति पक्षतादृशायामस्तीत्यर्थः। यद्यप्यनयोरेकतरमित्यादेरेकत्र पक्षे साध्यतदभावव्याप्यतया हेतुद्वयज्ञानान्यतरत्तभ्रमः एकत्र मिथो वि
रुद्धद्वयसाधकद्वयान्यतरत्वादित्यर्थो न साधुः। सद्धेतुपरामर्शेऽप्यन्यतरत्वरूपहेतुसत्त्वेन भ्रमत्वस्य चाभावेन व्यभिचारात्· न चैकपक्षकहेतुप्रति
हेतुपरामर्शान्यतरत्वं पक्षीकृत्य विरोधिद्वयसाधकद्वयवृत्तित्वेन भ्रमवृत्तित्वमेवानुमेयं· तादृशान्यतरत्वाश्रये एकत्र भ्रमत्वसत्त्वे नैव तत्र भ्रमवृत्तित्व
सत्त्वान्न व्यभिचार इति वाच्यं। तथासत्यपि घटत्वादिविषयकसमूहालंबनरूपो यत्र परामर्शोऽतित्र घटाद्यंशे भ्रमत्वमात्रपार्थान्तरवारणाय तत्
तत्सद्धेतोस्तत्साध्यव्याप्तिपक्षधर्मतान्यतरभ्रमस्य निवेशनीयतया तत्सद्धेतुद्वयांतर्गतसद्धेतोस्तत्साध्यादिव्याप्त्याद्भ्रमाप्रसिद्ध्या साध्याप्रसिद्धेः। न
तद्धेतुद्वयान्यतरं येन तत्साध्यव्याप्तिपक्षधर्मतान्यतरभ्रमवृत्तित्वसाधने च विरुद्धार्थसाधकान्यहेतुकपरामर्शद्वयान्यतरत्वे व्यभिचारः। साध्यप्र
सिद्धिमात्रेणैव कृतकृत्यताच· तथापि तत्तत्साध्यव्याप्यवत्त्विन्नपक्षविषयतानिरूपितहेतुविषयताद्वयान्यतरत्वं पक्षीकृत्य भ्रमत्वनियतविषयता

व्याप्तित्वं एकधर्मिकविरुद्धानुमितिजनकतावच्छेदकविषयताद्वयव्याप्तित्वेन साधनीयं भ्रमत्वं चानुगतं कथंचिन्निर्वचनीयं उच्यत इत्यादिग्रंथस्य दोषनिर्वचनप
रत्वं न संभवति साध्यविरोधिरूपस्थापनेत्यादेर्हीनस्य ग्राह्याभावावगाहितयानुमित्यप्रतिबंधकतया तस्य हेत्वाभासत्वासंभवादिति सत्प्रतिपक्षव्यवहारवि
षयनिर्वचनपरतया व्याख्यातुकामो व्यवहारविषयमवधारयति सत्प्रतिपक्षेति सत्प्रसक्तिर्वेति समीचीने समीचीनेवेत्यर्थः तथा च सद्धेतावुक्तलक्षणस्य द
शाविशेषेति प्रसंगो न दूषणावह इति भावः अपरामृश्यमान इति प्रकृतसाध्यसिध्यौपयिकस्य विषयकपरामर्शदशानवच्छिन्न इत्यर्थः एतेन साध्यसि
ध्यौपयिकपरामर्शकालीनत्वरूपसमानकालत्वनिवेशसार्थक्यं दर्शितं असति गृहीताप्रामाण्यके वा परामर्शे सत्प्रतिपक्षव्यवहारविरहादित्याशयमयं
थस्तु असतीत्यस्य दृष्टांतविधया प्रदर्शनेन गृहीताप्रामाण्यकत्वांशमात्रव्यावृत्तिप्रदर्शनपर इति न पौनरुक्त्यं अविद्यमानो विरोधिपरामर्श इति विरोध्य
नुमितियोग्यपरामर्शदशानवच्छिन्न इत्यर्थः एतेन वक्ष्योपस्थितिप्रतिबंधकार्यत्वांशनिवेशप्रयोजनं दर्शितं अत एवेति प्रकृतपरामर्शस्याविरोधिपरा
मर्शस्यैवासत्वदशायां सत्प्रतिपक्षव्यवहारविरहादेवेत्यर्थः अतीतानागतप्रतिहेतुपरामर्शदशायामपि सत्प्रतिपक्षत्वापत्तिः प्रतिपक्षपदस्य हेतुपरतापक्षं
परित्यज्य परामर्शपरतामाह विरोधिपरामर्शो वेति परामृश्यमानस्येति यद्यप्यन्यपदार्थे परामृश्यमानत्वं न शब्दतो लभ्यते तथापि प्रतिपक्षपदस्यैव
फलोन्मुखस्य कार्यप्रतिरोधकपरतया परामृश्यमानस्य कार्यानुमितिविरोधिपरामर्शपरत्वात् फलितार्थविवरणमिदं तदनुसारेण तादृशव्यवहा

रानुसारेण· बाधाश्रयासिद्धिनिर्णयवारणायेति· तद्दशायामतिव्याप्तिवारणायेत्यर्थः। तयोरपि साक्षादनुमितिप्रतिरोधकत्वादिति भावः। न चाश्रया
सिद्ध्यादिनिर्णयस्यानुमितिप्रतिबंधकत्वेपि तस्य परामर्शेनापि समं विरोधात्परामर्शकाले तत्समवधानं दुर्घटमिति वाच्यं· लौकिकसंनिकर्षादिव
तत्संभवात्· आश्रयासिद्धिपदं साध्याप्रसिद्धेरप्युपलक्षकं। वज्रपदेनैव तद्वारणात्समर्थात्तद्वैयर्थ्यमित्याशंकां निराकरोति न चासावित्यादिना· अ
सौ· बाधादिनिर्णयः। व्याप्तीति· धूमो वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वाभाववान्पर्वतावृत्तित्वात्· तादृशाभाववान्धूमो गुणवान्द्रव्यत्वादित्या
दौ धूमादौ वह्न्यादिव्याप्तिविशिष्टपक्षधर्मतानिश्चयरूपबाधाश्रयासिद्धिनिर्णयस्य व्याप्तिपक्षधर्मतात्मकबलोपस्थितित्वसंभवादित्य
र्थः। ननु बलपदं प्रकृतसाध्यभाववव्याप्तिविशिष्टप्रकृतपक्षधर्मतापरामितिनायं दोषः। प्रकृते वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वाभावाभा
वव्याप्तिविशिष्टधूमवृत्तितायाएव बलत्वादित्यत आह पक्षइति· इतीत्यस्य प्रतिरोधकत्वानविषयस्येति शेषः। पक्षस्य भिन्नत्वादित्यन्व
यः। प्रथमे प्रकृतपक्षस्य द्वितीये प्रकृतसाध्यस्य पक्षतया पक्षभेदः। व्याप्तेर्भेदकं द्वयमाह व्यापकेत्यादि· व्यापकभेदेनेति· व्यापकयोः साध्ययोः
साध्याभावपक्षवृत्तित्वाभावयोर्भेदेनेत्यर्थः। अन्वयव्यतिरेकभेदेनेति· एकसाध्यगमकव्याप्तेरप्यन्वयव्यतिरेकरूपगमकभेदेनेत्यर्थः। अ
विवक्षितत्वात्· विवक्षितुमशक्यत्वात्· नन्वनुगतरूपेण दर्शितसकलव्याप्तिपक्षधर्मतानिवेशेनायं दोष इत्यत आह साध्येति शिरो

वेष्टनेनेति । तादृशानुमितिजनकज्ञानत्वेन प्रतिरोधकज्ञानस्यैव निवेशात्तद्विषयविषयकत्वेन पुनस्तन्निवेशोऽनुचित इत्यर्थः । तथा च विरोध्युपस्थापन
हे०ग० समर्थत्वेनैवोपस्थितिनिवेशो युक्त इति भावः । उपस्थितेर्विरोधित्वं प्रतिबंधकत्वं तच्चानुसाध्यनिरूपितं इति साध्यपदं तदनुमितिपरं तया व्याचष्टे साध्य
१३६ स्येति । इत्याद्युपस्थितेरित्यादिना साध्यपक्षावृत्तीत्याद्युपस्थितिपरिग्रहः । उपस्थापनेत्यत्र धात्वर्थोपस्थितेर्विरोध्यं तस्य स्तोकन म्रेत्यत्र नमनेस्तोक
136 स्यैवाभेदान्वयः प्रयत्नेनोपपाद्यः । एतदस्वरसेन साध्यपदस्य मुख्यार्थपरत्वानुरोधेन च कल्पांतरमाह साध्यविरोधीति । तत्त्वाय ह प्रतिबंधकज्ञान
विषयत्वस्यैव विषयविरोधरूपत्वात् । साध्यवत्ताज्ञानप्रतिबंधकज्ञानविषय इति विवरणसंगतिः । साध्याभाववत्पक्षादेरित्यादिना पक्षावृत्तिसा
ध्यादिपरिग्रहः । एतच्च फलितकथनं । तदुपस्थितेरिति । तादृशपक्षादेः कर्मतया उपस्थितिक्रियायामन्वयो युक्त एवेति भावः । अथैवं पक्षे साध्यव
त्तिसाध्याभाववत्पक्षादेरप्रसिध्या प्रतिरुद्धहेतावव्याप्तिरिति चेन्न । यद्रूपावच्छिन्ने धर्मिणि यद्रूपावच्छिन्नवत्ताज्ञानं पक्षतावच्छेदकावच्छिन्ने साध्यता
वच्छेदकावच्छिन्नवत्ताज्ञानप्रतिबंधकं तद्रूपावच्छिन्नपक्षे तद्रूपावच्छिन्नसाध्यकानुमितिजननयोग्योपस्थितिप्रतिरुद्धकार्यकत्वविवक्षणा
त् । यत्र बाधो दोषस्तत्रैव सत्प्रतिपक्षो दोषः । प्रतिहेतुपरामर्शसंवलनदशायां तत्रैव हेतौ सत्प्रतिपक्षव्यवहारो यथार्थ इत्याशयेनैवैतत्कल्पानुसरणं । १३६
तथा च साध्यवत्पक्षकहेतोरलक्ष्यतया न तत्राव्याप्तिरित्यप्याहुः । वस्तुतस्तु साध्यवत्ताज्ञानप्रतिबंधकज्ञानत्वेनैवोपस्थितिर्लक्षणे निवेश्या । तादृश

ज्ञानविषयविषयकत्वेन तन्निवेशस्य शिरोवेष्टनेनेत्यादिन्यायेन हेयत्वात्· साध्यादिपक्षकसाध्यतावच्छेदकाद्यभाववद्व्याप्यवत्तापरामर्शवारणाय विशि
ष्टसाध्यादिघटितत्वाविरोधित्वेनाप्युपस्थितिर्विशेष्या· जननयोग्यपदेति· जननं त्वुडर्थः। योग्यत्वं च समर्थपदार्थः। वत्त्वे समानत्वं न विशेषणं तस्याविवक्षित
त्वात् अपि तु उपस्थितावेवेति स्फुटीकर्तुं समानयेससमासलिखनं। तथाविधव्याप्यादिबुध्या· साध्याभावव्याप्यादिबुध्या· एतदपि वस्तुकथनं· तयाप्र
तिरुद्धत्वं च तत्र युक्तानुमानस्य प्रतियोगित्वं· वह्निव्याप्याभाववद्धिसाध्यकस्थले वह्न्यादिमत्पक्षविषयकानुमितिजननयोग्यया वह्न्यादिव्याप्यवत्पक्षोपस्थि
त्या बाधनिश्चयरूपया कार्यप्रतिरोधदशायामतिव्याप्तिवारणाय साध्यवत्ताज्ञानप्रतिबंधकत्वं प्रथमोपस्थितिविशेषणं· वह्न्यादिव्याप्यवत्पक्षोपस्थि
प्या तेरपि साध्यवत्ताज्ञानप्रतिबंधिकावह्निव्याप्त्यादिमत्पक्षविषयकसमूहालंबनरूपवह्न्यादिमत्पक्षविषयकानुमितिप्रतिस्वरूपयोग्यतया यथाश्रुतेऽ
क्यतिव्याप्तेर्दुर्वारतया साध्यवत्ताज्ञानप्रतिबंधकतावच्छेदकविषयतावच्छिन्नानुमितिनिष्ठकार्यतानिरूपितकारणताश्रयपर्यंतं समर्थितं न वि
वक्षणीयं। न च साध्यवत्ताज्ञानप्रतिबंधकतावच्छेदिका साध्याभाववत्त्वप्रकारता तद्विधेयतैव च प्रतिहेतुपरामर्शजन्यतावच्छेदिकेति तज्जन्यतायां न
प्रतिबंधकतावच्छेदकविषयतावच्छिन्नत्वमित्युक्तविवक्षणासंभव इति वाच्यं· प्रकारताविशेषस्यैव विधेयतारूपत्वात्· अन्यथा तु यद्वच्छिन्नवि
शेष्यकयद्वच्छिन्नप्रकारकत्वं प्रतिबंधकतावच्छेदकं तद्वच्छिन्नपक्षकतद्वच्छिन्नविधेयकत्वावच्छिन्ननिरूपितकारणत्वमेव निवेश्यं· ननु ताद्दशो

हे० ग०
१३०

पस्थितिकालीनज्ञानविषयत्वमेव सम्यक्. किंतत्प्रतिरुद्धकार्यकज्ञानविषयत्वपर्यंतनिवेशेनेत्याकांक्षायामाह विरोधीत्यादि. अप्रामाण्यग्रहावि
शिष्टायाव्याप्त्यादेःकपस्थितेर्न विरोध्यनुमितियोग्यत्वं. तदग्रहविशिष्टत्वेनैव परामर्शस्यानुमितियोग्यत्वादितिनेदृशोपस्थितिमादायातिव्या
प्तिप्रसक्तिरित्याशंकां निराकरोति विरोधिव्याप्त्यादिविषयत्वलक्षणयोग्यताशालिन्या इति. जनकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्व
रूपयोग्यतानात्र विवक्षिता किंतु जनकतावच्छेदककोटिप्रविष्टविषयतारूपैवेतिभावः। अथवाऽप्रामाण्यग्रहाभावो नानुमितिजनकताव
च्छेदकोपि तु स्वातंत्र्येण जनक एवेत्यभिप्रायेणेत्तत्. कार्यप्रतिरोधानुधावनमिति. तथा चाप्रामाण्यग्रहाभावविशिष्टविरोधिपरामर्शस्यै
वानुमितिप्रतिबंधकतया ग्रहे तत्प्रामाण्यकविरोधिपरामर्शस्य कार्याप्रतिरोधकत्वान्नोक्तस्थलेतिप्रसंगः। पूर्वपूर्वाप्रामाण्यज्ञाना
स्कं दृत विरोधिपरामर्शस्याग्रहात्तदप्रामाण्यकबाधादिबुद्धिरूपत्वेन तत्प्रतिरुद्धकार्यकत्वमपि दुर्वारमिति यथाश्रुतेतिव्याप्तिरस्त्येव. न
थापि विरोध्यनुमितिजनकतावच्छेदकरूपस्य कार्यप्रतिरोधप्रयोजकतावच्छेदकत्वाविवक्षणे नातिव्याप्तिर्वारणीया. न च यत्र विरोधि १३०
परामर्शानंतरक्षणे तद्विषयकाप्रामाण्यग्रहो जायते तत्र पूर्वक्षणेऽप्रामाण्यग्रहाभावविशिष्टतज्ज्ञानरूपप्रतिबंधकसत्वेन तत्क्षणे
कार्यानुत्पादात्तत्क्षणे सत्प्रतिपक्षत्वं दुर्वारमेवेति वाच्यं. यत्कालीनोपस्थित्याग्रिमक्षणे यस्य कार्यानुत्पादः स तदा सत्प्रतिपक्ष इति विवक्ष

यातिप्रसंगवारणात्· उपाध्यायपरीक्षासमानपदं सार्थकयितुं तदर्थमाह समानत्वं चेति· अगृहीताप्रामाण्यकेति· स्वविषयकाप्रामाण्यग्रहाभाव
विशिष्टेत्यर्थः। अथागृहीताप्रामाण्यकत्वं शरीरे ऽन्वयव्याप्त्यंशे व्यतिरेकव्याप्त्यंशे च यदप्रामाण्यं तद्ग्रहाभावविशिष्टत्वं निवेश्यं· तत्र व्याप्त्यंशे ऽप्रामा
ण्यग्रहसत्त्वे तत्तद्व्याप्त्यवगाहिपरामर्शस्य सत्प्रतिपक्षत्वाप्रयोजकत्वात् तथा चान्वयव्यतिरेकव्याप्त्योरेकतरविषयकपरामर्शदशायां अन्य
तरव्याप्त्यंशे ऽप्रामाण्यग्रहसत्त्वे सत्प्रतिपक्षता न स्यात्· न च स्वयोग्यकानुमितिविरोधिग्रहत्वेनाप्रामाण्यग्रहद्वयमनुगमय्य तदभावविशि
शिष्टत्वं निवेशनीयं· विरोधित्वं च समानविशेष्यकत्वावच्छिन्नं ग्राह्यं तेन विरोधिपरामर्शद्वयाद्वृत्तिरिति वाच्यं· एवं सति तादृशव्याप्ति
द्वयविषयकसमूहालंबनपरामर्शे एकतरांशे ऽप्रामाण्यग्रहसत्त्वे सत्प्रतिपक्षत्वानुपपत्तेरिति चेन्न· स्वीयपक्षे किंचिद्द्वयप्रयोज्यानु
मितिप्रतिबंधकज्ञानसामान्याभावस्य निवेशनीयत्वात्· विरोधित्वं च विरोधिपरामर्शाद्व्यावृत्तं ग्राह्यं· समूहालंबनपरामर्शस्थले तादृशव्या
प्त्यंशे ऽप्रामाण्यज्ञानं नास्ति तादृशव्याप्तिविषयताप्रयोज्यानुमितिविरोधिज्ञानसामान्याभावस्य सत्त्वान्न तत्र सत्प्रतिपक्षत्वानुपपत्तिरिति· सा
ध्यसिद्ध्योपाधिकत्वं· प्रकृतसाध्यानुमितियोग्यत्वं· योग्यत्वं चाप्रामाण्यज्ञानास्कंदितस्यापि परामर्शस्याप्रामाण्यग्रहाभावस्य तत्सहकारित्वा
दिति नागृहीताप्रामाण्यकत्ववैयर्थ्यं· असति· अविद्यमाने· परामर्शे· स्वविषयकपरामर्शे· स्वस्य सत्प्रतिपक्षव्यवहारविरहात्· न चासतिस

हे० ग०
१३८
138

तिवागृहीताप्रामाण्यकेप्रकृतसाध्यानुमापकपरामर्शेऽप्रामाण्यज्ञानाभावसहकृतपरामर्शरूपकारणाविरहादेवानुमितिविरहोनविरोधिपरामर्श
प्रयुक्त इतिसमानत्वानिवेशेपिनातिप्रसंगावकाश इतिवाच्यं· तत्रोभयोरेवकारणाभावतयाविनिगमनाविरहेणकार्याभावप्रयोजकतायाउभयोरत्वात्·
विरोधिपरामर्शमात्रप्रयुक्तत्वस्यप्रयोजनविरहेणानिवेशात· यत्रविरोधिपरामर्शेबाधनिश्चयश्चवर्त्ततेतत्रापिसत्प्रतिपक्षितत्वस्येष्टत्वात· मिश्रो
क्तसमानपदव्यावृत्तिंहृषयितुमुपन्यस्यतियत्त्विति· प्रामाण्यानिर्णयेन· स्वविषयकप्रामाण्यनिश्चयेन· एतच्चबाधकताप्रयोजकाधिकबलतायां
हेतुः बाधकस्य· विरोध्यनुमित्युपधायकस्य· निश्चितप्रामाण्यकपरामर्शजन्यानुमितावनिश्चितप्रामाण्यकविरोधिपरामर्शोनप्रतिबंधक इत्यभि
मानः समानेतीति· समानत्वंचविरोधिबोधानुपधायकत्वं· विरोधिबोधाव्यवहितप्राक्क्षणविशिष्टत्वाभावइतियावत्· तत्प्रतिरुद्धकार्यकत्वंच·
तदभावातिरिक्तसकलप्रकृतसाध्यकानुमितिकारणसमवधानकालावच्छिन्नत्वंतत्प्रयुक्तकार्यानुपधायकत्वं· सकलकारणानिवेशादुभयपरामर्श
सत्वेबाधेनहीनबलस्यहेतोर्नसत्प्रतिपक्षत्वं· कार्यप्रतिरोधानिवेशाच्चस्वपरामर्शेप्रामाण्यनिश्चयेनाधिकबलेहेतावतिव्याप्तिवारणायेवेतिबोध्यं·
प्रतिहेतोः स्वसाध्यबाधेनहीनबलतादशायांप्रकृतहेतोः सत्प्रतिपक्षतावारणायविरोधिपरामर्शेपिप्रकृतहेतुपरामर्शाभावातिरिक्तसकलका १३८
रणसमवहितत्वंनिवेश्यं· वस्तुतोमिश्रमतेऽनुमितौनविरोधिपरामर्शमात्रस्यविरोधित्वंकिंतुविरोध्यनुमितिसामग्र्याएव· तथाचेतरकारणासम

वह्नित्वस्यपरामर्शस्यकार्यप्रतिरोधकतयाविरोधिपरामर्शेनेतरकारणसमवहितत्वंविशेषणंदेयं।उभयपरामर्शेऽप्रामाण्यग्रहसत्वेएकत्रप्रामाण्यनिश्चयेपितस्या
नुमितिजनकत्वासिध्याविरोधिपरामर्शस्यसामग्रीविधयास्वातंत्र्येणवाविरोधितायांनप्रतिबध्यानुमितिजनकपरामर्शेऽप्रामाण्यग्रहस्योत्तेजकत्वमित्याशयेना
हव्यभिचारेणेति।उक्तस्थलेविरोध्यनुमित्युत्पत्तेस्तत्रप्रकृतसाध्यानुमापकपरामर्शाभावरूपकारणस्यव्यभिचारप्रसंगेनेत्यर्थः।अबलत्वात्।प्रकृतपरामर्शेऽप्रा
माण्यग्रहमंतरेणोक्तस्थलेऽनुमित्यनुपधायकत्वात्।तथाचसत्प्रतिपक्षत्वमिष्टमेवेतिभावः।अथवाव्यभिचारेणतेज्जनकज्ञानेप्रामाण्यानिश्चयंविनापिअनु
मित्युत्पत्त्याजनकज्ञानेप्रामाण्यग्रहस्याबलत्वात्।अनुमितिसामग्र्यघटकत्वात्।तथाचयत्रनप्रकृतपरामर्शेऽप्रामाण्यग्रहःकिंतुविरोधिपरामर्शएवतत्रापिप्रकृ
तपरामर्शेऽप्रामाण्यग्रहासत्वेकोटिद्वयानुमितिसामग्र्याअक्षतत्वात्परस्परविरोधेननैकस्याप्यनुमितिरितिसत्प्रतिपक्षत्वमिष्टमेवेतिभावः।नन्वेकत्रप्रामा
ण्यग्रहदशायामेवकोद्यनुमितेरानुभविकतयातस्यबलत्वमावश्यकमित्यतआह।अन्यत्रेति।परामर्शांतरइत्यर्थः।तदुपयोगात्।प्रामाण्यग्रहस्यानुमित्युत्पादक
त्वात्।बलपदस्याविवक्षितार्थकत्वेपिसमानपदस्यनिरुक्तार्थतात्पर्यग्राहकतयाबलपदोपादानंसार्थकयतिबलपदेति।लिंगपदोपादानेवैयर्थ्यशंकांपरिह
रतिलिंगपदेति।स्वीयलिंगत्वोपाधिकइति।स्वनिष्ठप्रकृतसाध्यानुमापकतावच्छेदकविषयताविशेषरूपगमकतानिर्वाहकेत्यर्थः।आत्मादेरिति।अन्यथातस्यापि
धूमलिंगकवह्न्यनुमित्युपधायिकपरामर्शकालीनवह्न्यभावाद्यनुमापकपरामर्शप्रतिरुद्धवह्न्यनुमित्यात्मककार्यकत्वसत्वेनधूमादेरिवसत्प्रतिपक्षितत्वापत्तिरितिभा
वः।नचप्रतिरुद्धकार्यत्वंप्रतिरुद्धकार्यकपरामर्शविषयत्वंतच्चनात्मादेरितिनातिप्रसंगइतिवाच्यं।आत्मादेरपिप्रतिरुद्धकार्यकसमूहालंबनादिरूपधूमादि

हे०गा० परामर्शविषयत्वसंभवात्· प्रतिरुद्धकार्यकत्वमित्यनेन प्रतिरुद्धकार्यकपरामर्शविषयत्वमवश्यमेवाविवक्षणीयं· अनुमितेर्हेतुकार्यत्वाभावात्· तथा च तादृशवि
१३९ षयतायां प्रकृतानुमितिजनकतावच्छेदकत्वनिवेशनेनैवोपपत्तेः विरोधिपरामर्शस्य निरुक्तप्रकृतानुमितिजनकतावच्छेदकविषयताकपरामर्शकालीनत्वनिवेशन
मनुचितमित्याशयेन तथैव निष्कृष्टार्थमाह विरोधिपरामर्शेति· प्रकृतानुमितिविरोध्यनुमितियोग्यपरामर्शप्रयुक्ताग्रिमक्षणावच्छिन्नानुत्पादप्रतियोगिप्र
कृतानुमितिजनकतावच्छेदकीभूतपरामर्शीयविषयताविशेषविशिष्टत्वमित्यर्थः। अगृहीताप्रामाण्यकपरामर्शत्वेनानुमितिजनकतामते जनकतावच्छेदकतापर्याप्त्य
धिकरणधर्मवत्त्वरूपयोग्यतानगृहीताप्रामाण्यकपरामर्शस्येति कार्यप्रतिरोधनिवेशमन्तरेणैवोपपत्त्या तं परित्यजति· अगृहीताप्रामाण्यकेति· बाधोपस्थिति स
मर्थेति· साध्यवत्ताज्ञानप्रतिबंधकत्वे सति तत्प्रतिबध्यायानुमितिस्वयोग्येत्यर्थः। साध्यवत्ताधीप्रतिबध्यत्वनिवेशात् साध्याभावव्याप्यानुमितिसमर्थपरामर्शका
लेनातिप्रसंगः। तत्कालीनत्वं चैककालावच्छिन्नैकात्मवृत्तित्वसंबंधेन तद्विशिष्टत्वं· तेन व्यधिकरणपरामर्शमादाय नातिप्रसंगः। यद्विचार्यमाणेति· अनुमितेः
प्रामाणिकीत्यत्र न च सत्प्रतिपक्षत्वमित्यत्र च यद्विचेत्यस्य संबंधः। तदभावव्याप्यवत्तानिश्चयानन्तरमिव तादृशनिश्चयक्षणेपि नानुमितिर्जायते· तादृशनिश्च
यस्य बाधनिश्चयवत्स्वोत्पत्तिक्षणेपि कार्यमात्रविरोधित्वात्· तत्रानुमितेः प्रामाणिकत्वे तादृशानुमित्युत्पादक्षणे सत्प्रतिपक्षतायामपि न क्षतिः। तदग्रिमक्ष १३९
णे विरोधिपरामर्शवशादप्यनुमितिप्रतिरोधादित्युभयत्राविवादप्रदर्शनार्थं तदभिधानं· कार्यप्रतिरोधोवश्यमुपादेय इति· स्वातंत्र्येण प्रकृतसाध्यसिद्ध्यौपयिक
परामर्शस्य जन्यकार्याभावविशिष्टत्वरूपं प्रतिरुद्धकार्यत्वं अगृहीताप्रामाण्यकत्वेनानुमितिहेतुतामतेपि निवेश्यमित्यर्थः। अजनितविरोधिबोधत्वेनेति·

139

स्वजन्याविरोध्यनुमितिसमभावावविशिष्टत्वेनेत्यर्थः। विशेषणीयइति· तेन तत्रैव विरोधिवह्निसाध्यकपरामर्शेनिवह्न्यभावसाध्यकहेतोर्नसत्प्रतिपक्षितत्वमितिशेषः। अ
त एव· उक्तस्थलेवह्न्यभावसाध्यकहेतोःसत्प्रतिपक्षत्ववारणानुरोधादेव· स्वविरोधिबोधकान्येतीति· निरुक्तार्थकमितिशेषः। यथाश्रुतशब्दतो गमकतोप
स्थितरूपविरोधिबोधकान्यत्वं लभ्यते ननुज्ञायमानपदोपस्थाप्यज्ञाने· तथाविवक्षणेच यादृशव्याप्त्यादिमत्तायाज्ञानेनप्रकृतसाध्यकपरामर्शशून्यस्य
पुरुषांतरस्यविरोध्यनुमितिर्जनिताप्रकृतसाध्यकपरामर्शसमवहिततादृशव्याप्त्यादिविषयकज्ञानांतरस्यापिसत्प्रतिपक्षितत्वप्रयोजकत्वानुपपत्ति
रतःफलतोज्ञानविशेषणमिति उक्तानुमितेरप्रामाणिकत्वेपितदानींसत्प्रतिपक्षतोपगमेपिवाधिमलक्षणेविरोधिबोधकान्यत्वस्यनोक्तव्यावृ
त्तिसंगतिरतस्तन्मतेव्यावृत्त्यंतरमाहकेस्येति· तद्वारणाय· अनुमित्युपधायकपरामर्शस्यसत्प्रतिपक्षितत्वप्रयोजकतावारणाय· ततः· विरोधिबो
धकान्यत्वं· स्वजन्यविरोधिबोधाव्यवहितप्राक्क्षणाविशिष्टयत्किंचिदन्यत्वात्मकं स्वनिष्ठतादृशक्षणवैशिष्ट्यशून्यत्वात्मकंवा· नन्वेवमपियत्रप्रतिहेतुपरा
मर्शएवविघटितेन तु प्रकृतहेतुपरामर्शः। अन्यतएवकुतश्चित्प्रतिबंधात्तत्तदग्रिमक्षणेविरोध्यनुमितिस्तत्राधिमलक्षणेतिप्रसंगोदुर्वारएवेत्यतआह अतिरु
द्धेति· तथाचतत्रप्रकृतहेतोर्विशेषणीभूतपरामर्शाविषयत्वाभावान्नातिप्रसंगइतिभावः। नचैवमपियत्रप्रकृतहेतुपरामर्शोगृहीताप्रामाण्यकः प्रति
हेतुपरामर्शश्चागृहीताप्रामाण्यकोपिविद्यतेप्रतिबंधकांतरवशात्तत्राग्रिमक्षणेविरोध्यनुमित्यनुत्पादस्तत्रातिप्रसंगोदुर्वारएव· प्रकृतहेतुपरामर्शे

गदहिताप्रामाण्यकत्वस्य तन्नियतसाध्यसिद्धियोग्यतायावानिवेशे प्रतिहेतुपरामर्शे विरोधिबोधकान्येसस्य वैयर्थ्यमिति वाच्यं· एतन्निवेशालाभायैव विरोधि

हे०ग०
१४०
140

बोधकान्येस्य स्योपादानात्· वस्तुतस्तु· विरोधिबोधकान्यत्वं· प्रकृतहेतुपरामर्शप्रतिरुद्धकार्यकत्वरूपं प्रतिहेतुपरामर्शविशेषणं· गदहिताप्रामाण्यकप्रकृ

तहेतुपरामर्शाच्च न प्रतिहेतुपरामर्शकार्यप्रतिरोध इति तादृशपरामर्शदशायां नातिप्रसंगः। मूले एकदेशस्योत्पन्नयोरिति शेषः। अविरलेन क्रमेणोत्पन्नयो

रित्यर्थकं निरंतरयोर्वेति मूलमाक्षिपति न चेत्यादिना· साधकमानं· साध्यनिश्चयः। विरोधिपरामर्शानंतरमपि यदि साधकमानाद्वशेनानुमितिर्जायते

तदा तदनुरोधेन सत्प्रतिपक्षस्य दोषतानायातिरस्य तत्क्षणमिति· क्षणेकमित्यर्थः। मूले ज्ञातयोः ज्ञानयोः प्रतिपक्षत्वात्· परस्परकार्यप्रतिरोधकत्वात्· युगप

दिति· यौगपद्यमेककालवृत्तित्वं न तु समनियतं· द्वितीयपक्षासंग्राहकत्वात्· परामर्शद्वयसंवलनस्य स्वपरसाधारणत्वेपि परार्थस्थले व्याप्तिपक्षधर्मता

भंगमुपेक्ष्य सत्प्रतिपक्षोद्भावने अप्रतिषिद्धत्वेन प्रकृतहेतौ व्याप्तिपक्षधर्मतयोः प्रतिवाद्यनुमतत्वग्रहेण प्रमितत्वग्रहान्न द्वयोस्तुल्यबलत्वमिसाक्षेपानुद्भारो

तो भावं प्रस्यति दीधितावयं भाव इति· आधिक्यप्रसंगादिति· हेतुद्वयप्रयोगे इव दोषद्वयोद्भावनेप्याधिक्यादिति भावः। यथाकाममित्यनेनोद्भावने विनिगमनावि १४०

रहाशंका निराकृता· व्याप्याद्यभ्युपगमः व्याप्याद्यः प्रतिवाद्यनुमतत्वसिद्धिः। अप्रतिषिद्धत्वस्याभावानुद्भावनरूपस्यान्यथासिद्धतयाऽनुमत्यना

क्षेपकत्वादिति भावः। मूले ऽप्यात्मकतयेति· साध्यतदभावयोरेकतरवत्वेऽपरानाधिकरणत्वनियमेनेत्यर्थः। व्याप्तीति। एकत्र हेत्वोरन्यतरत्र· स्वस्वसाध्यनि

रूपितव्याप्तिपक्षधर्मतयोरन्यतरभंगआवश्यकइतिसएवान्यतरत्वेनोभयत्रावधारितो विशिष्यसंदिग्धो दोषआस्तां किंप्रकरणसमस्य दोषत्वयेत्यर्थः।
साध्यतदभावव्याप्ययोरेकधर्मिणि सत्वमनुपपन्नं· धर्मिद्वये एकतरव्याप्यभावं तदा कल्पयति यदि व्याप्यभावं विना तन्नोपपद्यते इत्यवधारयितुं शक्य
ते तदेव नोभयत्र व्याप्तिसत्वेपि साध्यतदभावौ यद्यविरुद्धौ स्यातां तदोभयत्र पक्षधर्मता निर्वहतीति प्रतिसंधानेन तद्विघटनादिति सामान्यतोपि न व्याप्या
दिभंगावधारणमिति कथमज्ञायमानस्य दोषत्वे साशंकते नूचतयोरिति· साध्यतदभाववयोरविरोधग्रहदशायामनुमितिप्रतिरोधान्न सत्प्रतिपक्षतापि
तु विरोधावधारणदशायामेव· तथा चोक्तान्यथासिद्धिसंभवेन अविरहादनुपपत्त्यवधारणं न उद्घटमित्याह अविरोध इति· प्रतिरुद्धत्वस्य कार्यानुत्पादस्याहे
पतया प्रतिरुद्धत्वे स्यादित्यथाश्रुतमूलासंगतिरतो व्याचष्टे प्रतिरुद्धत्वेतीति· एकत्र धर्मिणि मिथोविरुद्धयोः साध्यतदभावव्याप्ययोर्व्याप्यत्वेन ज्ञानं य
दि निश्चयरूपं स्यात्तदा परस्परप्रतिबंधेन नोत्पद्यत एवातो व्याप्त्यंशे पक्षधर्मतांशे वा संशयरूपमेव तत्· तथा च कारणीभूतनिश्चयाभावादेवानुमित्यनु
वलात् त्पादो न तु सत्प्रतिपक्षतावलान् इत्याक्षेपे उभयोरेकत्रनिश्चयानंतरमित्यादिना अविरोधिद्वयव्याप्यवत्तानिश्चयस्य व्याप्त्यादिसंशयोपजीव्यत्वाभिधानेन
संगच्छते तादृशानिश्चयस्यैवानुपपादितत्वादतो भावमाह परस्परेति· साध्यतदभावव्याप्यत्वं हि हेत्वोः साध्याभावसाध्ययोरेव विरोधः न तु परस्परं तयोः।
परस्परविरुद्धत्वेन ज्ञातयोरेव नैकदा निश्चय इति तदाह परस्परव्यापकविरुद्धत्वेन ग्रहेपि हेत्वोरेकत्र निश्चयः संभवत्येवेत्यर्थः। दूषकताबीजमित्यादिग्रंथ

हे० ग० स्य दूषकत्वं· निग्रहप्रयोजकत्वं· दुष्टत्वमिति यावत्· इत्येतादृशार्थपर्यालोचनया विरोधिपरामर्शप्रतिबंधेनानुमित्यजनकत्वं सत्प्रतिपक्षस्थले हेतोर्दुष्टता
१४१ प्रयोजकं न तु निर्णयाजनकत्वमात्रं· विरोधिपरामर्शशून्यदशायामपि कारणाविरहेणानुमित्यजनकतया सद्धेतोर्दुष्टतापत्तेः। नापि विरोधिपरामर्शक्षा
141 प्यमानो व्याप्तिपक्षधर्मताविरहः। सद्धेतौ तदसत्वे न विरोधिपरामर्शसंवलनदशायामपि तस्य दुष्टतानुपपत्तेः। विरोधिपरामर्शप्रयुक्तव्याप्तिभंगज्ञानं भ्र
मप्रमासाधारणं वा सद्धेतुसाधारणदुष्टताप्रयोजकमित्युभयोऽनिस्तदोषानभ्युपगंतृमतेन संभवतीति तन्मन्यथा व्याचष्टे विरोधीत्यादिना· समानबले
सामग्रीप्रतिबंधेन निर्णयाजनकत्वमिति मूले सामग्रीपदं विरोधिपरामर्शपरं प्रतिबंधपदं नियमपरं· विशेषणे तृतीया· निर्णयाजनकत्वमनु
मित्यनुत्पादः। तथा च विरोधिपरामर्शनियतोऽनुमित्यनुत्पादः इति समुदायार्थः। नियमश्च व्यापकत्वं इत्याशयेन विरोधिपरामर्शसत्वे नियमेनानुमि
त्यनुत्पाद इति व्याख्यातं· तस्य· विरोधिपरामर्शस्य· विरोधित्वं कल्पयतीति· एवं च दूषकतापदं विरोधिपरामर्शनिष्ठप्रतिबंधकतापरं· बीजपदं च
कल्पकार्थकं बोध्यं· मूले न तु व्याप्तिपक्षधर्मताविरह इति· अत्र दूषकताबीजमित्यस्यानुषंगेण व्याप्तिपक्षधर्मताविरहेण दूषकताबीजमित्यर्थो लभ्य १४१
ते स चासंगतः। व्याप्तिपक्षधर्मताविरहस्य विरोधिपरामर्शप्रतिबंधकताकल्पकत्वरूपदूषकताबीजत्वाप्रसक्तेः। अतो व्याप्तिपक्षधर्मताविरहस्य
नंतरं विरोधिपरामर्शकालीनानुमित्यनुत्पादकल्प्यप्रतिबंधकताकं इति पूरणीयमित्याशयेन व्याचष्टे नात्विति· व्याप्त्यादिविरहस्य स्वरूपसतो दोष

त्वाप्रसक्तेरन्यज्ञाप्यमानस्य तथात्वे च विरोधिपरामर्शानुपयोगितया तदसंवलनदशायामपि सत्प्रतिपक्षतापत्तिरतो न विरोधिनूतनरं तेन ज्ञाप्यमा
न इति स्फुरणीयमभिप्रायेण व्याचष्टे। तेनेति· सद्धेतावपि· व्याप्तिपक्षधर्मताविरहेऽप्यन्योऽपि· एतादृशमूलग्रन्थिकान्तरं पूरयति तस्येति· विरोधिपरा
मर्शस्येत्यर्थः। सत्प्रतिपक्षत्वादिति मूलस्य व्याख्या· अनुमितिविरोधित्वादिति· दूषकत्वं विरोधिपरामर्शस्यानुमितिविरोधित्वं· एतन्मते तस्य दूषकत्वा
द्याकारमतिनिर्भरस्य सूचकतया व्याचष्टे वाकार इति· अनुमितिप्रतिरोधेन· अनुमितेरनुत्पादानुरोधेन· विरोधिपरामर्शस्य तत्त्वात्· साक्षाद्धेत्वप्रतिबं
धकत्वात्· अन्यथा व्याप्तिभंगज्ञानस्योदीच्य तया साक्षादनुमितेर्विरोधितया च विरोधिपरामर्शसंवलितपरामर्शात्प्रथममनुमितिर्जन्येत ए
व बाधकाभावादिति भावः। परंपरया व्याप्तिज्ञानविरोधित्वं न हेत्वाभासतायामुपयुज्यत इत्याह परेति· प्रथमपक्षे विरोध्यनुमितिसामग्र्या अ
नुमितिविरोधित्वे प्रत्यक्षप्रतिबंधकत्वमपि तस्याः स्यात्· विरोधिज्ञानसामग्रीत्वाविशेषादित्याशंक्य चक्षुरादेश्चेत्यादि· प्रथमवतार्य फलानु
रोधेन प्रत्यक्षसामग्र्या बलवत्त्वमित्यर्थकतया व्याख्यानमयुक्तं· भिन्नविषयेऽनुमितिसामग्र्याः प्रत्यक्षसामग्रीतो बलवत्त्वादत एकत्रेत्यादि
पक्ष एव व्याप्तिभंगद्वारा व्याप्तिसापेक्षप्रमाणए एव दूषकतासंभवतीति चक्षुरादेरतथाभूततया तत्प्रतिरोधकत्वं विरोधिपरामर्शस्य न स्या
दित्याशंकया चक्षुरादेश्चेति फक्किकामवतार्य इष्टापत्तिपरतया मिश्रैर्व्याख्यातत्वात्· तत्र विरोधिपरामर्शस्य लौकिकचाक्षुषप्रति

दृ०गा० वंधकत्वेपिउपनीतभानेजननीयेचक्षुरादेःशब्दस्यचप्रतिरोधकताप्यांकथंतात्याआनिवृत्तेःस्वयंविशिष्टबुद्धौतदभावव्याप्यवत्ता
बुद्धेःसाक्षात्प्रतिवंधकतयाहृषकत्वेनिर्भरस्यदर्शितत्वात्ताहशप्रतिवंधकत्वानुपपत्तिशंकयैवताहशमूलमवतारयतितन्विति·
१४२ विरोधिपरामर्शः।तद्विपरीतव्याप्यवत्तानिर्णयरूपः।विपरीतनिर्णयविरोधी·तद्विशिष्टज्ञानविरोधी·विशेषदर्शने·पीतत्वाभावव्याप्य
142 वत्वादिनिश्चयेचक्षुरादेश्चेतिचकारस्यानुक्तानुमानशब्दसमुच्चायकतानसंभवतितस्यानुमानप्रतिरोध्यत्वादतआहचस्वयर्थइति·ना
नुमानेनप्रतिरोधइतिमूलस्यदोषविशेषाधीनज्ञानेजननीयेइत्यादिः।तदुपस्थितावपीति·विरोधिपरामर्शसत्वेपीत्यर्थः।तस्य·दोषा
दिसमवहितचक्षुरादेः।अधिकबलत्वात्·अधिकवलत्वापगमात्·अप्रतिवध्यफलकत्वापगमादितियावत्·तथाचदोषविशेषाधजन्यत्वं·
साक्षात्कारित्वव्यंजकदोषविशेषजन्यज्ञानसाधारणविषयताविशेषशून्यत्वंवाविरोधिपरामर्शप्रतिवध्यतावच्छेदककोटावधि
कंफलंवलेनविशेषणीयमितिभावः।एवंविरोधिभानसामग्र्यानिश्चयविरोधित्वे·यद्यपिविरोधिपरामर्शस्यतदभावव्याप्यवत्ता १४२
ज्ञानविधयैवशिरोमणिमतेप्रतिवंधकत्वं·तन्मतेमूलस्यसामग्रीपदेनापिसाध्याभावव्याप्यवत्तापरामर्शस्यविवक्षणीयत्वात्·तथा
पिसामग्रीपदस्ययथाश्रुतपरत्वाभिमानेनेयंशंका·वादिवाक्यमात्रस्येत्यत्रमात्रपदेनसाध्याभावबोधकानुमानापेक्षाव्यवच्छेदः।प्रतिरोध

कत्वेन प्रतिरोधकत्वप्रसंगेन अनुमानमात्रोच्छेदः। परार्थानुमानमात्रोच्छेदः। न्यूनबलत्वे अनाप्तोक्ततया निश्चितत्वे लक्षणायोगः। प्रतिरोधप्रयोज
कसमानबलत्वायोगः। समानबलत्वेनाप्तोक्ततया निश्चितत्वे प्रतिरोध इष्ट एवेति शेषः। अधिकबलत्वे आप्तोक्ततया निश्चितत्वे शो चानुमानवत् शो चानुमा
नस्येव तेन विरोधिबोधकशब्देन बाधः। विरोधिनिश्चयजननं परार्थस्थले मध्यस्थस्य पक्षे साध्यमिव साध्यतदभावग्राहकमानयोराभासत्वसंदिग्धं ननु कु
त्राप्यनाभासत्वमाभासत्वं वा निश्चितं प्रमाणान्तरेण तन्निश्चये साध्यस्यापि प्रमाणान्तरेण निश्चयसंभवाद्विवादपर्यवसानापत्तेरिति समानबलतया
प्रतिवादिशब्दः प्रतिसंध्यादेवानुमानामिसाहागृह्यमाणेति दीधितौ तद्दशिति तर्हि कथं प्रतिरोधकतया कथायां प्रत्यक्षादेरुपन्यासः इत्यन्वयः। अनुमा
न एव तादृशाबलसत्वादिति भावः। मूले प्रतिरोधः। प्रतिरोधकतया कथायां प्रत्यक्षादेरुपन्यासः दीधितावत्रेति व्याप्तिपक्षधर्मताभ्यां ज्ञायमानत्व
रूपं लिंगभावं पुरस्कृत्य प्रत्यक्षशब्दयोः प्रतिरोधकतयाऽनुपन्यसनीयत्वे इत्यर्थः। मूले तदुपन्यासानर्हत्वादिति लिंगभावानापन्नप्रमाणस्यानुपयु
क्तोपन्यासकत्वादित्यर्थः। हेत्वनुपूरणेन तदुपन्यासानुपयोगित्वं व्यवस्थापयतीति दीधितौ प्रत्यक्षस्येति स्वरूपसत्तयैव स्वज्ञानमनपेक्ष्यैव बोधकत्वा
दिति तथा चोपन्यासस्य परज्ञानमेव फलं प्रत्यक्षप्रमाणस्य च यदि ज्ञानमेवानुपयुक्तं तदा क उपन्यासोपयोग इति भावः। ननु प्रत्यक्षस्य ज्ञानान
पेक्षस्य बोधकतया तदुपन्यासस्याविरोधिज्ञानसामग्र्यसंपादकत्वेप्यादिपदग्राह्यशब्दस्य ज्ञातस्यैव बोधकतया तदुपन्यासस्य विरोधिज्ञानसामग्री

हे० ग०
१४३
143

संपादकतयोपयोगित्वं दुर्वारमेवेत्यत आह विरोधिवाक्यमात्रस्येति· विरोधिवाक्यज्ञानमात्रस्येत्यर्थः। मात्रपदेन कारणांतरसाहित्यव्यवच्छेदः। अविरोधित्वादिति·
तन्मात्रस्य विरोधिबोधसामग्रीत्वविरहादिति भावः। तथापि कारणांतरसहितज्ञानस्यैव प्रतिरोधोपयोगित्वे ज्ञानपदसार्थक्यमित्यत आह बोध्येति· तथा
च व्याप्यवत्तापरामर्शदशायां विरोधिवाक्यज्ञानादिसत्वेपि तदभावव्याप्यवत्तानिश्चयप्रभावघटितशाब्दसामग्र्याः कथंचिदप्यसंभवेन लिंगभावानाप
न्नशाब्दप्रमाणोपन्यासो न विरोधिज्ञानसामग्रीं संपादयतीति न कश्चिदुपयोग इति भावः। इदमुपलक्षणं· पक्षे साध्यं नास्तीति वाक्यस्यानुभवविशेषप्रकारे
णैव ज्ञानं पक्षे साध्याभाववत्तावगाहि विरोधिबोधसामग्रीघटकं ताद्दशं च ज्ञानं प्रत्यक्षात्मकं ताद्दशवाक्यप्रयोगादेव संपद्यते न तु साध्याभावप्रमापकशब्द
विषयः पक्षस्तथाकारकतदुपन्यासादिति न कथंचिदपि ताद्दशोपन्यासस्य प्रतिरोधकत्वेत्यपि बोध्यं· मूले एकैकमिति· प्रत्येकं हेतुद्वयमिति तल्लिंगतावच्छेदका
वच्छिन्नं· सत्प्रतिपक्षं· सत्प्रतिपक्षविधया उक्तव्यवहारविषयः। ननु विशिष्टं· हेतुमतिहेतुसाधारणरूपावच्छिन्नं· ताद्दशं च न संशायकमिति· संशायकता
या उद्भिवीजत्वे ताद्दशा उक्तव्यवहारानुपपत्तिरित्यर्थः। विरोधिभानसामग्र्याः संशयविरोधित्वे संशयमात्रोच्छेदप्रसंग इति प्रकरणसमो विरोधिभानसाम १४३
ग्रीविधया संशयरूपामनुमितिं मा प्रतिरौत्सीत· विरोधिविषयकत्वेन बाधवत्तदभावव्याप्यवत्तानिश्चयस्य प्रतिबंधकत्वं दुर्वारमिति शंकते मूलेन च सं
शयरूपानानुमितिरित्यादिना· बाधबुद्धेर्विरोधिविषयत्वमात्रं न प्रतिबंधकत्वे तंत्रं किंतु निश्चितप्रामाण्यकत्वसहितविरोधिविषयत्वं· सत्प्रतिपक्ष

स्थले चोभयव्याप्यवत्ताज्ञानयोरेवप्रामाण्यानिश्चयान्नानुमितिप्रतिरोध इति समाधत्ते अधिकवत्वेनेति· ननु प्रत्यक्षे समानबलग्राह्याभाव ग्रहसामग्रीसंश
यानुपपत्त्याऽविरोधिन्यास्तां· अनुमितौ तस्याः प्रतिबंधकत्वे का क्षतिरित्यत आह साध्याभाववद्बाधस्येति· साध्याभावनिश्चयस्यैवेत्यर्थः। तत्र· अनुमितौ· नयनादेरि
त्यादिना विरोधिपरामर्शपरिग्रहः। नयनग्रहणं दृष्टांतार्थमानाभावादिति स्फुरणीयं· प्रत्येकमिति· एकैककोटिनिश्चयजनकत्वेनावधारितात्परामर्शादि
त्यर्थः। कथं संशय इति· संशयत्वावच्छिन्नं प्रति परामर्शस्य हेतुतायाः क्वाप्यक्लृप्तत्वादिति भावः। संशयत्वस्य जन्यतानवच्छेदकत्वेपि तत्तत्प्रकारकज्ञा
नत्वावच्छिन्नोत्पत्तिनियामकसामग्र्या एव सर्वत्र संशयः। प्रत्येककोटिभानसामग्र्याः संशयत्वावच्छिन्नजनकत्वं प्रत्यक्षस्थलेपि नास्तीत्याह प्रत्येकादीति·
तथा च तत्तत्प्रकारकसाध्यकानुमितित्वस्यानिश्चयसाधारणस्य तत्तत्साध्यव्याप्यवत्तापरामर्शजन्यतावच्छेदकत्वेपि तद्घटितसामग्रीसमाजात्संशयानुमि
तिर्निष्प्रत्यूहैवेति भावः। अगृहीताप्रामाण्यकत्वे सति विरोधिविषयत्वमेव बाधबुद्धेः प्रतिबंधकत्वे प्रयोजकं न तु निश्चितप्रामाण्यकत्वसहितमित्या
शयेन दूषयति· तन्नेति· रत्नकोशकारमतं परिष्कर्तुमारभते दीधितौ रत्नकोशकृतामित्यादिना· संशयत्वं यज्जन्यतावच्छेदकं तद्घटितसामग्री तत एव
संशयत्वावच्छिन्नोत्पत्तिरिति नियमेनुमितेः संशयत्वं न संभवति अनुमितिसामग्रीघटकस्य परामर्शादेः कस्यापि संशयत्वावच्छिन्नाजनकत्वादतः
संशयत्वस्य जन्यतावच्छेदकत्वाभावमूलकारोक्तं प्रतिबंदिं सूचनेन दूषयति· एकधर्मिकेति· अविरुद्धानेकप्रकारकेत्यस्य द्वंद्वपरं श्रूयमाणज्ञानत्वे

नसंबंधः। प्रकारांशे संशयत्वघटकविरुद्धत्वविपरीतविशेषणघटितधर्मस्य जन्यतावच्छेदकत्वप्रसक्तिं प्रदर्श्य धर्म्यंशे तद्घटकैकत्वविपरीतविशेष
हे०गा० णघटितस्य प्रकारांशे विशेषणानेकत्वविरुद्धैकत्वविरुद्धाविरुद्धनानात्वभेदेन भिन्नस्य तद्धर्मद्वयस्य न तथात्वापत्तिमपि सूचयति। नानाध
१५४ र्मिकेति। एकत्वस्य प्रकारांशे विरुद्धत्वाविरुद्धत्वयोर्नानापदार्थे प्रत्येकमन्वयः। न जन्यतावच्छेदकं कस्यापीति शेषः। नन्वेवं क्वचित् ज्ञाने संशय
त्वं क्वचिन्नेत्यत्र किं नियामकमित्यत आह तत्तद्धर्मिकेति। पर्वतादिधर्मिकेत्यर्थः। तत्तत्प्रकारकेति। वह्नितदभावादिप्रकारकेत्यर्थः। प्रयोजकसमाजेति।
तदवच्छिन्नो यस्तत्तन्नियामकसामग्रीसंवलनेत्यर्थः। समाजस्य पर्वतादिधर्मिकवह्न्यादिप्रकारकत्वतद्धर्मिकवह्न्यभावादिप्रकारकत्वयोर्वैशि
ष्ट्यस्य। तथा चैकमात्रकोटिभानप्रयोजकसामग्रीदशायां यज्ज्ञानं जायते तत्र तत्कोटिप्रकारकत्वविरुद्धकोट्यन्तरप्रकारकत्ववैशिष्ट्यप्रयोजकस्य तत्
कोटिप्रकारत्वप्रयोजकसामग्र्यां कोट्यन्तरप्रकारकत्वप्रयोजकसामग्रीवैशिष्ट्यस्य विरहात् विरुद्धकोट्यन्तरप्रकारकत्वविशिष्टतत्कोटिप्रकार
कज्ञानत्वरूपसंशयत्वविरहः। कोटिद्वयभानसामग्र्यां तु यज्ज्ञानं जायते तत्र तादृशप्रयोजकवैशिष्ट्यसत्त्वेन तादृशसंशयत्वमिति संशयत्वस्य जन्यता १५४
नवच्छेदकत्वेपि तन्नियमनिर्वाह इति भावः। ननु कोटिद्वयावगाहिज्ञानत्वमात्रं न संशयत्वं कोटिद्वयसमुच्चयसाधारणत्वात्। किंतु एककोट्यंशेऽपरको
टिविरोधावगाहित्वसहितं तादृशस्य कोटिद्वयभानप्रयोजकसंवलनमात्रं न नियामकं तत्सत्त्वेपि समुच्चये संशयत्वाभावात् इति संशयत्वप्र

योजकमन्यदेव किंचिदुपगंतव्यं। यतः क्वचिदेवोभयावगाहिज्ञाने संशयत्वमिति नियम इति तस्यैव कार्यतावच्छेदकं संशयत्वमावश्यकमिसत
आह क्वचिदिति उभयप्रकारक इति शेषः। तथा च विरोधभानस्य समयकोटिद्वयप्रकारकसामग्रीतिनायाऽ इत्यर्थः। तत्प्रयोजकाधीनत्वादिति। अव्याप्यवृत्ति
त्वज्ञानाभावघटित आदि विरोधभानप्रयोजककस्य सामग्र्यंतरस्य काचित्कत्वप्रयोज्यत्वादित्यर्थः। तथा च तत्संवलनस्यापि विरोधभानघटितसंश
यत्वप्रयोजकतया समुच्चयस्थले तद्विरहादेव संशयत्वविरह इति भावः। उक्तयुक्तिभिः संशयत्वस्य कार्यतावच्छेदकत्वखंडनं वक्ष्यमाणगतिमनुरुध्य। वस्तुतः सं
शयत्वस्य धर्मितावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकताया एव स्वीकरणीयतया समुच्चयस्थले यथा तत्तद्भावप्रकारकज्ञानसामग्रीद्वयसहि
तधर्मिज्ञानरूपा सामग्री संशयं जनयति। तथानुमितिस्थलेपि तादृशधर्मिज्ञानात्मकसामग्र्या संशयजनने नाकिंचिद्बाधकं। ननु मा भूत्संशयत्वं
जन्यतावच्छेदकं तथापि निश्चयत्वावच्छिन्नहेतुभूतात्परामर्शादितः कथं संशयानुमितिरित्याशंक्यानिश्चयत्वस्यापि जन्यतावच्छेदकत्वं निराकरो
ति। नीलेतरेति। यथा घटे नीलरूपवद्भेदात्मकनीलेतरत्वप्रयोजको घटे नीलोत्पादकसामग्रीविरहः घटत्वप्रयोजकं च घटत्वावच्छिन्नहेतुदंडादि
घटितसामग्रीजन्यत्वं [illegible] तत्संवलनाधीनं नीलेतरत्वघटत्वयोः संवलनमिति तदेव नीलेतरत्वविशिष्टघटत्वनियामकमिति तस्य किंचिज्जन्य
तानवच्छेदकत्वेपि कस्यचिदेव घटस्य तथात्वमिति नियमः। एवं पटादिज्ञाने घटत्वप्रकारकताविरहस्तत्पूर्वकालीनघटत्वप्रकारकत्वावच्छि

दे॰ग॰ ल्लजनकज्ञानादिघटितसामग्रीरूपतथात्वेविरहः प्रयोजकः प्रयोज्यइति॰ ज्ञानत्वप्रयोजिकातत्पूर्वकालीनसामान्यसामग्रीघटत्वप्रकारकत्वा
१४५ वच्छिन्नोत्पादकसामग्रीविरहश्चद्वयोः संवलनंघटत्वाप्रकारकत्वज्ञानत्वयोः संवलनप्रयोजकं॰ तदेवजन्यतानवच्छेदकस्यापि एकविशिष्टापर
स्यप्रयोजकं॰ एवमेकधर्मिकाविरुद्धानेकप्रकारकत्वसंवलितनानासामग्रीप्रयोज्यं॰ तद्विरहप्रयोज्यस्तद्विरहः। तत्संवलितज्ञानत्वप्रयोजकप्र
145 योज्यंतद्विशिष्टज्ञानत्वमिति यथातस्यजन्यतानवच्छेदकत्वेपिनानियमः तथा निरुक्तनिश्चयत्व स्यापीत्यर्थः। यद्यपितत्प्रयोजकसमाज
नियम्यस्यजन्यतानवच्छेदकतायांएकधर्मिकाविरुद्धनानाप्रकारकज्ञानत्वादिकमेवपूर्वंदृष्टांतीकृतंतथापितत्रसामग्रीरूपप्रयोजकसमाजनि
यम्यत्वमेवनतुसामग्र्यविरहसामग्रीसमाजनियम्यत्वं॰ निश्चयत्वंचतादृशमेवेतिप्रकृतसाम्यायदृष्टांतांतरानुसरणं॰ तत्रप्रथमेतज्जनकसा
मग्र्यभावसंवलनस्यतद्वदन्यत्वविशिष्टप्रयोजकता॰ द्वितीयेतदवच्छिन्नजनकसामग्रीविरहसंवलनस्य॰ तृतीयेतद्घटकनानाधर्मावच्छिन्नहेतुभूतना
नासामग्रीसंवलनविरहसंवलनस्येति॰ उत्तरोत्तरंनिश्चयत्वसाम्योल्लेखमिति बोध्यं॰ एवंचेति॰ संशयत्वनिश्चयत्वयोर्जन्यतानवच्छेदकत्वेचे १४५
त्यर्थः। तुल्यवलाभ्यां॰ परस्परकार्यविरोधिनीभ्यां॰ संशयरूपंभवतीति॰ तथाचसमबलप्रतिपक्षसंवलनस्यलेतुल्यवलकोटिद्वयानुमितिसाम
ग्रीभ्यांसंशयरूपानुमितिर्जन्यतएवेतिभावः। अथल्लक्षणविरोधभासकविरोधावगाहिपरामर्शघटितसामग्र्यभावाद्विरोधोनभासितुमीष्टे॰ तथाच

कथं संशय इति चेन्न· सत्प्रतिपक्षतादृशायां कोटिद्वयनिश्चयानुत्पादस्योभयवादिसिद्धतया तन्निर्वाहाय परस्परजन्यकार्ये विरोध्यनुमितिसामग्र्योः
प्रतिबंधकतापेक्षया विरोधभानप्रतिबंधकाभावसहकारेणाविरोधाविषयकस्यापि परामर्शस्य विरोधभानप्रयोजकतायाः लाघवेन कल्पनादनुप
स्थितस्य विरोधस्य प्रकारतयाभानासंभवेपि विरोधसंबंधेन एककोट्यंशे ऽपरस्य प्रकारतया एककोटिसंबंधेन इष्टसंसर्गतायां कोट्यंतरविरोधस्यावच्छेदक
तया वा भानोपगमात्· अन्यथा यत्र कोट्योर्न विरोधग्रहः न वा विरोधस्योपस्थितिर्वर्त्तते· तत्र सामग्रीसमाजात् प्रत्यक्षात्मककोटिद्वयनिश्चयस्य दुर्वारत्वा
त्। अथ यत्र कोट्योर्न विरोधग्रहः अथ च धर्मिणि विरोधसंबंधेनैककोटिविशिष्टापरकोटेर्विरोधविशिष्टसंयोगादिसंबंधेन च कोट्योर्बाधग्रहः तत्र कथं
चिदपि विरोधभानासंभवेनैकदा प्रतियोगितदभाववन्निश्चयरूपानुमितिर्जायतामिति चेत्· प्रत्यक्षस्थलेप्येषानुयोगस्तुल्यः। अथ धर्मिणि संश
यान्यतद्वत्ताज्ञानं प्रति अव्याप्यवृत्तित्वज्ञानाभावविशिष्टतद्विरोधिधर्मवत्ताज्ञानसामग्र्याः प्रतिबंधकेति दर्शितस्थले परस्परविरोधेन न तत्तदभाव
योः प्रत्यक्षनिश्चयो विप्रत्यक्षानुमित्यादिसामग्रीणां चानुगतरूपेण प्रतिबंधकताकल्पनासंभवात्· अनुमितिस्थले विरोध्यनुमितिसामग्र्याः
प्रतिबंधकत्वे कल्पनीये संशयान्यत्वं न प्रतिबध्यतावच्छेदकगर्भे निवेश्यते इति तद्धि संशयानुमितिर्वा जायतेति। अत्रार्वाचीनाः संशयत्वं न विरो
धावगाहितानियतं· तथाहि· यथा लौकिकसंनिकर्षजन्ये साक्षात्करोमीति प्रतीतिविषयताविशेषः अनुमिनोमि आपादयामि इति प्रतीतेश्चानुमि

सापसोः साध्याभावयोर्विषयताविशेषो दुरपह्नवस्तथा संदेहत्वीसमनुव्यवसायबलात्संशयेपि कोट्यंशे विलक्षणविषयतानिश्चये हे
हे०ग० वेतितत्प्रतियोगित्वमेव संशयत्वं· तस्य विरोधानवगाहिज्ञानसाधारण्येन किंचिद्बाधकं· न च तादृशप्रतीतेर्विरोधावगाहिसमानधर्मिकतत्त
१४६ दभावावगाहिज्ञानत्वावच्छिन्नतयैवोपपत्तेर्विषयताविशेषे किं मानमिति वाच्यं· क्वचित्संशये विरोधस्य सांसर्गिकविषयतायाः प्रमा
णांतररहितायाः उक्तातिप्रसंगवारणाय सामग्रीप्रतिबंधकताया अवच्छेदककल्पनामपेक्ष्य लाघवेन कोटितारव्यविलक्षणविषयताया एव क
146 ल्पयितुं युक्तत्वात्· सा च प्रकारताभेदः। तदन्यैव वा कोटिविशेष्यकसंशयसाधारण्यानुरोधात्· न च तादृशविषयतानिष्ठवैलक्षण्यं दु
र्वचं· अस्तु जेणाधेयपक्षसिद्धांतकवलितत्वादिति वाच्यं· एवं सति विषयतात्वप्रकारतात्वादीनामपि विलक्षणप्रसंगेन व्यक्ततरासामंजस्यात्· अस्तु
ताविरोधिकोट्यंतरविषयकत्वेन ज्ञाननिरूपितत्वमेव समुच्चयविषयताव्यावृत्तस्तद्विशेषः संशय एव तत्तत्कोटिविषयकत्वयोर्मिथोवच्छे
द्यावच्छेदकभावोपगमात्· तादृशविषयताशालिबुद्धौ च मणिमंत्रादिन्यायेनैव कोट्योरव्याप्यवृत्तित्वज्ञानं प्रतिबंधकं आस्थीयते· नातः
समुच्चयदशायां संशयापत्तिः। एवं कोट्यंशे औत्कटरूपसंभावनात्वमपि विषयताविशेष एवेति ध्येयं· न चैवमर्थसमाजग्रस्तरूपबाधकेन संशयत्व १४६
स्य कार्यतानवच्छेदकत्वव्यवस्थापनं दीधितिकृतो विरुध्येत· सामग्रीद्वयसमाजस्थले तत्सामग्रीप्रयोज्यकार्यतावच्छेदकद्वयसमानाधि

करण्यमात्रप्रयोजकत्वात्· कार्यतावच्छेदकविषयितयोरवच्छेद्यावच्छेदकभावादिप्रयोजकत्वासंभवेन तत्तत्समाजादवच्छेद्यावच्छेदकभावापन्न
विषयताविशेषरूपसंशयत्वानिर्वाहात्· तादृशविषयताविशेषस्य समुच्चयसाधारण्यविरहेण विरोधानवगाहिज्ञानसाधारण्येन च कोटिद्वयभान
सामग्रीसंवलनस्य विरोधभासकसामग्रीमनपेक्ष्यापेक्ष्यत्वात्तत्प्रयोजकत्वस्यासंभवदुक्तिकत्वाच्चेति वाच्यं· विरोधावगाहित्वसहितकोटिद्वयाव
गाहित्वं संशयत्वमिति प्राचीनसिद्धांतमवलंब्यापाततस्तज्जन्यतानवच्छेदकत्वाभिधानात्· अथैवमपि संशयानुमितिव्यवस्थापनमशक्यं· वि
षयताविशेषरूपसंशयत्वे परामर्शादिघटितानुमितिसामग्र्याः प्रयोजकत्वकल्पकाभावादिति चेन्न· विरोधज्ञानमनपेक्ष्य सामग्रीसमाजादेक
दैकधर्मिणि तत्तदभावोभयनिश्चयानुमित्यनुदयात्· संशयानुमितिसिद्धेः अव्याप्यवृत्तित्वज्ञानाभावसमयाहितयोः प्रत्यक्षसामग्र्योरिवानुमितिसा
मग्र्योरपि संशयत्वावच्छिन्नोत्पत्तिप्रयोजकतायाः अवर्जनीयत्वात्· न च संशयत्वाघटकीभूतायां निश्चयीयविषयितायां तस्याः संशयव्यावृत्तये संशयसा
मग्र्यास्तदवच्छिन्नप्रतिप्रतिबंधकत्वं कल्पनीयं· संशयसामग्रीत्वं च प्रत्यक्षानुमितिसामग्रीसाधारणं नैकमिति अव्याप्यवृत्तित्वज्ञानाभावविशिष्ट
विरोधिकोट्यनुमितिसामग्र्याः प्रतिबंधकत्वकल्पनीये ऽनुमितित्वस्यैव तत्त्वे तिबध्यतावच्छेदकत्वमुपेयते लाघवान्न तु निश्चयत्वस्येति न संशयानु
मितिसंभव इति वाच्यं। प्रत्यक्षसंशयस्य तादृशविषयताशालित्ववारणाय तदवच्छिन्नं प्रतिसंशयोपधायकताविशिष्टत्वेनैव सामग्र्याः प्रतिबं

हे० ग० धकताकल्पनात्तद्रूपस्य च संशयानुमितिसामग्रीसाधारणतया तत्प्रतिबंधकांतराकल्पनादिति वदंति· अत एव तुल्यबलसामग्रीसमाजात्प्रत्यक्षस्ये
१४७ व परोक्षस्यापि संशयस्योत्पत्तौ बाधकाभावादेव· आह स्यैव· साक्षादेव· विप्रतिपत्तिवाक्यतो जन्म यस्य एवंभूतं शाब्दबोधात्मकं संशयमपि वदंतीत्य
र्थः। ननु समानबलत्वं न्यूनाधिकबलत्वं वा सामग्र्याः कथमवधारणीयमित्यत आह फलबलकल्पनीयं चेति· सामग्रीसंबलनस्थले एकस्याः फला
147 नुत्पत्त्या न्यूनाधिकबलभावः· उभयोः फलोत्पत्त्या समबलभावोऽवधारणीय इत्यर्थः। एतदेव विशिष्योदाहरति समसामग्रीति· पीतत्वशुक्लत्वस्य तावदिति·
सविधवर्त्तिनि शंखे इति· आभ्यां विशेषणज्ञानविशेष्येंद्रियसंनिकर्षघटिततदुभयविशिष्टप्रत्यक्षसामग्रीसत्त्वं दर्शितं। दोषविशेषे· पि
त्तद्रव्यसमवधानरूपे· पीतत्वस्यैव ग्रहणादित्याग्रिमेणान्वयः। तथा च फलबलात्तथैवेत्यादि लौकिकप्रत्यक्षसामग्रीतो दोषविशेषोपनीतपीतत्वशु
क्लत्वाभावादित्याह कुसामग्र्या बलवत्त्वमिति भावः। दोषविशेषासत्त्वे उपनीतभानसामग्र्यपेक्षया लौकिकसंनिकर्षघटिताविरोधिग्रहसामग्र्या बलवत्त्वमि
त्याह असति च शुक्लत्वस्यैवेति· दोषविशेषासमवधानस्थले उपनयघटितसामग्रीद्वयस्य तुल्यबलत्वमाह दूरस्थ इति· धर्मिणो दूरस्थत्वे सति च विशेष
दर्शने विद्यमानकोटेरपि न लौकिकसामग्री दूरत्वदोषस्य विशेषादर्शनसहितस्य लौकिकधीविरोधित्वादिति· लौकिकसामग्रीविघटनाय दूरस्थत्वविशेषा १४७
दर्शनयोरनुधावनं· स्मृतयोरित्युपनयसंपादनाय· कोट्योः स्थाणुत्वतदभावयोः। विरोधदर्शनघटितसामग्र्या बलवत्त्वमाह सति चेति· सति च विशेषदर्श

नेएकस्याः गृहीतविशेषायाः कोटेरेव नयनेन ग्रहणात्· अत्र च ग्राह्यविपरीतविशेषदर्शनस्यैव प्रतिबंधकत्वं न तु सामग्र्याः इत्यवधेयं· ननु कोटिद्वयभास
कसामग्रीसमाजादेव चेत्संशयः· तदा संस्कारं प्रति निर्णयत्वेन हेतुतयापि न संशयाकारस्मरणवारणसंभवः। प्रत्येकतत्तदभावगोचरनिश्चयजन्यसंस्कार
द्वयसंवलनात्तदुत्पत्तौ बाधकाभावादित्याशंकते अथैवमिति उद्बुद्धाभ्यामिति· न चोद्बोधकस्य फलैकोन्नेयतया एककदाविरूढकोटिद्वयोद्बोधकाकल्पनान्ना
पत्तिरितिवाच्यं· नियतोद्बोधकसंबंधिवस्तुविशेषज्ञानादीनामनुगतरूपेणैव कारणतायाः क्लृप्तत्वात्· तादृशोद्बोधकद्वयसमवधानं दैवाद्यत्र तत्रैवा
पत्तिसंभवात्· अनुभवविरोधविरहे इष्टापत्तिमाह किं न स्यादिति· अनुभवविरोधस्यापि सविवादतयाह यदीति· येन· अनुभवविरोधेन· भवतेत्यनेन
परस्परसामग्रीप्रतिबंधकताकल्पनमंतरेण तावतापि संशयाकारस्मरणवारणं न संभवतीति सूचितं· बाधबुद्धेरत्यंतान्योन्याभाववत्ताधीसाधार
णविरोधिप्रकारकत्वेनैव प्रतिबंधकता· तथात्वं च विरोधिपरामर्शस्यापीति मूलोक्तसिद्धांतं दूषयितुमाशंकते अथेति· तद्विरोधित्वं तदभावव्याप्य
त्वं· स्वव्यापकतदभावकत्वरूपं स्वत्वघटितत्वेन सर्वसाधारणं इत्यतउक्तं सहानवस्थायित्वमिति· विरोधस्य विषये उपलक्षणत्वं विशेषणत्वं वेति वि
तर्क्य दूषयति यदीत्यादिना· तथा प्रतिबंधकः। पक्षतावच्छेदकादेरिति· इदंत्वाद्यवच्छिन्नहृदादिरूपपक्षविशेषणस्य हेतुत्वेनाभिमतस्य वा तादृश
स्य वस्तुगत्या वह्न्यादिविरोधिनो निर्णये भ्रमानुमितिर्निर्णयाधीना भ्रमानुमितिर्भवतीत्यर्थः। तत्र जनकज्ञानस्यैवोक्तप्रतिबंधकतावच्छेदकाकां

हे०गा०
१४८
148

तत्वादिति भावः। यद्यपि जलमयत्वादेर्विरोधानवगाहिज्ञानदशायां तत्स्वावच्छिन्नपक्षावगाहित्वात्तत्तल्लिंगिकायाश्चायं वह्निमानित्याद्यनुमितेरपि पक्षता
वच्छेदकावच्छिन्ने जलमयत्वभ्रमदशायामनुपपत्तिरस्ति तथापि जलमयोयं वह्निमानित्याद्यनुमितिस्थले प्रतिबंधकत्वे नैयत्येन तथाविधानुमितिमात्रे छेद
इत्यभिप्रायेण तावद्दूरानुसरणं· अथ विरोधित्वेनेति· निर्णयस्तथेत्यनुषज्यते· तदर्थं हे· वह्न्यभावादेर्वह्न्यादेर्विरोधायर्हे· अनुमितिप्रसंगइति· तथाचवह्न्यभा
वत्वाद्यवच्छिन्नावगाहिनिश्चयत्वेनैव बाधबुद्धेः प्रविशिष्यप्रतिबंधकताव्याप्त्या· तच्च न विरोधिपरामर्शसाधारणमितिभावः। इदमुपलक्षणं· अनुगततदधिकर
णावृत्तित्वरूपविरोधावच्छिन्नप्रकारकनिश्चयत्वेनाविरोधित्वेपि स्वव्यापकतत्सामानाधिकरण्यरूपव्याप्यवगाहिविरोधिपरामर्शस्य तद्रूपानाक्रांततया ता
दृशपरामर्शाभ्यां संशयानुमितिजनने बाधकाभावः। एवं तत्संबंधेन तदधिकरणावृत्तित्वावच्छिन्नस्य तत्संबंधानवगाहिज्ञानमेवाविरोधीतिसंबंधविशेष
निवेशस्यावश्यकतया विशेषणताविशेषादिसंसर्गकयावद्यभावावगाहिज्ञानसंबंधांतरावगाहिविरोधिपरामर्शयोर्नानुगतरूपेण प्रतिबंधकतासंभवइ
त्यपि बोध्यं· माभूद्बाधबुद्धिप्रतिबंधकतावच्छेदकरूपाक्रांतत्वं विरोधिपरामर्शस्य तथापि न संशयानुमित्यवसरः। स्थाणुत्वाभावव्याप्यकरादिमानयमित्यादि १४८
निश्चये स्थाणुत्वादिप्रत्यक्षभ्रमसंशयानुदयात्तद्विशिष्टबुद्धित्वावच्छिन्नं प्रतितदभावव्याप्यवत्तानिश्चयत्वेन प्रतिबंधकताया आवश्यकत्वादित्याशंकते अथेति· या
शुक्लत्वादीति· पीतत्वाभावादीत्यर्थः। उक्तेन· पित्तादिदूषितेन· पीतत्वादीति· शुक्लत्वाभावादीत्यर्थः। नन्वेवं संशयत्वं प्रतिबंध्यविशेषणं देयमित्याशंकामुपनी

तन्निश्चयविरोधिसंशयहं अदृश्यदूषयति सतिचेति· विशेषदर्शने· विरोधिव्याप्यदर्शने· ननु प्रथमस्य अनुरोधेन दोषविशेषाजन्यत्वं· द्वितीयानुरोधेन च लौ
किकसन्निकर्षजन्यत्वं प्रतिबध्यविशेषणं देयमित्यत आह दूरत्व इति· प्रमितस्य· करादिभ्रमात्प्राक् उद्भावकलौकिकसन्निकर्षाश्रयस्य· एतेन करादिभ्र
मदशायामपि दूरत्वादेव स्थाणुत्वाग्रह इति शंका निराकृता अयमादिरिति· तथा च लौकिकसंनिकर्षाजन्यत्वनिवेशे तत्र स्थाणुत्वादिप्रसक्षापत्तेः तन्निवे
शेन संभवतीति भावः। स्थलविशेष इति· यद्धर्मिकत्वे विशिष्टबुद्धिर्न जायते तद्धर्मिकैव विशिष्टाविशिष्टबुद्धित्वावच्छिन्नं प्रति प्रतिबंधकत्वं वाच्यमित्यर्थः।
तथा च कोट्यंतरविशेषदर्शनसहितविशेषदर्शनव्यक्तीनां प्रतिबंधकत्वाकल्पनात् संशयानुमितिर्निष्प्रत्यूहैवेति भावः। क्वचिल्लौकिकसंनिकर्षजन्यज्ञाने दूरत्वादि
सहकृततदभावव्याप्यधर्मस्य विरोधित्वेपि लौकिकसंनिकर्षाद्यजन्याविशिष्टबुद्धित्वावच्छिन्नं प्रति तदभावव्याप्यवत्तानिश्चयत्वेनानुगतप्रतिबंधकताकल्प
नमुचितं· तत्तद्व्यक्तित्वेन प्रतिबंधकत्वेन तत्प्रतिबंधकताप्रसंगात् दूरत्वादिदोषसहकृतविशेषदर्शनस्य च प्रतिबध्यतावच्छेदककोटौ लौकिकान्यत्वमनिवेश्य प्रतिबं
धकत्वांतरं कल्प्यमिति समाधत्ते अनुगतेति· दोषविशेषादीत्यादिना· लौकिकसन्निकर्षपरिग्रहः। दोषविशेषजन्यज्ञानेपि साक्षात्कारित्वव्यंजकविषयतावशेषो
पगमात् तद्भिन्नत्वं निवेश्यैव दोषविशेषजन्यलौकिकसंनिकर्षजन्यज्ञानेप्यावर्तनीये· एवं च परमेश्वरवृद्धावपि तादृशविषयतया एव स्वीकारान्नातिसाधार
ण्यं· न वाननुगतधर्मस्य प्रतिबध्यतावच्छेदकत्वे चक्षुःसंनिकर्षादिजन्यभेदानामेकत्र निवेशनीतया मिथो विशेषणविशेष्यभावे विनिगमनाविरहप्रसंगाच्चक्षः

हे०ग०
१४९
149

संयोगाद्यजन्यचाक्षुषत्वादीनां जन्यतावच्छेदकत्वापत्तिः। नचांधकारे घटचक्षुःसंयोगदशायां घटेऽपनीतभानस्य चक्षुःसंनिकर्षजन्यत्वेन प्रतिबध्यतावच्छेदका
नाक्रांततया विशेषदर्शनकालेपि तादृशोपनीतभानापत्तिश्चेति। एवमनाहार्यत्वस्यापि निवेशो बोध्यः। तेनाहार्यचाक्षुषादीनां विरोधिनिर्णयाप्रतिबध्यत्वेऽप
पत्तिः। आहार्यत्वं च स्वविषयकेच्छाव्यवहितोत्तरक्षणोत्पन्नप्रत्यक्षत्वं। विषयत्वस्वाव्यवहितोत्तरत्वैसंबंधेन×उभय×इच्छावच्छिन्नप्रत्यक्षत्वं वा। आहार्यचाक्षुषा
दौ च चाक्षुषादीच्छाया हेतुत्वोपगमान्नेच्छाविनां विरोधिनिश्चयात्तदापत्तिः। कदाचिदिति। यदि विशेषदर्शनं परिभूय यज्ज्ञानमुत्पद्यते तदधीनं स्मरणमपि
विशेषदर्शनकालेनुभूयतेत इत्यर्थः। वस्तुतस्तु विशेषदर्शनकाले पूर्वजातविरोधिविशिष्टज्ञानमेव स्मर्यते न तु तद्विषयीभूतं विशिष्टं यावद्विशेषदर्शनेनाप्रामा
ण्यं गृह्यते तथा च ज्ञानत्वमेव प्रतिबध्यतावच्छेदकं न त्वनुभवत्वं। अनुभवत्वजातेरप्रामाणिकत्वात्। स्मृतिभिन्नज्ञानत्वस्य तथात्वे गौरवात्। प्रत्यक्षत्वस्य तथात्वमा
शंकते नचेति। समाधत्ते सामान्य इति। सामान्यधर्मस्य ज्ञानत्वस्य तथात्वे बाधकाभावादित्यर्थः। ननु संशयानुमितेः संदिग्धतया ज्ञानत्वस्याविरोधिपरामर्शाभावजन्यताव
च्छेदकत्वकल्पनानसंभवति। व्यभिचारसंशयस्याविरोधित्वादित्यत आह बोध्याभावेति। शाब्दादित्यादिना उपमितिस्मृतिपरिग्रहः। तथा च ज्ञानत्वस्य तथात्वे शाब्दा १४९
दिस्थले स्वतंत्रप्रतिबंधकत्वाकल्पनेन लाघवाद्व्यभिचारसंदेहो किंचित्कर इति भावः। ननु तद्व्याप्यवत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञाने उत्तेजकत्वमावश्यकं। अन्यथा कोटि
द्वयव्याप्यदर्शनदशायां प्रत्यक्षात्मकस्यापि संशयस्योत्पादासंभवात्तदानीं संशयानुभवापलापप्रसंगादिति। सत्प्रतिपक्षसंवलनदशायामुत्तेजकसत्वेन संशयानुमि

तिनिष्प्रसूहेवेसाशंकतेअथेति॰ यावदप्रामाण्यंनगृह्यतइति॰तथाचानयोरेकतरमितिरीसासामान्यतस्तत्राप्रामाण्यग्रहेविशिष्योभयत्रैवाप्रामाण्यसंशयेनप्रत्यक्ष
संशयोभवतीतिभावः।एतदुपपादकमेवाहागृहीताप्रामाण्यस्येवेति॰ अप्रामाण्यसंशयानु अनुमितिःसंशयरूपानसंभवतीति॰अगृहीताप्रामाण्यकपरामर्शरूपत्वेकाम
स्वकारणविरहात्तत्कारणांतरस्यकल्पकाभावात्॰।मिश्रास्तु।तद्व्याप्यदर्शनस्यतदभावव्याप्यदर्शनप्रतिबंधकतायामनुमेजकत्वेपिप्रत्यक्षसंशयवदुभयव्याप्यद
र्शनान्नसंशयानुमितिरुत्पद्यतेयतोव्याप्यदर्शनमवधारणात्मकज्ञानएवहेतुः।अवधारणत्वंचानुमितौव्याप्यदर्शनजन्यप्रत्यक्षेचस्वीक्रियतेऽवधारण
द्वयसामग्रीसमाजेऽजानसंशयः।अवधारणत्वस्यसंशयव्यावृत्तत्वात्॰तत्कोट्यवधारणेतद्विरोधिकोट्यवधारणजनकविशेषदर्शनस्यप्रतिबंधकतयाविरो
धिकोटिद्वयावधारणसामग्रीसंवलनस्यासंभवात्तादृशप्रतिबध्यप्रतिबंधकभावाकल्पनेउभयकोटिव्याप्यदर्शनकालेउभयकोट्यवधारणापत्तेः।नचेष्टापत्तिः।
तत्रसंशयस्येवोत्पत्त्या अवधारयामीत्यननुभवात्॰कोटिद्वयविशेषदर्शनकालेएकविशेषदर्शनस्यापरविशेषदर्शनेनाप्रयोजकीकृतत्वाद्विशेषादर्शनद
शायांविशेषणज्ञानादिघटितयादृशसामग्रीसमाजात्प्रत्यक्षसंशयस्तादृशसामग्र्यास्तत्राप्यक्षतत्वाज्जयतिसंशयात्मकंप्रत्यक्षंअनुमितिस्तुनैवावधार
णसामग्र्यतिरिक्तसामग्रीनकल्प्यतेप्रयोजनाभावादितिनसंशयानुमितिवार्त्तेत्याहुः।तेषांचायमभिप्रायः।अवधारणत्वंननिर्णयत्वं॰विपरीतकोट्यनुपस्थि
तिकालीनविशेषदर्शनाधीननिश्चयानंतरमवधारयामीतिप्रतीत्यनुदयात्किंतत्कोटिनिश्चयत्वं।औत्कट्यंचविषयताविशेषएवान्यस्यदुर्वचत्वात्
सएवचप्रत्यक्षानुमितिसाधारणोव्याप्यदर्शनजन्यतावच्छेदकः॰विरोधिव्याप्यदर्शनप्रतिबध्यतावच्छेदकश्चेति॰ अत्रचनिश्चिनोमिअवधारयामीतिप्रतीतेः

समानविषयतयानिश्चयत्वमेवावधारणत्वं· अनभ्यासदशापन्नज्ञानादिविशेषदर्शनकालीनज्ञानेऽप्रामाण्यशंकानास्कंदनमेवविशेषः॥नि
हे० ग० श्चयत्वस्य चार्थसमाजग्रस्ततान्व्यवस्थापितेतिनदीधितिकृतोनिर्भरः॥इदंत्ववधेयं। विरोधिज्ञानदशायामाहार्यज्ञानोपपत्तयेयदिनिरुक्तमनाहा
१५० र्यत्वंप्रतिबध्यतावच्छेदककोटौनिवेश्यतेतदातस्याव्यवहितोत्तरत्वघटिततयाऽव्यवहितोत्तरत्वस्य चाननुगतस्य दुर्वचतयाइच्छाव्यक्तिसमसंख्यभे
दानांनिवेशनीयमहागौरवं इच्छायाआहार्यज्ञानसामग्रीघटकतानिर्वाहायतस्यावश्यकत्वेतुताधिकवचेति· इच्छायाउत्तेजकत्वपक्षएवसमु
150 चितः।तथाचनप्रत्यक्षशाब्दादिसाधारणबुद्धौप्रतिबंधकतैक्यसंभवः॥विरोधिज्ञानदशायांचाक्षुषत्वादिप्रकारकेच्छाबलात्तस्यास्पार्शनाद्यनुत्प
त्पात्तज्ज्ञानीयप्रत्यक्षेच्छाया विशिष्योत्तेजकतास्वीकृत्य तत्तज्ज्ञानीयप्रत्यक्षेपृथक्प्रतिबंधकतायाआवश्यकत्वात्· तथाचानुमितिस्थलेपृथक्
प्रतिबंधकतायाअप्रामाणिकत्वात्संशयानुमित्युपरिवे· यदिकथंचिदव्यवहितोत्तरत्वं अनुगतंशक्यतेनिर्वक्तुंचाक्षुषस्पार्शनादिभेदेनप्रत्यक्षस्य
लेचाक्षुषादिगोचरेच्छाविरहविशिष्टविरोधिनिश्चयाभावत्वेन प्रत्युत धर्मावच्छेदेनकारणतामूकस्यशाब्दोपमित्योः इच्छाविरहाविशेषि
तविरोधिनिश्चयाभावकारणताकल्पकस्यनापेक्षयातद्भेदेनचाक्षुषत्वादिरूपलघुधर्मपुरस्कारेणकारणतायाःकस्य इच्छाविशिष्टान्य
बुद्धिसामान्यविरोधिनिश्चयाभावस्यैकहेतुतायाश्चकल्पनेलाघवमीक्ष्यतेतदाव्यवहितोत्तरत्वसंबंधेनविरोधिनिश्चयानवच्छिन्नत्वमेवतत्प्रतिबध्य १५०
तावच्छेदकमंगीक्रियतां· तथासतिदोषविशेषाजन्यत्वादेरप्यनिवेशनीयतयालाघवात्· तथाचोभयव्याप्यवत्तानिश्चयमदशायांसंशयानुमि

तेरुपगमेपितादृशप्रतिबंधकाभावव्यभिचारानवकाशाद्विरोधिपरामर्शाभावाघटितायाएवानुमितिसामग्र्या अनुमित्युत्पादकत्वयोजकत्वोपगमा
त्संशयानुमितिर्निष्प्रत्यूहैवेति· एतेनवह्न्यभावव्याप्यवान्पर्वतइत्याकारकाश्रयासिध्यादिनिश्चयदशायांवह्निमान्पर्वतोघटवानित्याद्यनुमितिवा
रणायवह्न्यादिप्रकारकानुमितावपितद्भावव्याप्यबुद्धेःप्रतिबंधकत्वमावश्यकमितिनसंशयानुमितिप्रसंगइतिनिरस्तं· तद्भावव्याप्यवत्तानि
श्चयस्यतद्भावव्याप्यवत्तानिश्चयानवच्छिन्नत्वबुद्धिप्रतिबंधकत्वेफलानुरोधेनतद्विशिष्टपक्षकाद्यनुमितिसामग्र्यांतद्भावव्याप्यवत्तानिश्चया
भावांतर्भावेपिप्रयोजनविरहेणातद्विधेयकानुमितिसामग्र्यांतदंतर्भावानुपगमात्·।अत्राहुः।अस्तुप्रत्यक्षस्थलेविरोधिज्ञानप्रतिबंधकतायां
मिच्छानामुत्तेजकत्वेवतथापिपरोक्षशाब्दादिबुद्धिस्थलेप्रत्यक्षान्यत्वसहितस्यज्ञानत्वस्यप्रतिबध्यतावच्छेदकत्वमंगीक्रियतेनतुशाब्दत्वादि
नानाधर्माणांइतिनसंशयानुमितिप्रसंगः।नचप्रत्यक्षान्यत्वज्ञानत्वयोरेकविशिष्टापरस्येवानतिप्रसक्तस्यावच्छेदकत्वमंगीकार्यंतत्रच
विशेष्यविशेषणभावेविनिगमनाविरहइतिवाच्यं·प्रत्यक्षान्यत्वविशिष्टस्यगुणत्वादिसाधारणतयातन्मात्रेणज्ञानत्वेतरव्यावृत्त्यसंभवात्·ज्ञान
त्व त्वस्यविशेष्यत्वेविशेष्यतावच्छेदकतयाज्ञानत्वस्यापिनिवेशनीयतयागौरवेणस्वतोव्यावृत्तज्ञानत्वविशिष्टप्रत्यक्षान्यत्वस्यैवावच्छेदकत्वादिति·अ
न्येतुमहानसीयत्वविशिष्टतयावह्न्याद्यनुपस्थितिदशायामपिप्रतीयमानस्यमहानसीयवह्न्यभावादेः प्रतियोगितायायथाविशेषणताप

न्नेषु महानसीयत्ववह्नित्वादिनानाधर्मेषु मिथोविशेष्यविशेषणभावानापन्नेष्वेवावच्छेदकत्वं। प्रत्येकं तादृशधर्माणामतिप्रसक्तत्वेपि यत्रैकस्मिन्नव
द्वि०ग० च्छेद्ये नानाधर्माणामवच्छेदकता तत्रावच्छेदकसमुदायानतिप्रसक्तत्वेवावच्छेदकतानिर्वाहः। अवच्छेदकस्य विशेषणसंबंधादिभेदेनावच्छेदकताया
१५१ भेदेपि नावच्छेद्यभेदः। अवच्छेद्यप्रतीतौ अवच्छेदकप्रकारकविषयताभेदेनैव तद्भेदात्। महानसीयवह्निर्नास्तीति प्रतीतौ च नानाधर्मप्रकारकस
मूहालंबनव्याहृतवह्न्यादिविषयताया एकत्वात्। तथा प्रकृतेपि धर्मिविशेषणतापन्नौ मिथोविशेष्यविशेषणभावानापन्नप्रत्यक्षान्यत्वज्ञा
(5) विनिगमना नत्वयोः प्रतिबध्यतावच्छेदकत्वादिकमतो न विरहात्प्रतिबध्यतादिभेदस्साकुः। तन्न। प्रत्यक्षान्यत्वज्ञानत्वेन सहितं धर्मिणो युगपज्ज्ञा
नेएकतरस्यापरधर्मितावच्छेदकत्वभानमावश्यकं। समूहालंबनविलक्षणनिर्धर्मितावच्छेदकोभयभानस्याप्रामाणिकत्वादिति प्रत्य
क्षान्यत्वधर्मितावच्छेदकतापन्नज्ञानत्वप्रकारिकायाः ज्ञानत्वधर्मितावच्छेदकतापन्नप्रत्यक्षान्यत्वप्रकारिकायाश्च धर्मिविषयिताया भेदे
न प्रतिबध्यताभेदस्यावश्यकत्वादिति। केचित्तु वह्नित्वाभावत्वाभ्यां व्यापकताग्रहकाले महानसीयवह्नित्वतादृशवह्न्यभावत्वप्रकारेणानुमिति १५१
प्रयोजकलाघवज्ञानवशाद्यत्र सत्प्रतिपक्षभावः तत्र संशयानुमितिर्न तदभावव्याप्यवत्ताबुद्धेर्विरोधित्वेन शक्यते वारयितुं शुद्धवह्नित्वावच्छिन्न
शुद्धाभावत्वावच्छिन्नव्याप्यधियोर्न महानसीयवह्न्यभावमहानसीयवह्निविशिष्टबुद्ध्योः विरोधित्वात्। न च लाघवज्ञानघटितत्वाद्विरोध्यनुमि

तिसामग्रीकाले तत्प्रत्यक्षशाब्दादिवारणाय तत्र तादृशसामग्र्याः प्रतिबंधकत्वे कल्पनीयेऽनुमितिसाधारणस्य तद्विशिष्टजिज्ञासानवच्छिन्नतद्विशिष्ट
धीत्वस्यैव प्रतिबध्यतावच्छेदकत्वोपगमान्न संशयानुमितिप्रसंग इति वाच्यं. लाघवज्ञानाघटितशुद्धाभाववत्त्वादिप्रकारकानुमितिसामग्र्या व्यापिकायाः प्र
तिबंधकतयैवोपपत्तेः प्रत्यक्षादौ लाघवज्ञानमंतर्भाव्य सामग्रीप्रतिबंधकतांतरस्यैनापि सिद्धेश्च. तथा चोक्तानुमितिवारणासंभवः। तत्प्रतिबध्यतावच्छेद
ककोटौ अभाववत्त्वादिविषयकानुमितित्वन्यज्ञानत्वस्यैव निवेशनीयत्वात्. यदि च लाघवज्ञानाजन्यमहानसीयवह्न्यभाववत्त्वादिप्रकारकानुमितौ महानसी
यत्वादिकमपि विधेयतावच्छेदकं. तथा च शुद्धाभाववत्त्वादिप्रकारकसिद्धिदशायां शुद्धाभाववत्त्वाद्यवच्छिन्नविधेयकानुमितिसामग्र्या असत्त्वात्तदानी
मेव लाघवज्ञानसत्त्वे प्रत्यक्षादिवारणाय लाघवज्ञानघटितसामग्र्याः प्रतिबंधकत्वांतरकल्पनमावश्यकमित्युच्यते तदापि लाघवज्ञानघटित
विरोधिकोटिकानुमितिसामग्रीसंवलनदशायां भवन्मते प्रत्यक्षशाब्दबोधादेरुत्पत्त्या एककोटिसामग्र्या अपरकोटिसामग्र्यभावनिवेशस्यावश्यकत
या कथं तत्प्रतिबंधकतया संशयानुमितिवारणसंभवः। एतेन विरोधिविषयकनिश्चयानंतरमिव तत्सामग्र्यनंतरमपीच्छावशात्परोक्षज्ञानं नोत्पद्यते.
एवं च लाघवज्ञानघटितविरोधिकोट्यनुमितिसामग्रीदशायामिच्छासत्त्वेपि न शाब्दबोधादिरुत्पद्यते किंतु विरोधिकोट्यनुमितिरेवेति फलानुरोधेनेच्छा
भावं प्रतिबंधके ऽरच्छानवच्छिन्नत्वं च प्रतिबध्यविशेषणमनिवेश्य लाघवज्ञानघटितसामग्र्याः परोक्ष[illegible]विशिष्टज्ञाने प्रतिबंधकत्वांतरकल्पनमावश्य रोधि

हे०गा०
१५२
152

कमितितत्प्रतिबध्यतावच्छेदकस्य परोक्षत्वस्यानुमितिसाधारण्यान्नोक्तस्थले संशयानुमितिप्रसंग इत्यपि निरस्तं॰ विरोधिविषयकनिश्चयसामग्रीदशायामिच्छा
बलात्परोक्षज्ञानानुत्पादस्याप्रामाणिकत्वाच्चेति॥ अथाकुः। संशयसमुच्चययोर्विधिभानाभानप्रयुक्तवैलक्षण्यस्य क्लृप्तत्वात्संशयत्वस्य विषयिताविशेष
रूपत्वमावश्यकं॰ तादृशविषयितायां च कोटिनिरूपिताकोट्युपरागेणैव संदेह इति प्रतीतेः तत्तत्कोटिनिरूपितविषयिताविशेषभिन्नतत्तत्कोटिविषयिता
शालित्वं तत्तत्कोटिनिश्चयत्वं॰ तथा च निश्चयत्वघटकविषयितायाः संशयसाधारणत्वे तत्रापि निश्चिनोमीति प्रतीत्यापत्तिरिति तस्यास्तद्व्यावृत्तत्वमा
वश्यकं॰ तन्निर्वाहश्च संशयसामग्र्यास्तादृशविषयिताशालिज्ञानप्रतिबंधकतयैवेत्युक्तलाघवघटितसामग्र्याद्व्यात्संशयस्वीकर्तॄणामपि निश्च
यत्वघटकनिरुक्तविषयितायास्तादृशसंशयव्यावृत्तत्वस्य लाघवज्ञानघटितविपरीतकोट्यनुमितिसामग्र्यास्तत्कोटिनिरूपिततादृशविषयिताशालि
ज्ञानप्रतिबंधकत्वमावश्यकं॰ तथा च लाघवात्संशयत्वघटकविषयिताभेदमनिवेश्यैव तत्कोटिप्रकारित्वस्य तादृशसामग्रीप्रतिबध्यतावच्छेदकत्वो
पगमान्नोक्तसामग्रीद्व्यात्संशयानुमितिः॥ न च संशयत्वघटककोटिप्रकारताभिन्नतत्कोटिप्रकारिताकज्ञानत्वं तत्कोटिनिश्चयत्वं अपि तु ता १५२
दृशप्रकारिताशून्यतत्कोटिप्रकारकज्ञानत्वं तथा च संशये निश्चयवृत्तिविषयितास्वीकारेपि न क्षतिरिति वाच्यं। एकधर्मावच्छिन्नतत्कोटिसंशयत्व
पस्यान्यधर्मावच्छिन्नांशे तत्कोटिनिश्चयस्य संग्रहाय तत्तद्धर्मावच्छिन्नविशेष्यतानिरूपितविलक्षणविषयिताशून्यत्वस्य तत्तद्धर्मावच्छिन्नविशेष्यक

निश्चयत्वशरीरे निवेशनीयतया धर्मितावच्छेदकनिश्चयत्वस्य सत्वाकारणत्वप्रतिबंधकत्वपक्षेपि लाघवस्य विलयप्रसंगात् अत्र व्याप्याभावे ऽव्याप्यवृत्तित्वग्रहदशायां
ग्राह्याभाववनिश्चयविषये धर्मिणि ग्राह्यज्ञानोत्पत्त्यापत्त्या तादृशाव्याप्यवृत्तित्वग्रहस्य तत्प्रतिबंधकतायामुत्तेजकत्वं तथा तद्धर्मिकाव्याप्यवृत्तित्वग्रहदशायां तद्व्याप्यव
त्तानिश्चयस्यापि तद्विपरितज्ञानप्रतिबंधकतया तत्रापि तद्धर्मिकाव्याप्यवृत्तित्वग्रहस्योत्तेजकत्वमुपेयं एवं च कपिसंयोगतदभाववयोर्दैशिकाव्याप्यवृत्तित्वग्र
हदशायां पक्षतावच्छेदकशाखावृक्षरूपैकावच्छेदेन तदुभयकोट्यवगाहमानः गंधतदभाववाद्योः कालिकाव्याप्यवृत्तित्वग्रहदशायां पक्षतावच्छेदकतत्क्षणाव
च्छेदेन तदुभयकोटिमत्वावगाहमाना च संशयानुमितिर्ग्राह्याभाववद्व्याप्यवत्ताज्ञानप्रतिबंधकतया न शक्यते वारयितुं न चाव्याप्यवृत्तित्वज्ञानस्य संशयविरो
धितया ऽव्याप्यवृत्तित्वज्ञानकाले समुच्चय एव भवति न संशय इति वाच्यं यतो विरोधग्रह एवाव्याप्यवृत्तित्वग्रहस्य विरोधितया कोट्योर्विरोधावगाही संशय ए
व तयोरव्याप्यवृत्तित्वग्रहदशायां न संभवति विरोधानवगाहिन एकदेशावच्छेदेनैककालावच्छेदेन वा कोटिद्वयमवगाहमानस्य संशयस्य तदानीमु
त्पत्तौ बाधकाभावः न हि तादृशज्ञानं कोटिद्वयनिश्चयरूपं भवति समानदेशकालावच्छेदेन तत्तदभाववनिश्चययोरव्याप्यवृत्तित्वग्रहकालीनयोरपि मिथो
विरोधित्वात् अव्याप्यवृत्तित्वेपि भावाभावयोरेकावच्छेदेन वृत्तेरसंभवात् अव्याप्यवृत्तितया तादृशनिश्चययोर्विषयविरोधापरिहारात् न च यदि ताद
शदेशावच्छेदेन तदभाववनिश्चयस्तदवच्छेदेन तद्विशिष्टबुद्धिं ग्राह्याभावधर्मिकाव्याप्यवृत्तित्वग्रहदशायामपि प्रतिबध्नाति तर्हि तादृशाव्याप्यवृत्तित्वग्र

हे०उ०
१५३
153

दृश्यायामेवावच्छेदकावच्छेदेन ग्राह्याभावव्याप्यवत्ताज्ञानमपि तादृशानुमितिं विरुंध्यात् तथा चावच्छेदकावच्छेदेनानुमितावपच्छेदकावच्छेदेन हेतुमत्ता
परामर्शस्येव हेतुता यथा तादृशायोग्यपरामर्शयोरवच्छेदकावच्छेदेन विपरीतसाध्यवत्ताज्ञाने प्रतिबंधकता यथा नोक्तसंशयानुमितिसंभव इति वाच्यं अवच्छेद
कसामानाधिकरण्येन हेतुमत्ताज्ञानादपि देशकालरूपपक्षतावच्छेदके बाधाभावबलात्स्वरूपसंबंधरूपावच्छेदकत्वमवगाहमानाया अनुमितेर्मणि
कारसंमतत्वात् वस्तुतो ग्राह्याभावस्याव्याप्यवृत्तित्वेपि तदवच्छेदकावच्छेदेन ग्राह्यवत्त्वासंभवात् विषयविरोधेनावच्छेदकावच्छेदेन विशिष्टबुद्धौ तदवच्छेदेन
ग्राह्याभावज्ञानप्रतिबंधकतायामेव तद्धर्मिकाव्याप्यवृत्तित्वग्रहाभावो नापेक्षितः तादृशतद्व्याप्यवत्ताज्ञानस्य तादृशविशिष्टबुद्धिं प्रत्यपि विरोधित्वे तु तादृ
शाव्याप्यवृत्तित्वग्रहाभावोपेक्षित एव ग्राह्याभावस्याव्याप्यवृत्तित्वे ग्राह्यावच्छेदकावच्छेदेन ग्राह्याभाववति वर्त्तमानस्यापि तद्व्याप्यवत्तया विषयविरोधवि
रहात् साध्यानवच्छेदकावच्छेदेन साध्यवति वर्त्तमाने यद्देशकालावच्छेदेन यत्र साधनं तद्देशकालावच्छेदेन तत्र साध्यमिति व्याप्तिर्न संभवतीति चेत् न क्षतिः
नहि पक्षतावच्छेदकदेशकालावच्छेदेन साध्यानुमितौ तदवच्छेदेन गृहीततादृशव्याप्तिकहेतुमत्तापरामर्श एव हेतुरित्यवच्छेदकावच्छेदेनानुमितिस्थ १५३
ले सिद्धिव्यभिचारासंकीर्णबाधस्य हेत्वाभासत्वं तदवस्थापितवतो मणिकारस्यानुमतं तथा सति सल्लिंगपरामर्शाद्भ्रमानुमित्यसंभवेन बाधे दोषांत
रासंकरस्य दुर्घटत्वात् तथा चावच्छेदकदेशकालाघटितप्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावघटितव्याप्तिरपि तन्मते अवच्छेदका

वच्छेदेनानुमितिप्रयोजिका· तादृशव्याप्त्यवगाहिनोवच्छेदकावच्छेदेनहेतुमत्तापरामर्शस्यापिविपरीतकोट्यनुमितिप्रतिबंधकत्वेग्राह्याभावधर्मिकाव्या
प्यवृत्तित्वज्ञानाभावोप्यपेक्षितस्तदवच्छेदकावच्छेदेनहेतुमत्तापरामर्शस्यतदवच्छेदेनसाध्यानुमितावपेक्षितत्वेपि दर्शितरीत्यासंशयानुमित्युपपत्ति
रिति·मूलेन्वयाव्यतिरेकाद्येति· कोटिद्वयसहचरितत्वज्ञानान्निश्चितकोटिद्वयवैशिष्ट्यज्ञानादेरित्यर्थः।व्यवस्थितविकल्पोयंसाधारणासाधा
रणभेदेन·विरुद्धस्येत्यत्रासामानाधिकरण्यरूपविरोधविवक्षयैवाव्याप्तेरपिविरुद्धरूपतयातस्यचापक्षधर्मस्यनसाध्यविपरीतानुमितिःफलमि
त्यसंगतिरतोन्यादृशंविरोधंदर्शयतिरूढाहसाध्याभावव्याप्यस्येति·अपक्षधर्मविरुद्धस्यप्रकृतपक्षेसाध्यविपरीतानुमापकत्वासंभवेपिनक्षतिः·
साध्यविपरीतानुमितौप्रकृतपक्षकत्वाविवक्षणादित्याहमूलेपक्षधर्मोपीति·अन्यत्र·प्रकृतपक्षभिन्नेस्वाधिकरणे·ह्रदोवह्निमान्धूमादित्या
दौह्रदत्वादिहेतोःपक्षेसाध्यविपरीतज्ञानसंभवेपिअविरुद्धधूमादेर्नतत्फलमितिनातिप्रसंगः।यस्यतत्फलंसविरुद्धएवंसाहवाधइति·सा
ध्याभावसाधकवाधितहेत्वोर्लक्ष्यतयोक्तफलघटितविरुद्धलक्षणातिव्याप्तिशंकांनिराकरोति·नित्यइति·घटोनित्यइत्यभिधाने·कारणभेदेनानित्यत्वसाधक
त्वभ्रमःस्यादितिप्रथमंसाध्योत्कीर्त्तनं·असिद्धइत्यादि·व्यभिचारादिदोषचतुष्टयज्ञानान्यथासाध्यधीनंफलंतस्ततज्ज्ञानानधीनंअलिंगत्वज्ञानं·असाधक
त्वज्ञानंअसिद्धिदोषस्यज्ञातस्यफलमित्यर्थः।तथाचतादृशदोषवत्त्वमसिद्धहेत्वाभासलक्षणंफलितमितिभावः।पक्षधर्मेहेताविति·अत्रहेतुपदस्य

प्रकृतहेतुपरत्वे अपक्षधर्मव्याप्यप्रकृतहेतुकबाधस्य लेव्याप्यभावसिद्धिरूपतत्फलासंभवात् तत्फलघटितलक्षणाव्याप्तिरतो हेतुपदस्य प्रकृता
हे०ग० प्रकृतसाधारणहेतुमात्रपरतां दीधितिकृदाह हेतौ प्रकृते· अन्यत्रेवेति· तथा च ह्रदो वह्निमान् धूमादित्यादावपि साध्याभाववत्पक्षरूपबाधघटि
१५४ तेन तद्घटितत्वहेतुनाऽप्यत्वादिरूपहेतवंतरे व्याप्यभावानुमितिसंभवात् लक्षणसमन्वय इति भावः। यद्यपि प्रकृतहेतोर्न तत्फलकमिति तत्फलक
154 त्वं न बाधितहेतोर्लक्षणं तथापि तत्फलकत्वेपवतत्लक्षणमिति नानुपपत्तिः। हेतुपदस्य प्रकृताप्रकृतसाधारणहेतुपरत्वे तदुपादानमफलं·
अव्यावर्तकत्वादिति· पक्षधर्मव्याप्तिबोधस्यैवोच्यते· अतः प्रकृतहेतुपरमेव तद्व्याख्यं इत्याशयेनापक्षधर्मप्रकृतहेतुकबाधस्य फलान्तरमूर
यति अपक्षधर्मे वेति· अत्र प्रकृतहेतुत्वर्थकं हेतावितिपूर्वोक्तं अनुषंजनीयं· एतत्कल्पे फलानानुगमान्तद्घटितलक्षणाव्याप्तिमाशं
क्यान्यतरत्वेन तत्फलानुगमेऽफलाभिप्राय इति दर्शयति तथा चेति· हेतावितिप्रकृत इत्यादिः। व्याप्तिभंगे साध्यसाध्याभाववत्पक्षवृत्तित्वं हेतुः।
पक्षस्य साध्याभाववत्त्वेनैव निवेशः। ननु पक्षतावच्छेदकस्यापि तत्र प्रवेश इति न व्यर्थविशेषणता· पक्षधर्मताभंगे साध्ये पक्षनिष्ठाभावप्र १५४
तियोगिसाध्यव्याप्यत्वं हेतुः। अत्रापि साध्यस्य तादृशाभावप्रतियोगित्वेनैव निवेशः। हेतुद्वयमेव बाधघटितमिति बाधस्यान्यतरफल
कत्वमुभयत्र· मूले व्याप्त्यादिबुद्धिसत्त्वादिति· सद्धेतोरपि विरोधिपरामर्शदशायां सत्त्वादितिपक्षत्वात् तत्र च व्याप्तिपक्षधर्मताप्रमितिसत्वा

दित्यर्थः। तथाच प्रकरणसमदोषस्य व्याप्त्यादिविरहो न्नामकत्वासंभवादिति भावः। विपरीतबुद्धिः। स्वसाध्याभावानुमितिः सत्प्रतिपक्षहेतोः फ
लमिति शेषः। स्वसाध्यविपरीतेनानियमादिति· धूमादिहेतोर्वह्न्याद्यभावव्याप्यत्वाभावादित्यर्थः। संशय इति· कोटिद्वयोपस्थितिद्वारकसाधासं
शय इत्यर्थः। कोटिद्वयानुपनयादिति· स्वेन स्वसाध्यस्यैवोपस्थापनादिति भावः। इति जिज्ञासेति· एतादृशतत्वनिर्णयोपायेच्छा फलिका जिज्ञासेत्य
र्थः। अनयोः किं तत्वमिति जिज्ञासेति यावत्· अतो नाग्रिमग्रंथविरोधः। ननु स्वव्याप्त्यादिमत्तयोपस्थितयोर्हेत्वोरन्यतरत्र समीचीनत्वे एव जिज्ञासा·
यद्वक्ष्यति अत्र हेतुसमीचीनत्व इति· तथाच प्रकृतसाध्यहेत्वोरिति यथाश्रुतमूलमसंगतमतो दीधितिकृद्भिस्तु द्वयार्थकतया तद्व्याचष्टे· प्रकृत
साध्ययोरिति· किं तत्वमिति मूलेकः समीचीन इत्यर्थः। एतादृशजिज्ञासाप्रयोजकत्वं समीचीनत्वसंशयादिसाधारणमतस्तद्वारणाय व्याप्ति
पक्षधर्मत्वोपस्थितिरिति· उदासीनव्याप्त्याद्युपस्थितिवारणाय विशेषणदले· नच व्याप्त्यादेरननुगमात्सर्वसाधारणरूपेण तदुपस्थिति
निवेशासंभवाद्विशिष्य प्रकृतसाध्यतदभाववव्याप्त्याद्युपस्थितिनिवेशस्यावश्यकत्वे जनकतावैयर्थ्यमिति वाच्यं· अनुमितिचरमकारण
त्वेन व्याप्त्याद्यंतरोपस्थितिसाधारणेन तन्निवेशसंभवात्· यादृशपरामर्शसहकारेण यादृशपरामर्शस्योक्तजिज्ञासाजनकत्वं तादृश

दी०गा०
१५५
155

परामर्शसहिततादृशपरामर्शविशेष्याज्जिज्ञासास्य रूपयोग्यैकतरपरामर्शदशायां नातिप्रसंगः प्रकरणसमइति दूषणइति शेषः। प्रकृतसाध्यव्याप्यवत्तापराम
र्शतदभावव्याप्यवत्तापरामर्शयोर्जिज्ञासाजननेऽमिथः सहकारितां व्यवस्थापयति न ह्युपस्थित इति प्रतिपक्षे विरोधिपरामर्शान्तरे एकस्मात्परामर्शात्हि नि
र्णयः। एकतरसाध्यस्य एकतरसमीचीनत्वस्य वा फलोपधानगर्भलक्षणमेकपरामर्शदशायां नातिप्रसक्तमित्येतत्परतानन्हीसादेः। जिज्ञासोपधानस्यानिय
मेनतद्घटितलक्षणस्याव्याप्त्यादिविचक्षणासंभवात् नन्विष्टसाधनताज्ञानात्संशयाद्वेतिविकल्पोऽसंगतः ज्ञानगोचरेच्छायां तादृशेष्टसाधनताज्ञानस्य सर्वत्रै
व हेतुतया संशयकल्पे तत्केवल्यव्यवच्छेदायोगादिष्टतदिष्टभेदाभिप्रायकतया विकल्पं संगमयति तज्जन्येति संशयजन्येत्यर्थः। संशयजन्यस्य दुःखस्यो कारण
कारणीभूतसंशयविघटनेनानुत्पादः। तद्रूपं यदिष्टतत्साधनताज्ञानादित्यर्थः। एवं च मूलोक्तं संशयस्य जिज्ञासाहेतुत्वं दुःखजनयित्वात्तदभावेऽपस्याम
नेन तदभावेच्छासंपादनद्वारेति स्फुटीकृतं द्वारान्तरेति व्यवहाररूपेसादेः। तथा च मूले द्वारपदं तद्विशेषपरमितिभावः। ज्ञानेच्छा एकतरकोटिनिश्चयेच्छा प्रति
पक्षसंवलनस्य जिज्ञासायामित्युपहितस्यान्यथासिध्याऽकारणत्वात् जिज्ञासाहेतुत्वादितिमूलं तत्प्रयोजकत्वार्थकतया द्वारं प्रदर्शयन्व्याचष्टे हेत्विति १५५
समीचीनत्वं प्रमितव्याप्तिपक्षधर्मताकत्वं स्वसाध्यानुमित्यौपयिकप्रमापरामर्शविषयत्वमितियावत् तत्संशयश्च परामर्शप्रामाण्यसंशयपर्यवसितइ
ति बोध्यं अनैकान्तिकात् निव्याप्तिरितिमूलं यद्यप्यनैकान्तिकत्वोपस्थितेः व्याप्तिपक्षधर्मत्वोपस्थितित्वाभावात् नैतादृशशंकावसरः। तथापि तदुपस्थितेरपि उ

दासीनव्याप्त्यादिविषयकत्वसंभवात् तत्संगतिः। संशयद्वारा साध्यसंशयद्वारा युगपत्परामर्शद्वयानुत्पादेपि क्रमिकपरामर्शद्वयसंवलनात्प्रतिरोधद्व इति शंकते क्रमे
ति· एकपरामर्शानंतरमपरपरामर्शजनकव्याप्तिज्ञानपक्षधर्मताज्ञानयोः द्वयोः क्रमेणैवोत्पत्तिः तथा च प्रथमपरामर्शचतुर्थक्षण एव परामर्शांतरोत्पत्तिस्तदानीं च पूर्वप
रामर्शनाशो नोत्पद्यते अपि तु स्वद्वितीयक्षणोत्पन्नविशेषगुणात्तृतीयक्षण एवेति उत्पत्तिकालपदं तत्पूर्वकालपरतया व्याचष्टे दीधितावुत्पत्तीति· तदानाशाद्दित्यतस्त
दानाशोत्पत्तिप्रतीतिरौत्सर्गिकी साशयेनेदं व्याख्यानं· तदानाशसत्वार्थकत्वे तु यथाश्रुतमेव संगच्छते· अनंतरोत्पन्नस्यैव गुणस्य नाशकतया कुत्रोभयोर्व्याप्तिज्ञानपक्ष
धर्मताज्ञानयोरेकत्र पूर्वज्ञाननाशकत्वासंभवात् पृथक्स्थलीयनाशकत्वाभिप्रायकतया ज्ञानाभ्यां विनाशादिति मूलं संगमयति व्याप्तीति· उत्पादक्रमानियमादिति·
व्याप्तिज्ञानोत्तरमेव पक्षधर्मताज्ञानं· पक्षधर्मताज्ञानांतरमेव तस्य नाशकव्याप्तिज्ञानमुत्पद्यत इति नियमाभावादित्यर्थः उभयोर्नाशकत्वमुक्तमिति· उक्तज्ञानयोर्यत्ज्ञा
नं प्रथमतो यत्रोत्पद्यते तत्र तस्य नाशकत्वादिति भावः। विशिष्टज्ञानोत्पत्तिकालेऽस्त्रत्रोत्पत्तौ तादृशज्ञानयोर्हेतुत्वेनान्वयः एकत्रैवोभयहेत्वन्वययोग्यतानिर्वहती
ति किं स्थलभेदानुसरणेनेत्याशयेनाह उत्पत्तावेव चेति· व्याप्तिपक्षधर्मताविषयकैकज्ञानस्थलेपि न परामर्शयोर्योगपद्यं संभवतीति सूचयन्नाह यत्र चेति· मूले उभयव्या
प्तिज्ञानपक्षधर्मताज्ञानानामिति· परामर्शद्वयहेतुव्याप्तिहेतुपक्षधर्मताज्ञानचतुष्टयस्येत्यर्थः। परस्परप्रतिबंधकत्वात्· एकसत्वस्य परसत्वाविघटकत्वात्·
परामर्शोत्पाद इति· व्याप्त्यादिज्ञानचतुष्टयाधीनस्य एकदा समूहालंबनरूपस्य विरलक्रमेण वोभयव्याप्यवत्ताज्ञानस्योत्पाद इत्यर्थः। विशिष्टपरामर्शयोरेवैक

दी०गा० दानुत्पादस्य तृतीयक्षणे च विनाशः। नेतरज्ञानस्य तन्नियम इत्यभिमाने नेयं शंका· अभिमानं निराकरोति व्याप्त्यादीति· योग्यपद्याभावात्· युगपद्द्वयस्यानासंभवात्· ज्ञानमा
१५६ त्र एव योक्तनियमादिति भावः। परस्परप्रतिबंधात्· परस्परजन्यव्याप्तिस्मृतिप्रतिबंधकत्वात्· समूहालंबनपक्षधर्मताद्वयज्ञानात् समूहालंबनरूपं व्याप्तिद्वयस्मरणं·
ततः समूहालंबनमुभयव्याप्यवत्ताज्ञानं प्रतिरोधप्रयोजकमिति समाधत्ते मेवमिति· स्वयं निर्वक्ष्यमाणस्य नित्यसत्प्रतिपक्षदोषस्य साध्याभावव्याप्यवत्पक्षरूप
स्य केवलान्वयिसाध्यके साध्याभावाद्यप्रसिध्याऽसंभवात्· अस्येति मूलं निरुक्तव्यवहारोपायकपरामर्शसंवलनात्मकसत्प्रतिपक्षत्वपरतया व्याचष्टे· अस्ये
ति· अभिधेयत्वे द्वित्वावच्छिन्नाभावप्रतियोगित्वसाधारणरूपेण घटनिष्ठाभावप्रतियोगित्वज्ञानस्य विरोध्यविषयकत्वेन घटेऽभिधेयत्वज्ञानाप्रतिबंधक
तया तत्सामग्र्यानाभिधेयत्वानुमानप्रतिरोध इत्यभिधेयत्वमित्यादिग्रंथस्याभिधेयत्वपक्षकघटनिष्ठाभावप्रतियोगितानवच्छेदकत्वसाध्यकजात्यहेतित्वविशि
ष्ट घटमात्रवृत्तितानवच्छेदकत्वलिंगकानुमानेतात्पर्यं· इ घ्रांतोपि घटान्योन्याभावत्वं पूर्वरूपत्वं च· दीधितौ सत्ताकं वृयी वा दिमित्यादीति· यथाश्रुतं· यथाश्रुत
मूलानुसारेण· यथाविवक्षितेतु सत्तादिपदं सत्तात्वादिपरं· एकैकस्येति· केवलविशेष्यकेवलविशेषणयोरित्यर्थः। ननु घटनिष्ठात्यंताभाव इत्यंतेन प्रसिद्धपट १५६
त्वाद्यभावविवक्षणे तत्राभिधेयत्वप्रतियोगिकत्वस्य बाधान्न साधनसंभवः। अभिधेयत्वाभावस्य चाप्रसिध्या न पक्षत्वसंभव इत्याशंकां निरसितुमाह घटनि
ष्ठेति· उभयमतप्रसिद्धेनेत्यादिः। सामान्यतः। सामान्यरूपेण· बाधेति· सामानाधिकरण्यमात्रेण साध्यसिद्धरुद्देश्यत्वान्नांशतो बाधो दोषः। अभावस्य कस्यचिद्

भिधेयत्वप्रतियोगिकत्वमप्रसिद्धि·विवादेपक्षतावच्छेदकावच्छेदेनबाधोनिर्दुष्टश्चेयः।पक्षतावच्छेदकप्रसिध्यैवनाश्रयासिद्धिरित्यर्थः।ननुस्वरूपसंबंधेनाभिधे
यत्वत्वावच्छिन्नसाध्यकानुमितेःपक्षनिष्ठाभावेततत्संबंधावच्छिन्नत्वविशेषितनाभिधेयत्वत्वावच्छिन्नप्रतियोगिताकत्वानुमितिरेवविरोधिनीतादृशंचसाध्य
मप्रसिद्धं·नचघटनिष्ठस्वरूपसंबंधावच्छिन्नप्रतियोगिताकाभावत्वेनपक्षत्वादुद्देश्यासिद्धिः।स्वरूपसंबंधावच्छिन्नगगनाद्यभावस्यसंयोगादिसंबंधावच्छिन्ना
भिधेयत्वत्वावच्छिन्नप्रतियोगिताकाभावसमनैयत्येनाभिन्नतयासिद्धसाधनस्यदुर्वारत्वादितिचेत्सत्यं·स्वरूपसंबंधावच्छिन्नायांघटनिष्ठाभावप्रतियोगिता
यांघटनिष्ठनित्याभावप्रतियोगितात्वेनहेतुनाघटनिष्ठाभिधेयत्वभेदप्रतियोगितादृष्टांतेनाभिधेयत्वत्वावच्छिन्नत्वानुमानेतात्पर्येणासामंजस्यं·मूलेविशेषा
दर्शनदशायामिति·व्यभिचारिण्यप्येतादृशहेतौव्यभिचारग्रहदशायामित्यर्थः।केवलान्वयिन्यपिसंभवइत्यनेनास्यान्वयः।व्यभिचारस्येत्यंदर्शयन्नेतत्कथनप्रयो
जनमाहदीधितौनन्विति·आद्यस्य·जातस्येत्यादिप्रथमानहेतोः।द्वितीयस्य·घटवृत्तीत्यादिद्वितीयानुमानहेतोः।प्रतियोगित्वादिप्रकारकबाधबुद्धेर्विशि
ष्टबुद्धिविरोधितायानव्यैरनभ्युपगमात्·तथासतितत्संबंधतत्संबंधादिप्रकारकबुद्धेरपिविरोधितापातात्·नोक्तानुमानेनघटोभिधेयःप्रमेयत्वादित्यनुमानप्र
तिरोधसंभवइतिस्वयमभिधेयत्वरूपप्रतियोगिप्रकारेणाभावानुमानमेवमूलेकृतासाध्याप्रसिध्योपेक्षितमपिप्रतिरोधकतयाव्यवस्थापयतिवस्तुत
इति·साध्याप्रसिध्यान्वय्यनुमानासंभवात्·पटादिसाधारणद्रव्यत्वादेःपटादौव्यभिचारग्रहसंभवेनव्यतिरेकितयापिसाधकतायाःसुघटत्वाभावेनप

क्षमात्रवृत्तिकंबुग्रीवादिहेतुताकव्यतिरेकव्यादरः। अभावसाध्यकव्यतिरेकितया साध्यप्रसिद्धेरनपेक्षां दर्शयति व्यापकाभावेनेति। घटादावभिधेयत्वादिप्रकारीकृत्या

हे०ग० ज्ञातस्यापि व्याप्याभावस्य व्याप्यतया गृहीतमभिधेयत्वादिकं प्रतियोगितया प्रकारीकृत्यैव स्कंभ्य तस्याभावांतरस्यापि सिध्युपगमात्। अप्रसिद्धसाध्यस्यानुमा

१५७ नस्यैकदेशिनामेवानुमततयाभ्युपगमोक्तिः। कंबुग्रीवादिमत्त्वाभावस्य वास्तवाभिधेयत्वव्यापकताविरहात्। अवस्कंभ्य ताभिधेयत्वाभावस्यानुमित्यावगा

157 हनासंभवात्। अप्रसिद्धपटत्वाद्यभावस्य व्याप्यतया गृहीताभिधेयत्वप्रतियोगिकत्वाभावाद्व्यापकाभावेनेत्यादेर्यथाश्रुते संगतिर्बोध्या। व्यवहर्तव्यवि

शिष्टाप्रसिद्धावपि न विशिष्टार्थपरप्रतिज्ञाद्यसंभव इत्याह प्रसेकपदार्थप्रसिध्येवेति। तावतैव भ्रमात्मकस्य व्यवहारोपयोगिविशिष्टज्ञानस्य सं

भवात्। विशिष्टज्ञानं विनापि तत्र विशेष्यांशे तत्तद्विशेषणावगाहित्वेन तात्पर्यघटकप्रतीतेर्ज्ञानेन विशिष्टबोधकवाक्यप्रयोगसंभवाच्चेति भा

वः। मूलकृता सत्प्रतिपक्षहेतुदोषानभिधानात्स्वयं तान्दर्शयति सत्प्रतिपक्षस्त्विति। सत्प्रतिपक्षहेतोर्दोषास्त्वित्यर्थः। ननु कारणमूलेन निरुक्तसत्प्रतिपक्षव्य

वहारविषयतावच्छेदकरूपस्य दोषत्वव्यवच्छेदः। व्याप्यवान्। व्याप्यविशिष्टः। पक्षनिष्ठो। आधेयतया पक्षविशिष्टो। एवमग्रिमादिरिति। आदिपदादाधेय १५८

तासंबंधेन प्रकृतपक्षसाध्यकप्रकृतसाध्याभावादिपक्षकानुमितिजनकपरामर्शविषयप्रकृतपक्षव्याप्यविशिष्टसाध्याभावादिपरिग्रहः। पक्षे साध्या

भाव इत्यादिबाधबुद्धेरपि पक्षे साध्यानुमितिविरोधितया तादृशबाधोन्नायकस्यापि परामर्शस्यानुमितिविरोधित्वेन तद्विषयविशिष्टस्यापि सत्त्व

तिपक्षत्वौचित्यात्‌· अतएवसाध्यतदभाववयोराधेयतयासाध्याभाववत्पक्षव्याप्यवत्त्वाज्ञानसंवलनदशायांपक्षेसाध्यंसाध्याभावोवेतिकोटिविशेष्यकसंशयरूपाना
नुमितिः।प्रत्येकमेवेत्यनेनतावत्समुदायत्वस्यसत्प्रतिपक्षत्वदोषविभाजकत्वासंभवोदर्शितिः।नन्वेवंप्रत्येकरूपस्याव्याप्याविभाजकत्वासंभवात्सर्वसाधारणं
किमेतद्दोषविभाजकमित्याकांक्षायांतादृशरूपमाहविभाजकंत्विति·सर्वत्रप्रकृतेति·पक्षसाध्ययोर्द्वयोरेवान्वेति·प्रकृतपक्षतावच्छेदकावच्छिन्नेप्रकृतसा
ध्यतावच्छेदकावच्छिन्नप्रकारताकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदिकासती विशिष्टपक्षविशिष्टसाध्यग्रहत्वव्यापकप्रति
बध्यतानिरूपितप्रतिबंधकतानवच्छेदकानिरुक्तपक्षसाध्यवैशिष्ट्यग्रहप्रतिबंधकतावच्छेदकविषयतावच्छिन्नानुमितिजनकतावच्छेदिकायादृशाविशिष्टनि
रूपितविषयितातादृशत्वमित्यर्थः।तादृशीचवह्न्यभावव्याप्यविशिष्टह्रदादिनिरूपिताविषयितेतितत्रलक्षणसमन्वयः।साध्याभावव्याप्यविशिष्टपक्षवि
षयितायाः साध्यानुमितिप्रतिबंधकतावच्छेदकतयातदनुमितिजनकतावच्छेदकविषयिताकेसाध्याभावव्याप्यव्याप्यवत्पक्षादावतिव्याप्तिवारकतया
सत्यंतंसार्थकयिष्यते।तत्रनिरुक्तवैशिष्ट्यग्रहप्रतिबंधकतावच्छेदकविषयिताकत्वरूपविरोधित्वांतार्थस्योन्नायकविषयाविशेषणत्वेविषयिताभागस्य
छिद्यानिवेशेगौरवात्‌·उन्नायकताघटकविषयितायामेवप्रतिबंधकतावच्छेदकत्वविशेषणंदत्तं·पक्षतावच्छेदकवैशिष्ट्यनिवेशव्यावृत्तिः·पूर्ववत्‌·उक्तप्रकारताशा
लिग्रहनिरूपितप्रतिबंधकतामात्रनिवेशेसाध्याभावव्याप्यव्याप्यवत्ताज्ञानस्यापिसमूहालंबनसाध्यवत्ताग्रहरूपसाध्याभावव्याप्याभावादिमत्वग्रहप्रतिबं

धकतयानोपदर्शितसत्प्रतिपक्षोन्नायकव्याप्तिरितितादृशप्रकारताकानुमितित्वव्यापकप्रतिवध्यतानिरूपितप्रतिवंधकतानिवेशः।तादृशप्रकारताशालिदो
हे० ग० षविशेषजन्यमाहार्यज्ञानंप्रतिसाध्याभावव्याप्यवत्ताज्ञानस्याप्रतिवंधकतयासत्प्रतिपक्षस्यैवासंग्रहइतिज्ञानत्वमुपेक्ष्यानुमितित्वनिवेशः।ह्रदःकांचनमयवह्नि
१५८ मान्कांचनमयह्रदोवह्निमानित्यादौसंग्राह्यस्यवह्न्यभावव्याप्यविशिष्टह्रदादेर्ज्ञानस्यप्रतिवध्यतावच्छेदककोटौसाध्यतावच्छेदकादिघटककांचनमय
158 त्वादिविषयितायाअनिवेशात्।नतद्घटितंपक्षतावच्छेदकविशिष्टसाध्यतावच्छेदकविशिष्टवैशिष्ट्यग्रहत्वंनोक्तज्ञानप्रतिबध्यतावच्छेदकमित्यव्याप्तिःस्या
दतःस्वरूपसंवंधरूपमवच्छिन्नत्वंपरित्यज्यव्यापकत्वंप्रतिवध्यताविशेषणं।अतएवोक्तस्थलेआश्रयासिध्याद्युन्नायकेविशिष्टपक्षग्रहत्वादिमात्रावच्छि
न्नविरोधिन्यपिविशिष्टपक्षसाध्यवैशिष्ट्यविषयकानुमितित्वव्यापकप्रतिवध्यताघटितविरोधिताशालिनिकांचनमयत्वाभावव्याप्यविशिष्टह्रदादेस
त्वेतद्व्यक्तस्यानिरुक्तसाध्यपक्षवैशिष्ट्यग्रहप्रतिवंधकतावदनुमितिजनकतावच्छेदकविषयिताकत्वरूपतादृशविरोध्युन्नायकत्वस्यचसत्वेनातिव्याप्तिःस्या
दितिउन्नेयं।विरोध्यंतविशेषणं।एतच्चसंग्रहतइत्यादिनास्वयमेववक्ष्यते।उन्नेयतयाप्रविष्टविशिष्टविषये।विरोधित्वविशेषणंयथाश्रुतशब्दलभ्यं।तद १५८
र्थस्तादृशविषयताकान्यत्वंतन्निवेशोऽधिकविषयितादिनिवेशाज्ञौरवं।कांचनमयोह्रदोवह्निमानित्यादौकांचनमयत्वाभाववद्ह्रदादिरूपाश्रयासिद्धिभे
दस्यसत्प्रतिपक्षदोषोन्नेयवह्न्यभाववविशिष्टह्रदादिरूपवाधेऽसत्वेनाव्याप्तिश्चेतिउन्नायकतावच्छेदकविशिष्टघटकवाधविषयितायांविशिष्टपक्षादि

ग्रहप्रतिबंधकतानवच्छेदकत्वनिवेशः। उक्तस्थले बाधग्रहस्याप्यनुमितिरूपविशिष्टपक्षादिग्रहविरोधितया। व्याप्तिताद्वस्थमितिविशिष्ट
पक्षग्रहत्वव्यापकतानिवेशः। विशिष्टपक्षग्रहत्वपर्याप्तानवच्छेदकताकत्वस्य प्रतिबध्यतायां निवेशे कांचनमयरजतमयक्रूदो वह्निमानित्यादेआ
श्रयासिद्ध्याधक्रूनायकेकांचनमयत्वाभावव्याप्यवत्क्रूदाद्यवगतिव्याप्तिः। रजतमयत्वघटितपक्षतावच्छेदकविशिष्टग्रहत्वस्य तज्ज्ञानप्रतिबध्य
तानवच्छेदकत्वात् तस्य उपेक्ष्यता। तादृशग्रहत्वव्यापकतामात्रनिवेशः। अतएव क्रूदो वह्निमानित्यादौ क्रूदत्वादिरूपपक्षतावच्छेदकविशिष्टविषय
कग्रहत्वस्य केवलस्य कस्यापि प्रतिबध्यतानवच्छेदकत्वेपि नाप्रसिद्धिः। न च तादृशग्रहत्वव्यापकप्रतिबध्यतानिवेशे कस्याश्चिदपि विरोधिज्ञान
प्रतिबध्यतायाः ह्रद इत्यादिनिर्धर्मितावच्छेदकज्ञानसाधारणतादृशग्रहत्वव्यापकत्वासंभवात्तथाविधप्रतिबध्यत्वाप्रसिद्धिः। विशिष्टविषयकानुमितित्वव्या
पकतानिवेशे तादृशानुमितित्वस्य निर्धर्मितावच्छेदकज्ञानव्यावृत्तत्वेपि क्रूदो वह्निमान् क्रूदो घटवानित्यादिनानाप्रकारकानुमितिषु क्रूदत्वादिविशिष्टवि
षयकानुमितित्वसत्त्वात् तादृशसकलानुमितीनां कस्यचित् ज्ञानस्य प्रतिबध्यत्वासंभवेन तादृशानुमितित्वव्यापकतानिवेशे प्रतिबध्यतानप्रसिद्ध्यती
ति वाच्यं। कामिनीजिज्ञासादिप्रतिबध्यतायाः एव तथाविधानुमितित्वादिव्यापिकायाः प्रसिद्धेः। यस्य तस्य विरोधित्वांतघटकप्रतिबध्यतायामेव विशि
ष्टविषयकानुमितित्वव्यापकत्वनिवेशान्नाप्रसिद्धिरिति हृदयमिवावेदितं। एतेन कामिनीत्वस्य यत्र पक्षतावच्छेदकता तत्र तद्विशिष्टविषयकानुमिति

हे०ग०
१५९
159

त्वादेः कामिनीजिज्ञासाप्रतिबध्यत्वाव्याप्यत्वेपि न क्षतिः। अथोन्नेयेविशिष्टपक्षादिग्रहाविरोधित्वनिवेशेपि वह्न्यभावव्याप्यव्याप्याभाववान् ह्रदो वह्निमा
नित्यत्र वह्न्यभावव्याप्यव्याप्यविशिष्टह्रदे आश्रयासिध्यात्मकेतिव्याप्तिर्दुर्वारैव। तस्य वह्न्यभावव्याप्यविशिष्टह्रदात्मकसत्प्रतिपक्षस्य विशिष्टपक्षग्रहावि
रोधिन उन्नायकत्वात्। आश्रयासिद्धित्वेनानुमितिविरोधितया सत्वं तदव्याक्रान्तत्वाच्च। न चोन्नायक एवाविरोध्यन्तं विशेषणं विवक्षितं। उक्ताश्रया
सिद्धेश्च विशिष्टपक्षग्रहविरोधितया नातिव्याप्तिरिति वाच्यं। तथा सति वह्निमान् ह्रदो वह्न्यभावव्याप्यव्याप्याभाववानित्यत्र वह्न्यभावव्याप्यव्याप्यविशि
ष्टह्रदात्मकबाधेऽनुमितिविरोधिवह्न्यभावव्याप्यविशिष्टह्रदरूपाश्रयासिध्युन्नायके तिव्याप्तेः। तस्य वह्निविशिष्टह्रदात्मकविशिष्टपक्षग्रहावि
रोधित्वादिति चेन्न उन्नेये उन्नायके चाविरोध्यन्तस्य विशेषणत्वोपगमे नातिप्रसंगस्य वारणीयत्वात्। अथवोन्नेय विशेषणमेवाविरोध्यन्तं य
द्रूपावच्छिन्नप्रतिबध्यताघटितविरोधित्वं सत्वं तादृशः। तद्रूपावच्छिन्नप्रतिबध्यताघटितविरोधितायाउन्नेयविशेषणतया विवक्षितत्वात्। पूर्वो
क्तस्थले च वह्न्यभावव्याप्यव्याप्यविशिष्टह्रदात्मकाश्रयासिद्धेर्विशिष्टपक्षग्रहत्वावच्छिन्नाविरोधित्वेन सत्वं तदव्याक्रान्तायाः तद्रूपावच्छिन्नाविरो १५९
धिनः सत्प्रतिपक्षस्यैवोन्नायकत्वेन नातिव्याप्तिः। उन्नेयबाधस्य उन्नायकसत्प्रतिपक्षस्य च विशिष्टपक्षसाध्यवैशिष्ट्यग्रहत्वं रूपैकधर्मावच्छिन्न
प्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयिताकत्वेन सत्प्रतिपक्षेलक्षणसमन्वय इति। उन्नेयेविरोध्यन्तविशेषणं वह्निव्याप्याभावसा

धूमकेवह्निव्याप्यवत्पक्षात्मकबाधस्यविशिष्टपक्षादिग्रहाविरोधिवह्निमत्पक्षोन्नायकस्यवारकमितिवक्ष्यते·तत्रयथाश्रुतंविरोध्युन्नायकत्वं·प्रतिबंधकताव
च्छेदकविषयिताकविशिष्टविषयिताकानुमितिप्रयोजकत्वं·तत्रप्रतिबंधकतावच्छेदकविषयितायास्तन्निरूपकविषयनिरूपितविषयितात्वेननिवेशनंशिरोवे
ष्टनेननासिकास्पर्शमनुकरोतीतिप्रतिबंधकतावच्छेदकविषयितावच्छिन्नानुमितिप्रयोजकत्वंनिवेशितं·उक्तस्थलेवह्निव्याप्यवत्पर्वतरूपबाधस्यविशिष्टपक्षा
दिग्रहाविरोधिविरोधिविषयकानुमितिप्रयोजकतयातिप्रसंगःस्यादितिविरोधिविषयितावच्छिन्नानिरूपितप्रयोजकत्वंनिवेशितं·अनुमितिजनकत्वरूप
मुन्नायकत्वंनविषयस्येतिअनुमितिजनकतावच्छेदकविषयिताकत्वरूपमनुमितिप्रयोजकत्वमेवात्रतादृशग्राह्यउन्नायकत्वंचेति·यादृशविशिष्टविषयकत्वे
नेतितत्तीयार्थोनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वं·तन्निवेशाद्वह्निव्याप्यवत्पर्वतरूपोक्तस्थलीयबाधेसत्प्रतिपक्षविषयकसमूहालंबनविषयेनातिव्याप्तिः।स्वरूप
संबंधरूपावच्छेदकत्वनिवेशाभावेनसत्प्रतिपक्षैकदेशेकेवलपक्षादौचनातिव्याप्तिः।तच्चेति·तादृशविशिष्टंचेत्यर्थः।साध्यव्यापकाभावप्रतियोगिप्रकृतहेतुमत्पक्षा
दौमतभेदेनविरोधासाधारणरूपेतिव्याप्तिंवारयति·असाधारणेति·प्रतिपक्षविधयेति·अनुमितिप्रतिबंधकेसाध्याभावव्याप्यवत्ताज्ञानविधयेत्यर्थः।सत्प्रतिपक्ष
विपक्षव्यावृत्तत्वमसाधारण्यंसाध्यासामानाधिकरण्यंविरोधइतिमतेअनुमित्यविरोधिनितत्रनोक्तलक्षणातिव्याप्तिप्रसक्तिरतःपक्षइत्युक्तं।प्रतियोगित्वादौ
साध्यादिनापक्षधर्मतापरिग्रहः।तथाचप्रकृतपक्षतावच्छेदकावच्छिन्नपक्षेप्रकृतसाध्यतावच्छेदकविशिष्टव्यापकाभावप्रतियोगित्वविशिष्टप्रकृतसाधनता

हे०ग० वच्छेदकावच्छिन्नवैशिष्ट्यानवगाहिपरामर्शनिष्ठानुमितिजनकतावच्छेदकविषयिकत्वरूपमुन्नायकत्वं विवक्षणीयमित्यर्थः। रूपांतरेण यत्र प्रकृतहेतो
१६० र्व्यतिरेकिप्रतिहेतुना तत्स्थलीयप्रतिपक्षस्य संग्रहाय प्रकृतसाधनतावच्छेदकनिवेशः। रूपांतरावच्छिन्नसाध्यव्यापकीभूताभावप्रतियोगित्वविशिष्ट
160 प्रकृतहेतुमत्पक्षकालीनत्वस्य यत्र प्रकृतसाध्यतावच्छेदकघटकत्वं तत्स्थलीयतादृशसाध्यतावच्छेदकविशिष्टसाध्याभावव्याप्यवत्पक्षात्मकप्र
तिपक्षसंग्रहाय प्रकृतसाध्यतावच्छेदकनिवेशः। यत्र प्रकृतसाध्यव्यापकाभावप्रतियोगित्वविशिष्टप्रकृतसाधनवत्वेन रूपांतरावच्छिन्नपक्षस्य
प्रकृतपक्षतावच्छेदकप्रवेशास्तत्र सत्प्रतिपक्षस्य तादृशपक्षतावच्छेदकविशिष्टसाध्याभावव्याप्यवत्तत्स्वरूपस्य संग्रहाय प्रकृतपक्षतावच्छेदकनिवेशः।
साध्याभाववन्निरूपितान्वयव्याप्तिविशिष्टप्रकृतहेतुमत्पक्षस्यापि लक्ष्यत्वोपगमान्न तत्रातिव्याप्तिः। तस्य साधारण्यमात्रात्मकत्वेन तदनवगाहि
त्वमपि परामर्शविशेषणं देयं। तत्संग्राहकमप्यादिपदं। सत्प्रतिपक्षोन्नायकस्येति। साध्याभावव्याप्यव्याप्यवत्पक्षादेरविरोधितया नाभासरूप
स्येत्यर्थः। आश्रयासिध्याद्युन्नायकस्येति। आश्रयासिध्याद्यंतर्गतस्य पक्षविशेषणाद्यभावव्याप्यवत्पक्षादेरित्यर्थः। आश्रयासिध्यादीत्यादिपदा १६०
त्साध्याप्रसिध्यादिपरिग्रहः। वह्न्यादिसाध्यकबाधस्य किंचिदुन्नायकतयोन्नेये विरोध्यं तद्विशेषणस्य तद्धारकतानसंभवतीति बाधविशेषे
तद्व्यावृत्तिं प्रदर्शयति विरोध्यतेनेति। वह्निव्याप्यवत्पक्षात्मकस्येत्यनेन वह्निमत्पक्षोन्नायकत्वं सूचितं। अविरोध्यंतसार्थक्याय प्रतिबध्यतायास्व

रूपसंबंधरूपपक्षसाध्यवैशिष्ट्यावगाहित्वावच्छिन्नत्वनिवेशासंभवं दर्शयितुं संगच्छत इति· अनेन· लक्षणेन· प्रतिस्थापनात्मकन्यायप्रयोगानौचित्यं दर्शयिष्यन्तस्य सां
प्रदायिकतामाह सत्प्रतिपक्षे चेति· यथासिद्धांतमिति· नैयायिकादिप्रतिवादिनामित्यर्थः। स्वसिद्धांतानुसारेणेत्यर्थः। पंचावयववादीति· ह्रदो न वह्निमान् ह्रदत्वादित्यादि
हेत्वादिः। आदिना मीमांसकसौगतसिद्धत्र्यवयवद्व्यवयवन्यायपरिग्रहः। इच्छंतीति· सांप्रदायिका इति शेषः। उचितं प्रतिभातीति न्व्यादिना न्यायप्रयुक्ते हेतुदोषमात्र
स्यैवाकांक्षितत्वात्प्रथमं तस्तमनुज्ञाप्य विपरीतप्रतिज्ञादिप्रयोगे अर्थांतरस्य दुर्वारत्वादिति भावः॥ ॥इति सत्प्रतिपक्षरहस्यं॥ ॥मूले अधिकबलत्वाज्ञान इति·
अधिकबलत्वस्याज्ञानं यस्मादिति व्युत्पत्त्याऽधिकबलत्वाभाव इत्यर्थः। अधिकबलत्वं च प्रतिबंधौपयिकनिश्चितप्रामाण्यकत्वरूपविशेषणावच्छिन्नत्वं·
बाधाभावात्· बाधकत्वाभावात् प्रतिबंधकत्वाभावादिति यावत्· तथा च निरुक्तविषयकत्वस्य प्रतिबंधकसाधारणतया न तस्य दोषत्वमिति भावः। साध्या
भाववत्पक्षवृत्तित्वमिति· साध्याभाववत्पक्षकत्वं· साध्याभाववत्पक्षविषयज्ञानविषयत्वं· ननु तादृशपक्षवृत्तित्वमतस्ततोऽस्य भेदः। साध्याभावप्रमेति· एतादृश
बाधज्ञानस्य प्रमात्वविषयतानियमेन प्रतिबंधकताध्रौव्यादिति भावः। प्रमात्वं च न साध्याभाववद्विशेष्यकत्वं· पर्वतो ह्रदश्च न वह्निमानित्यादिज्ञानविष
यसाध्याभावमादाय पर्वतादिपक्षके बाधप्रसंगात्· किंतु साध्यवदविशेष्यकत्वं· पक्षतावच्छेदकावच्छिन्नांशे साध्याभाववत्त्वानवगाहने विरोध्यवि
षयकत्वेन प्रतिबंधकत्वाविवादात्तदंशे साध्याभाववत्त्वघटितलक्षणमाह प्रमितेति· स्वविशेष्यकप्रमाप्रकारत्वं· स्वं पक्षः। प्रमात्वं पूर्ववत्· सिद्धं

तिमत्ते विषयितायां न सप्रकारकत्वं किंतु ज्ञानस्यैवातः पक्षनिष्ठसमाधिषत्वप्रकारत्वस्याभावविशेषणतयानिवेशनं विरुद्धं· नच विशेष्यतानिरूपविषयता

दे० ग० यांप्रकारतानिरूपकत्वसत्वाद्विषयतानिरूपितप्रकारत्वनिरूपस्यविषयताप्रकारत्वस्याभाववृत्तित्वाविरोध इति वाच्यं· कार्यत्वकारणत्वयोरिवविशेष्यवि

१६१ शेषणविषयत्वयोर्निरूप्यनिरूपकभावसंबंधसत्वेपि कार्यतायाः कारणमित्याद्यव्यवहारेण तादृशनिरूप्यनिरूपकभावस्य षष्ठ्यर्थताविरहात्· षष्ठीत

त्पुरुषव्युत्पत्त्या विषयताप्रकारशब्देनोक्तार्थाप्रतिपादनात्· सविषयकज्ञानादौ विषयतानिरूपप्रकारतायायादृशसंबंधस्तादृशस्यैव षष्ठ्यर्थत्वात्· प्रकारता

161 यास्तादृशसंबंधस्य विषयतायां सविषयकत्वव्यवहारविरहेणासत्वात्तथा विवक्षितुमशक्यमतः सप्रकारकत्वं विषयताया एव न तु ज्ञानस्य प्रकारताया

विषयतानात्मकप्रयोगित्वादिनिरूपितावच्छेदकतातुल्यावच्छेदकताविशेषनिरूपत्वादित्यतिरिक्तविषयतावाद्येकदेशिमताभिप्रायकतया विषयताप्रका

रत्वपर्यंतनिवेशनं संगमयति दीधितौ अतिरिक्तेति· पक्षे साध्याभावः पक्षनिष्ठाभावप्रतियोगिसाध्यमित्यादिभ्रमायां साध्याभावप्रकारकविषय

तायाः पक्षेऽसत्वाद्यादृशज्ञानमादाय लक्षणसंगमनं तद्दर्शयति· पक्षइति· ज्ञाने पक्षनिष्ठविषयत्वस्य प्रकार इति· तादृशज्ञानीयायाः पक्षनिष्ठविष १६१

यतातन्निरूपितप्रकारताश्रय इत्यर्थः। एतेन पक्षनिष्ठत्वादिकं नाभावादेर्विशेषणं किंतु विषयत्वादेः प्रकाराभाव इति न षष्ठीतत्पुरुषः किंतु कर्मधा

रय इत्यादिकमपि स्फुटीकृतं· साध्याभावप्रमेवेत्येवकारस्य पक्षादेर्दोषघटकत्वव्यवच्छेदपरतानसंभवति· पक्षादिविषयत्वस्यप्रतिबंधकत्वोपयोगित्वा

दृतो हेतुतत्संबंधमात्रव्यवच्छेदकतामाविष्कर्तुं तद्विषयकत्वस्यप्रतिबंधकत्वानुपयोगित्वं तदवच्छेदे हेतुमाह हेत्वादीति · एवं च साध्याभाववत्प्रमाप
दं साध्याभाववत्प्रमाविषयत्वादिरूपविशेषणविशिष्टपरमित्यवधेयं · मूले साध्याभाववतिपक्षे · साध्याभाववत्वेन ज्ञायमाने पक्षे · ननु साध्याभाववत्प्रमाविषयप
क्षकत्वादिरूपदर्शितबाधे पक्षांशे प्रमाविषयत्वमेव निविष्टं न तु साध्याभाववत्त्वमित्युक्तज्ञानदशायां हेतुसाध्याभावसामानाधिकरण्यरूपव्यभिचार
धियो नावश्यकतेति कथमयमाक्षेप इत्याशंकां निराकरोति दीधितौ साध्याभावेति · साध्याभाववत्त्वग्रहस्यावश्यकत्वाभिप्रायेणेति · तद्धितत्प्रकारकत्व
रूपस्य तत्प्रमात्वस्य धर्मिणि तद्वत्त्वघटितत्वादिति भावः । ननु प्रमात्वघटकतया साध्याभाववत्त्वे न धर्मिणो भानेपि न व्यभिचारबुद्धेरावश्यकता येन
रूपेण हेतुमत्त्वज्ञानं तेन प्रकारेण हेतुमत्त्वप्रकारेण बाधधर्मिणि साध्याभावज्ञानस्यैव व्यभिचारज्ञानत्वात् दर्शितसाध्यवदविशेष्यकत्वरूपप्रमात्वप्र
वेशे च साध्याभाववत्त्वबुद्धेरेव नावश्यकत्वमित्यनुशयादाह दीधितौ साध्याभावस्येति · पक्षनिष्ठस्येत्यादिः । मूले असिद्धिः । पक्षधर्मताज्ञानरूपकार
णविरहः । तथा च बाधबुद्धिदशायां अनुमितिविरोधिनो व्यभिचारज्ञानस्य पक्षधर्मताज्ञानरूपकारणविरहस्यावावश्यंसत्त्वान्नतएवानुमित्यनुत्पा
दकत्वं वास्य हेत्वाभासत्वेनेति भावः । संशययोग्यता · साधकबाधकप्रमाणाभावः । तदभावेन · तद्विघटकबाधकमानसत्वेन · एतेन संशययोग्यताविर
हपक्षताविरहयोरभेदाद्धेतुहेतुमद्भावेनाभिधानमसंगतमिति निरस्तं · आश्रयासिद्धिः । पक्षधर्मताज्ञानविषयधर्मिविशेषणतयानुमितिप्रयो

हे०ग०
१६२
162

जकस्यासत्वं सिध्यभावपक्षतामते एतद्दोषस्याकिंचित्करतया पूर्वदोषस्यैवोद्धारमाशंक्य निराकरोति · न चेति · सर्वेपि संहारप्रवृत्तस्याप्तेरिति · सकलहेत्वधि
करणांतर्भावेन साध्यसत्वनिर्वाह्यव्याप्तेरित्यर्थः ॥ दृष्टांत · पक्षभिन्ने · संदिग्धानैकांतिकवत् · व्यभिचारसंशयवत् · साध्याभावांशेसंशयत्वपक्षत्वेपि प्रतिबंधक
त्वादिति शेषः ॥ एतेन साध्याभावांशे निश्चयरूपमेव व्यभिचारज्ञानं प्रतिबंधकमिति पक्षभिन्नान्तर्भावे पिनानुमानोच्छेद इति शंका निराकृता · पक्षे · पक्षां
तर्भावेन · व्यभिचारसंशयात् · सर्वत्र व्यभिचारसंशयात् · अनुमानोच्छेदः ॥ संदिग्धसाध्यकपक्षेनुमितेरनुपपत्तिः ॥ कथंचिदनुमितिसंभवेपि दुष्टहेतुजन्यत्व
संशयात्तत्राप्रामाण्यसंशयात्तत्कार्यानुपपत्तिः ॥ एतच्छंकायाः पक्षइत्यादिग्रंथाश्रुतमूलत्वेनोद्धारो न संगच्छते पक्षे साध्यसंदेहस्यानुमानांगतया पक्षीयव्यभि
चारज्ञानसत्वेनानुमित्यनुपपत्तितादवस्थ्यात् · परामर्शसत्वे व्यभिचारज्ञानस्य साक्षादनुमित्यविरोधितया किंचित्करत्वेन तत्सत्वे बाधनिश्चयदशायां अ
नुमितेर्वारणाय बाधस्य हेत्वाभासतायाआवश्यकत्वादत एव व्याचष्टे दीधितौ पक्षइतीति · व्याप्तेर्निश्चितायामिति प्रकरणं · पक्षे साध्यसंदेहस्यादोषत्वे
पक्षभिन्नेपि तस्यादोषत्वं स्यादिति प्रतिबंधकद्वारा यपक्षइत्यत्रैतत्सममप्यंतर्भावयति · पक्षतत्समयोरिति · तथा च पक्षे तत्समे च व्यभिचारस्याप्य
दोषत्वं तदापि पूर्वं व्याप्तेरनिश्चयएवेति भावः ॥ अविरोधिमात्रार्थकस्यागदस्य व्याख्यानं दोषायेति · एवं च पक्षे व्यभिचारग्रहस्य व्याप्तिनिश्चय १६२
विघटनेनेवानुमितिविरोधिता · पूर्वं व्याप्तिनिश्चये च व्यभिचारसंशयेपि व्याप्तिस्मृत्या विशिष्टपरामर्शसंभवादनुमितिनिष्प्रत्यूहेव · व्यभिचा

रनिश्चयस्य च साक्षादनुमितिविरोधितया साध्याभाववत्तया निश्चीयमाने पक्षे हेतुमत्तानिश्चये व्यभिचारनिश्चयादेवनानुमितिः इति न बाधस्य हेत्वा
भासत्वमिति मूलकाराशयः। अनुमित्युत्पादेन संशयनिवृत्तिः कथं न च शंकिता शा अप्रामाण्यशंकाया अभिरासाय। केचित्तु। पक्षे साध्यसंशयोत्तमानां। अ
नुमितिपूर्वकाले विशेषादर्शनसाहित्येन प्रासक्षिक सिद्धिविघटकतयानुमित्युपयोगित्वं तु कारणं तथा च पक्षे साध्याभाववत्संशयरूपव्यभिचारज्ञानस्या
नुमितिविरोधित्वेपि तादृशसंशये विनष्ट एव परामर्शादनुमितिर्भविष्यतीति नानुमानोच्छेद इत्यपि व्याचक्षते। व्याप्यवत्तापरामर्शस्यापि उत्तरकाले सं
शयनिवर्तकत्वसंभवादनुमित्युत्पादस्य संशयनिवर्तकत्वाभिधानासंगतिमाशंक्याह फलतोपीति। तथा च फलद्वारापि संशयनिवर्तकत्वमस्तीति
तत्र दर्शितं। अपिकारकरणेन च स्वतोपि निवर्तकत्वं लभ्यत इति न न्यूनतेति भावः। अत एव। स्वतोविरोधित्वस्यापि तात्पर्यविषयत्वादेव। फल
द्वाराविरोधित्वमपेक्ष्य ज्यायः। परामर्शस्य विशेषदर्शनविधया स्वतः संशयविरोधित्वं युक्तमाह दर्शयति अन्यथेति। एवं चान्यथेति मूलस्य स्वतः
साध्यसंशयानिवर्तकत्वे इत्यर्थः। साध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञाने धर्मिणि साध्याभाववत्त्वग्रहो विशेषणतावच्छेदकप्रकारकज्ञान
विधया पूर्वमपेक्षित इत्यभिप्रायेणाशंकते मूले पक्षे साध्याभावप्रतीतेरिति। ज्ञानद्वयरूपे साध्याभाववान्पक्षः पक्षो हेतुमानित्याकारे हेतुमान्प
क्षः साध्याभाववानित्याकारकैकज्ञानरूपे च व्यभिचारग्रहे साध्याभावग्रहस्य पूर्वमनपेक्षा इत्याशयेन पक्ष इत्यादिनोद्धारः। साध्याभावहेत्वोः

संबंधोल्लेखिनीति॰हेतुसंबंधितया ज्ञायमानेसाध्याभावविषयिणीत्यर्थः। एतेनधर्मिविशेष्यकपरामर्शयोर्भेदेपिनक्षतिः। दीधितौहेत्वाभासस्य॰दुष्ट
दी०गा० हेतुजन्यत्वस्य॰अनुमित्याभासतां॰अनुमितिभ्रमत्वं॰मूले तत्रव्यभिचारज्ञानमितिधूमादिरूपहेतौकांचनमयत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वज्ञानमि
१६३ त्यर्थः। एतादृशज्ञाननिराकरणंचानुमित्सौपयिकव्यापकतानवच्छेदकेनाप्युपनीततद्रूपेणसाध्यानुमितौतद्रूपावच्छिन्नसाध्याभाववद्वृत्तित्वमपि
साक्षाद्विरोधितयादोषत्वमप्यपेत्यानुमितेःपूर्वंतदज्ञानएवतस्यनहेत्वाभासतेत्यभिमानेनानुमितिपूर्वमज्ञानंबाधसाधारणतया। किंचित्कर
मित्यभिधायेममभिमानंनिराकुर्वतेतन्मतंदूषयिष्यति॰विशिष्टस्याप्रसिद्धेरिति॰अनुमितावेवयत्रकांचनमयत्वेनवह्निमानंतत्रकांचनमय
163 त्वविशिष्टवह्नेः पूर्वमज्ञानेनप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानाभावेनव्यभिचारघटकाभावस्यप्राक्ज्ञानासंभवादित्यर्थः। भ्रमात्मकप्र
तियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानादेवव्यधिकरणधर्मावच्छिन्नाभावबुद्धेः साचभ्रमो विरोधदर्शिनामाहार्य एवेत्याशयः। अतएव
च॰तादृशाभावस्यपूर्वमज्ञानादेव॰पक्षासिद्धिः। पक्षताविरहेपिनेत्यर्थः। सिसाधयिषाविरहपक्षताविरहस्याप्रसक्तेः साध्याभावाज्ञानस्यतादृशप
२५ क्षतानुपपादकत्वाच्च॰साधकबाधकमानाभावपक्षताविरहप्रसंजकंदूषयति॰दीधितौपक्षासिद्धिरित्यस्येति॰विशिष्टप्रतियोग्यप्रसिद्ध्याव १६३
पिनाभावाप्रसिद्धिरित्याह मूलेव्यधिकरणेति॰व्यभिचारस्य॰कांचनमयत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वरूपस्य॰कदाचिदप्यज्ञानेव्यभिचारस्यन

वारुवत्वमत आह ज्ञानं च तस्येति· अनुमितेः पूर्वमित्यानेयादिना हेत्वाभासतानुपाताद्बाधस्यापि सा न स्यादिति प्रतिवृंदिसूत्रं च नाय बाधस्येवेति· कांच
नमयत्वावच्छिन्नवह्न्यभावरूपभवन्मतसिद्धस्य मत्वप्रयोजकवाधस्येवेत्यर्थः। अनुमित्यनंतरमेवेति· विशिष्टप्रतियोगिज्ञानात्मकानुमित्यातन्मूल
कस्मरणादिनावाभावग्रहसामग्रीसंपत्तेरिति भावः। अनुमितावेवभानमिति· पूर्वं यत्र तज्ज्ञानं तत्र व्यभिचारग्रहस्यापि संभवेनानुमितेरेवानुदयादि
ति भावः। विशिष्टस्य पूर्वमज्ञानादिति· विशेषणांतरविशेष्यतापन्नविशेषणकज्ञानमात्रमेव विशिष्टविशेषणज्ञानं हेतुरित्यभिप्रायेण कांचन
मयत्वादिना विशिष्टस्य वह्न्यादेर्ज्ञाने पि तद्रूपावच्छिन्नतदभाववज्ज्ञानानियमान्न व्यभिचारग्रहनियम इत्यालोच्य उक्तानुमितेराभासताप्रयोजकमन्यदाह
वह्न्याविति· लिंगस्य· कांचनमयत्वव्याप्यस्य वह्न्यावसिद्धेः। व्यभिचाराद्येतस्य वह्निह्रदौ कांचनमयस्येत्यादेः। यद्यपि वह्नौ कांचनमयत्वभानस्य तत्र तद्व्या
प्ति विशिष्टवत्ताज्ञानाधीनतया न च तद्धत्वांशे नुमितेराभासत्वे उक्तासिद्धिव्यभिचारयोः प्रयोजकत्वमसंभवदुक्तिकं तथाप्यनुमितौ विधेयता
वच्छेदकता हेतुतया च्छेदकताविलक्षणप्रकारतात द्व्याप्यवत्ताज्ञानप्रयोज्येति नियमानुरोधेन· यद्विकांचनमयत्वावगाहितायास्तद्व्याप्यवत्ताज्ञा
नाधीनत्वमंगीकरोति तं दते दूषणं· अनुमित्युपनीतभानवादिना ताद्दशानियमांगीकारे नुमित्युपनीतभानमत विशेषस्येवोच्छेदः। सर्वैरेव तद्व्याप्यवत्ता
ज्ञानात्तदनुमित्युपगमादिति तेन ताद्दशानियमो नाभ्युपेयत एवेत्यभिसंधाय दीधितिकार आह लिंगस्येत्यभ्युच्चयमात्रमिति· उक्तस्थले पक्षानिष्ठस्य

दी० ग०
१६४

कांचनमयत्वावछिन्नवन्ह्यभावस्यानुमित्याभासताप्रयोजकत्वेपि अनुमित्याभासताया हेत्वाभासाधीनत्वनियमो न सिध्यतीति नोक्तबुद्धेर्बाधस्य हेत्वा-
भासतासिद्धिरित्याह मूलेन चेति· अप्रमात्वं· भवतोच्यत इति शेषः। न च साध्याभाववत्त्वस्य नंतरं प्रकृत इति पूरणीयं· प्रतिबंधकस्य नंतरं भवितुमर्हतीति·
अत्र कुत इत्याकांक्षायामाह दीधितावनुमितेः पूर्वमिति· अनुमित्यात्मकविशिष्टसाध्यज्ञानोत्तरं तदभाववज्ज्ञानसंभवेपि तज्ज्ञानपूर्वोत्पन्नायामनुमिता-
वप्रतिबंधकत्वादनुमित्यंतरानुत्पादस्य च यपक्षे हेतुमत्ताज्ञानसत्त्वे तदात्मकव्यभिचारज्ञानादेव निर्वाहात्तदभावस्य हेत्वाभासतेति भावः। एतेनानु-
त्पन्नायामप्यनुमितौ विशिष्टविषयकमानसादिज्ञानसंभवेन विशिष्टसाध्याभावज्ञानोत्पत्तावपि न क्षतिः। व्यभिचारधीसत्त्वादेवानुमित्यनुत्पाद-
निर्वाहे बाधस्याविरोधित्वात् तत्कल्पनाया नियुक्तिकत्वादिति भावः। तद्रूपावच्छिन्नस्य व्यभिचारस्य तद्रूपावच्छिन्नव्यापकताग्रहाधीनानुमिताविव
विरोधित्वयोपनीततद्धर्मविशिष्टसाध्यानुमितौ कांचनमयत्वावच्छिन्नाभाववद्वृत्तित्वरूपव्यभिचारोऽकिंचित्कर इति कथंचिद्विशिष्टसाध्य-
ज्ञानाधीनबाधग्रहदशायामुक्तानुमितेर्वारणाय बाधस्य हेत्वाभासत्वमावश्यकमित्यनुशयादनुमितावुपनीतस्यैव भानं दूषयति मूले वस्तु- १६४
तस्त्विति अनुमितावुपनीतभानेबाधकमप्याह अन्यथेति· यथार्थानुमित्युच्छेद इति· भ्रमाभिन्नानुमित्युच्छेद इत्यर्थः। न तत्र बाधो दोष इति· यत्र यत्-
सिद्धिरनुद्देश्या तत्र तज्ज्ञानविरोधी प्रकृते न दोष इति न उद्भावनान्नवादिविजयस्य इत्यर्थः। तुल्यं स्वार्थानुमानेपीति· प्रकृतहेत्वधीनं यत्र यदवगा-

हित्वं तत्र तस्य ग्राहकाभावे रोधेन काञ्चनमयत्वादिना वह्न्याद्यभावस्याप्रकृतहेतुदोषत्वमिति प्रकृतहेतोरदुष्टतयानुमितेरप्रमात्वानुपपत्तिर्भवतामपीत्यर्थः। इतरबाध
सहायं इतरबाधग्रहसहितं विशेषानुमापकं अगृहीतबाधस्य विशेषस्यानुमापकं बाधकानां इतरबाधग्राहकानां आभासत्वे अप्रमाजनकत्वे यस्य
बाधोगृहीतस्तस्य पक्षतो बाधितत्वमिति यावत् तस्याप्रयुक्तमिति परिशिष्यमाणविशेषबाधप्रयुक्तमित्यर्थः। आभासत्वं अप्रमाजनकत्वं अनुमित्सप्रतिबं
धेनेति स्वरूपसतो बाधस्याप्रतिबंधकत्वात्तज्ज्ञाने च विशेषानुमापकताया एवानुपपत्तेरिति भावः। बाधस्य विशेषबाधस्य अदोषत्वादिति तथा च नततः सामा
न्यतोदृष्टानुमानस्याप्रमाजनकत्वनिर्वाह इति भावः। यद्यपि तादृशबाधावतारस्य कदाचिद्विशेषानुमित्यनुत्पादप्रयोजकतया तस्य हेतुदोषत्वं यत्र तदनव
तारस्तत्र साध्यप्रविशेषानुमितेराभासताप्रयोजकत्वं चानयवादमेव तथापि कदाचिदनुमित्यनुत्पादप्रयोजकज्ञानविषयत्वसंभवेन तत एव स्वतंत्रहेत्वाभास
तानिर्वाहेनुमित्साभासताप्रयोजकत्वाभिधानमनुपयुक्तं विशेषानुमितिविरोधितया व्यभिचाराद्यसंकीर्णहेत्वाभासता च पक्षधर्मताबलेनेत्यादिना सिद्धांतयि
ष्यत एवेति तात्पर्यं दूषकः। अनुमितिप्रतिबंधकः। विरोधित्वाद्विशेषादिति साध्याभावस्येव तद्व्याप्यस्यापि साध्यविरोधित्वादित्यर्थः। साध्याभावसंबंधश्चि
हेतोरित्यादिः हेतुमत्तया ज्ञायमाने पक्षे साध्याभाववत्त्वमित्यर्थः। व्यभिचारः। व्यभिचारग्रहः। व्यभिचारग्रहविधया दूषणं भवतीति शेषः। साध्याभावव्याप्य
सामानाधिकरण्यमिति तस्येत्यादिः हेतुमत्तया ज्ञायमानेपि पक्षे साध्याभावव्याप्यवत्त्वमित्यर्थः। बाधः। बोधविधयैव दूषणं तस्य व्यभिचारानात्मकत्वा

हे०गा०
१६५
165

द्रिति भावः। वह्नित्वादिकमेवेति। वह्निरनुष्ण इत्यादौ। बाधस्यत्वे इति शेषः। व्यभिचार एव। व्यभिचारग्रह एव। अनुमितिविरोधीति शेषः। तुल्यवत्वेनेति उभयत्र च बलप
दं बलवज्ज्ञानपरं। तथा च यत्रोष्णत्वादिसाधकवह्नित्वादेरधिकबलवज्ज्ञानं तत्र सत्प्रतिपक्षताविरहेण बाधस्यासांकर्यमिति भावः। तच्च व्याप्तिपक्षधर्म
तात्मकं गमकतौपयिकरूपं च। द्वयोरपीति। साध्याभावसाधकवह्नित्वादेरिव प्रकृतहेतोरपि ज्ञातं। अन्यथा। कारणविरहादेवानुमित्यनुत्पादेन बाधेन
बाधस्य हेत्वाभासत्वासिद्धिरित्यर्थः। गमकतावच्छिन्नं तं। गमकतानौपयिकं। साध्यव्याप्यवत्ताबुद्धेः प्रमात्वं गमकतानौपयिकमपि सत्प्रतिपक्षविघट
कं बलवद्विरोधिव्याप्यवत्ताबुद्धौ तद्व्याप्यवत्ताप्रमात्वनिश्चयस्योत्तेजकत्वोपगमादिति। साध्याभावव्याप्यवत्ताज्ञाने प्रमात्वनिश्चयदशायां सत्प्रतिपक्ष
ताविरहेण बाधस्यैव दोषत्वं। बाधश्च प्रमितसाध्याभावव्याप्यवत्पक्षकत्वं। न चोभयत्राप्रामाण्याग्रहदशायामनुमितिप्रतिबंधकं तत एव तादृशबाधग्रह
दशायामनुमित्यनुत्पादनिर्वाहे तादृशबाधबुद्धेः प्रतिबंधकत्वान्तरमप्रामाणिकमिति वाच्यं। तादृशप्रतिबंधके प्रकृतपरामर्शप्रमात्वग्रहस्योत्तेजकतया
उभयत्राप्रामाण्यग्रहदशायामनुमितेर्वारणाय प्रतिबंधकत्वान्तरकल्पनाया आवश्यकत्वादिति शंकते अथेति। अनन्यथासिद्धत्वं प्रमात्वं। ततः। सा १६५
ध्याभाववत्ताबुद्धितः। साध्याभावानुमिताविति। बाधकविरहेणेति शेषः। अनैकान्तिकत्वमेव। व्यभिचारज्ञानमेव। अनुमितिविरुद्ध्यादिति शेषः। इदमा
पाततः। तादृशसाध्याभावानुमित्युत्पादकाले साध्यानुमितेर्व्यभिचारज्ञानेनावारणात्। किं त्वेकत्राप्रामाण्यग्रहस्थलेऽन्यत्राप्रामाण्यग्रहोत्पत्त्यैवानुमित्यु

त्पत्यनुपगमे नोक्ताप्रामाण्यग्रहोत्तेजकताया अनुपगमात् उभयत्र प्रामाण्यग्रहे तदग्रहस्य तयोरप्रामाण्यग्रहानास्कंदितविरोधिव्याप्यवत्ताज्ञानप्रति
बंधकतयैवोपपत्तेः प्रतिबंधकत्वांतरं निर्युक्तिकमित्येव दूषणं बोध्यं इति यदुक्तमिति इत्यनेन दृष्टांतविधयाऽयं साध्याभाववत्ताज्ञानस्य स्वातंत्र्येण दूषकत्व
मुक्तमित्यर्थः। हेत्वाभासांतरतापत्तेरिति पक्षनिष्ठसाध्याभावमात्रस्य व्यभिचारानात्मकतया बाधत्वस्यापि तत्रानुपगमेन उक्तेनेनंतर्भावादिति भावः। हे
तुतः साध्यसिद्धिसंभावनायामिति हेतोः साध्यसाधकप्रमाविषयत्वसंभावनायामित्यर्थः। व्यभिचारासिद्धेरिति तादृशप्रमाविषयत्वस्याव्यभिचा
रनियतत्वादिति भावः। व्यभिचारादेवासाधकतासिद्धप्रपगमे दोषमाहान्यथेति बाधसिद्धेरेव व्यभिचारसिद्धेः नोपजीव्योपजीवकभावइति दूष
यतिनेति सैव दोषइति मातत्वेनैव प्रतिबंधिकाः लाघवात् ननु व्यभिचारज्ञानतया व्यभिचारस्य गुरुशरीरत्वादित्यर्थः। पक्षातिरिक्तेहेतुसाध्याभा
ववत्वग्रहदशायामनुमितिवारणाय व्यभिचारधियः प्रतिबंधकताया आवश्यकत्वात् गौरवमकिंचित्करं साध्याभावप्रमायाः प्रतिबंधकत्वांतर
कल्पनएव गौरवमिति दूषयति ससमिति साध्याभावप्रमाप्रतिबंधिकेसादिः। अन्यत्र तथा दूषकताकल्पनादिति प्रत्यक्षादौ साध्याभाववत्प
क्षकत्वपर्यंतज्ञानस्य प्रतिबंधकत्वाकल्पनादिति शेषः। तथाचानुमितौ तज्ज्ञानप्रतिबंधकतायामुक्तयुक्त्यनवकाशाद्धेतुदृष्टित्वेपि तस्य हेत्वाभासत्वेना
स्तीति भावः। पक्षेसाध्याभावनिश्चयइति साध्याभाववत्ताने प्रामाण्यसंशयोत्तरं तत्र प्रामाण्यनिश्चयं विना न साध्याभावनिश्चयः। न त्वंसंशयसामग्र्य

दे०ग० निवृत्ते रिति सप्रमात्वनिश्चयाधीनः। एवं प्रमात्वनिश्चयं विना अप्रामाण्यसंशययोग्यतया कथंचिदुत्पन्नोपि निश्चयो नानिश्चयकार्यकारी। अ
१६६ तस्तस्य निश्चयस्य निश्चयकार्यकारित्वमपि प्रमात्वनिश्चयाधीनमित्यर्थः। ज्ञानमात्रादर्थनिश्चयइति। प्रमात्वनिश्चयनिरपेक्षात् ज्ञानहेतोः प्रामाण्य
संशयस्थलेर्थनिश्चये तादृशज्ञानाद् निश्चयकार्येऽभ्युपगते प्रामाण्यग्रहवैयर्थ्यं। तदुपायविचारवैयर्थ्यं। अर्थनिश्चयप्रसंगः। न कार्यनिष्कंपप्रवृत्त्या
दिप्रसंगः। इत्तीयाभ्युपगमदूषणमिदं। उपजीव्यत्वेनेति। क्वचित्साध्याभाववनिश्चयात्मकव्यभिचारज्ञानस्वरूपेणोपजीव्यत्वेनेत्यर्थः। अधिकबलत्वेने
168 त्यत्र वऊग्राहिभ्रमं निराकर्तुं दीधितिकृद्व्याचष्टे अधिकबलरूपत्वेनेति। अनुमितिप्रतिबंधकरूपनिश्चयकार्यकारिताप्रयोजकत्वेनेत्यर्थः। एतदुभयस्य
प्रमात्वनिश्चयापेक्षायामेव हेतुतया तदुभयप्रमात्वनिश्चयविशेषणं प्रयत्तिऽपेक्षणीयइति। निश्चयकार्यार्थिभिरवश्यं स्वीकरणीय इत्यर्थः। प्रमात्वनिश्च
यस्य स्वरूपसद्व्यभिचारानिर्वाहकतया व्यभिचारपदं तन्निश्चयपरतया व्याचष्टे व्यभिचारइति। व्यभिचारनिश्चयः। साध्याभावांशे निश्चयकार्यकारिता
प्रयोजकरूपविशिष्टव्यभिचारज्ञाननिर्वाहः। तद्धि निश्चयत्वमिदानिश्चितप्रामाण्यकत्वमपीति पक्षद्वयसंगतिः। व्यभिचारज्ञानस्य साध्याभावनिश्चया १६६
त्मकतया तदधीनत्वकथनासंगतेः साध्याभावनिश्चयपदं करणव्युत्पत्त्या तत्प्रमात्वनिश्चयपरतया वर्णयति। साध्याभावइति। व्यधिकरणाव
ऊग्राहावसहिष्णुतया साध्याभावस्य निश्चयो यस्मादिति न व्याख्यातं। तदधीनत्वं च तल्लिंगाद्यनिश्चयकार्यकारिताप्रयोजकरूपवत्वं। एतच्चेदा

नीज्ञानयोः क्रमिकत्वहेतुत्वेनाभिहितत्वयोक्तं ननु वह्निरनुष्ण इत्यादौ साध्याभावज्ञानादेवानुमित्यनुत्पादात्तत्र प्रमात्वधियः स्वतो विरोधित्वेन तत्प्रमात्वस्य
हेत्वाभासतानौपयिकत्वमित्याशंक्य प्रमात्वज्ञानस्यानुमितौ स्वतः प्रतिबंधकत्वं व्यवस्थापयति यद्वेत्यादि चेति। साध्याभावप्रमात्वबुद्धेः अनुमितिसाधारणतद्वि
भव शिष्टधीप्रतिबंधकतया तस्याः परामर्शे न विशेषदर्शनात्मकेनापि न परिसंभवः। प्रतिबंधकसत्त्वे कस्यापि हेतोः कार्योत्पादकत्वायोगादित्याशंकां निराक
रोति न चेत्यादिना। अगृह्यमाणविशेषः अगृहीताप्रामाण्यः। रजतत्वेनेदं रजतमिति। अप्रामाण्यज्ञानं विनैवेत्यादिः। विशेषदर्शनेनेति। परामर्शरूपे
णेत्यादिः। अनुमानादिति। तथा च विशेषादर्शनविशिष्टत्वेनैव साध्याभावबुद्धेः प्रतिबंधकत्वमुपगंतव्यमित्यनुमितिमात्र एव प्रमात्वेन निश्चि
तसाध्याभावाधर्मो विरोधित्वमिति भावः। प्रमात्मकसाध्याभावज्ञानमेवानुमितिप्रतिबंधकमतो न पीतत्वादिभ्रमदशायामपीतत्वाद्यनुमित्यनु
पपत्तिः। ननु प्रतिबंधकतापि व्यभिचारविधयैव न तु स्वातंत्र्येणेति न तद्विषयस्य बाधहेत्वाभासतेति शंकते अथेति। न हीति। वस्तुगत्या प्रमायाए
व प्रतिबंधकत्वमित्यर्थः। माभूत्साध्याभावज्ञानमनुमितौ स्वतः प्रतिबंधकं तथापि प्रमात्वबुद्धेः प्रतिबंधकत्वमफलं। वह्निरनुष्ण इत्यादौ वह्न्या
दावुष्णत्वादिनिश्चयासत्त्वे तत्प्रमात्वनिश्चयेपि अनुमित्युपगमात्। तन्निश्चयदशायां व्यभिचारज्ञानादेवानुमित्यनुत्पाद इति वाच्यत्वात्। शंखः पीत इ
त्यादौ अपीतत्वाद्यनुमितेर्व्यभिचारधीसत्त्वेपि नानुपपत्तिः। साध्याभावांशे गृहीताप्रामाण्यकत्वस्य व्यभिचारधीप्रतिबंधकतायां निवेश्य

तादितिशंकते· नन्विति· साध्याभाववन्निश्चयं कुर्वदिति। अनुमितिप्रतिबंधरूपनिश्चयकार्यकारितासंयोजकविशेषणवैशिष्ट्यं निर्वा
हे० ग० हयदिति यथाः साध्याभावज्ञानासत्वेपि तद्विषयकप्रमात्वनिश्चयकाले न साध्यज्ञानमित्यनुभवमालंब्य समाधत्तेनेति· तस्यैवेति· तस्यापीत्य
१६७ र्थः प्रतिबंधकत्वादिति· तादृशज्ञानकालेव्यभिचारज्ञानानियमोग्रे दर्शयिष्यः। शाब्दादिसाधारणबुद्धेर्व्याप्याभावप्रमाज्ञानस्य प्रतिबंधक
त्वेपि बाधस्यासाधारणहेतुदोषत्वमुपपादयति हेत्विति· हेतुवृत्तित्वादसाधारणत्वेनेति· हेतुवृत्तितयाविरोधित्वस्यानुमितिमात्रनिरूपितत्वेन
157 त्यर्थः। हेतुनिष्ठसाध्याभाववत्प्रमाविषयवृत्तित्वपर्यंतस्य न दोषतेत्यभिसंधायाह साधारण्येपीति· पक्षे साध्याभाववत्प्रमा इति ज्ञानेप्रमा
त्वघटकतया पक्षे साध्याभाववत्त्वज्ञानेतदपि ज्ञानं व्यभिचारज्ञानरूपमेवेति· दोषांतरज्ञानानात्मकं यत्तज्ज्ञानमनुमितिप्रतिबंधकं स एव दोष इ
ति नियमात्। साध्याभावप्रमाज्ञानस्य शाब्दादिसाधारणविशिष्टज्ञानप्रतिबंधकत्वेपि तद्विषयस्य हेत्वाभासत्वानिर्वाह इति शंकते तेन च साध्याभा
वप्रमेति· हेतुमत्वग्रहविषयतावच्छेदकपक्षतावच्छेदकावच्छिन्ने साध्याभाववत्त्वमनवगाह्यापि पक्षनिष्ठविषयतायां साध्याभाववद्वृत्तित्वावगा १६७
हिनः पक्षे साध्याभाववत्प्रमेति निश्चयस्य पक्षतावच्छेदकविशिष्टे साध्याभावनिश्चयोपजीव्यत्वसंभवान्नोक्तबाधज्ञानस्य व्यभिचारज्ञानरूपतेति
समाधत्ते प्रमात्वेति· पक्षनिष्ठव्याप्याभावस्य बाधत्वमभ्युपेत्यापि बाधस्य पार्थक्यं व्यवस्थापयति पक्षधर्मताबलेनेत्यादिना· साध्याभावबुद्धेः

प्रमात्वज्ञानस्यप्रतिबंधकतांनिराकृत्यतत्प्रमात्वस्यदोषतायाअग्रेस्वयंदूषणीयतयादीधितिकारोवस्तुतोवाधस्यरूपाण्याहात्रेदमित्यादिना।सा
ध्याभाववत्तानिति·अत्रसाध्याभाववत्त्वमनवच्छिन्नंग्राह्यं·अतोनकपिसंयोगवानयंवृक्षइत्यादावतिप्रसंगः।नचानवच्छिन्नत्वानवगाहिनोऽपितद्भा
ववत्ताज्ञानस्याव्याप्यवृत्तित्वाग्रहदशायांतद्धीप्रतिबंधकतयानवच्छिन्नत्वाविशेषितसाध्याभाववत्त्वस्यापिदोषत्वंदुर्वारमितिवाच्यं।प्र
तिबंधकीभूताभाववत्ताज्ञानेनियमतोऽधिकरणांशेसंबंधघटकतयानवच्छिन्नत्वभानोपगमात्·अन्यथाव्याप्यवृत्तित्वज्ञानकालीनज्ञानस्या
विरोधित्वादुक्तज्ञानाभावविशिष्टत्वेनप्रतिबंधकत्वस्योपगंतव्यतयागौरवात्·तदपेक्षयानवच्छिन्नत्वावगाहितयालाघवात्।पूर्वो
क्तेनाव्याप्यवृत्तित्वज्ञानवशादनवच्छिन्नवृत्तिकत्वानवगाहिनोऽभाववत्ताज्ञानस्याव्याप्यवृत्तित्वधीनाश्येऽप्रतिबंधकत्वमिष्टमेव।देशका
लरूपधर्मितावच्छेदकावच्छेदेनतदभाववत्ताज्ञानस्यतदवच्छेदेनतद्धीप्रतिबंधकत्वात्तरकल्पनेमव्याप्यवृत्तित्वज्ञानोत्तेजकताप
र्यन्तावश्यकं·अव्याप्यवृत्तित्वेनज्ञातयोरपिभावाभावयोरेकावच्छेदेनैकत्रानिश्चयात्·नचानवच्छिन्नवृत्तिकत्वावगाहित्वेनाभाववत्ता
नस्यप्रतिबंधकत्वेऽयंसंयोगवांस्तदभाववांश्चेतिसमुच्चयस्यायंसंयोगवान्नवेतिसंशयाऽविरोधित्वप्रसंगः।तस्याव्याप्यवृत्तित्वानव
गाहित्वादितिवाच्यं·समुच्चयस्यकोटिद्वयसामानाधिकरण्यविषयकतयाविरोधभाननिवर्तकतयैवसंशयाविरोधित्वात्·भवतु

दे०ग० ३६८

वाऽव्याप्यवृत्तित्वज्ञानाभावविशिष्टस्य व्याप्यवृत्तित्वानवगाहिनोऽपि ज्ञानस्य प्रतिबंधकत्वं। तथापि वृक्षनिष्ठसंयोगाभावादौ नातिप्रसंगः। तद्विष
यकनिश्चयत्वस्यानुमितिप्रतिबंधकताया व्याप्यवृत्तित्वज्ञानकालीनज्ञानसाधारणत्वेन तदतिरिक्तवृत्तित्वादिति। व्याप्यवृत्तिसाध्यकस्थले
पक्षनिष्ठानवच्छिन्नसाध्याभाववत्त्वमेव बाधः। अनवच्छिन्नसाध्याभाववत्त्वबुद्धेराकालेनरूपपक्षतावच्छेदकावच्छेदेन साध्याभाववत्त्वं तदवच्छे
न साध्यसाधने बाधः। एवं पक्षतावच्छेदकधर्मेनातिरिक्तवृत्तित्वरूपसाध्यावच्छेदकताभानं यत्रोद्देश्यं तत्र पक्षतावच्छेदकसामानाधिकरण्येन
साध्याभाववत्त्वं यत्र च तादृशधर्मसामानाधिकरण्यमात्रेण साध्यसिद्धिरुद्देश्या तत्र तादृशधर्मावच्छिन्नसाध्याभाववत्त्वं बाध इति विशेषो
बोध्यः। पक्षे साध्यस्य यादृशसंबंधोऽनुमितिविषयस्तत्संबंधपर्याप्तिप्रतियोगितावच्छेदकताकोऽभावो विवक्षणीयः। यत्र संयोगादिना साध्यानुमि
तिरुद्देश्या तत्र संयुक्तसंयोगादिसंबंधावच्छिन्नाभावस्याविरोधितया बाधानात्मकत्वात् पर्याप्तिनिवेशः। यत्र संयुक्तसंयोगादिरूपपरंपरासंबंधोऽनु
मितिविषयस्तत्र शुद्धसंयोगादिसंबंधावच्छिन्नाभावो न बाधः। पक्षविषयतानिरूपितसंयोगादिविषयतायाः साक्षात्साध्यविषयत्वानिरूपि १६८
ततया पक्षे संयोगादेः साध्यसंबंधताविरहात्। धर्मितावच्छेदकव्यापकत्वादिविशिष्टसंयोगादिना साक्षात्संबंधेनानुमाने च तादृशाभावो बा
ध एव। उक्तरीतिरग्रेऽप्यनुसर्तव्या। साध्यवदन्योऽवेति। न द्रव्यावृत्तेत्यंताभावस्यैव तद्भेदस्यापि धियो विरोधित्वादिति भावः। एवं च हृदसनि

स्यादित्यत आह आस्तां चेति· तस्यैव· कारणीभूतसंसर्गत्वज्ञानस्यैव· असिद्धिरिव· स्वरूपासिध्यादिरिव· परामर्शस्यानुमितिजनकस्य विरोधितया हे
त्वाभासस्यानुषंगेणान्वयः। नन्वेवमप्रसिद्धसाध्यकानुमितिर्विलीयेत· कोट्यप्रसिध्या साध्यसंशयासंभवादित्यत्रेष्टापत्तिमाह विलीयतां चे
ति· तादृशानुमितेरेकदेशिनामेवानुमतत्वादिति भावः। अथ पक्षसाध्ययोः संसर्गज्ञानस्यानुमितिहेतुत्वेप्यप्रसिद्धसाध्यविशेष्यकानुमितौ
न तस्य हेतुत्वमुपेयं· न वा बाधज्ञानस्य साक्षादनुमितिप्रतिबंधकत्वं· साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः प्रतिबंधकतयैव पक्षे बाधग्रह
दशायां तादृशानुमित्यापत्तेरनवकाशात्कथमप्रसिद्धसाध्यकानुमानानुपपत्तिरिति चेन्न· अभावसाध्यकस्थल एव साध्यप्रसिध्यनपेक्ष्यानुमि
त्युत्पत्त्या तत्र प्रतियोगिमत्ताज्ञानरूपबाधग्रहस्य साध्यप्रसिद्धिं विनापि संभवात्· साध्यप्रसिद्धिप्रतिबंधकतया तादृशबाधग्रहकालेनुमित्याप
त्तेर्दर्शयितुमशक्यत्वात्· तादृशानुमितिस्वीकारेनुमितौ बाधज्ञानस्य साक्षात्प्रतिबंधकत्वस्यावश्यकत्वात्· एवमत्र पृथिवीतरभेद इत्यादिशाब्दबो
धे पृथिवीतरभेदपक्षकधर्मिसाध्यकानुमितौ च साक्षाद्बाधज्ञानस्य प्रतिबंधकत्वमकल्पयित्वा बाधज्ञानकाले तादृशशाब्दबोधतादृशानुमित्यो
र्वारणाय धर्मिणि पृथिवीतरभेदसंसर्गज्ञानस्य तदुभयसंसर्गावगाहिपरोक्षज्ञानकारणताया आवश्यकत्वात्· इतरभेदादिरूपाप्रसिद्धसा
ध्यकानुमितेरुपगमासंभवः। अथ पृथिव्यां पृथिवीतरभेद इति साध्यविशेष्यकानुमितौ पक्षसाध्यसंसर्गज्ञानस्य हेतुत्वासंभवेपि न बाधज्ञान

स्य पृथिवीतरत्वप्रकारकज्ञानत्वरूपस्य साक्षात्प्रतिबंधकत्वाप्रसक्तेः पृथिवीत्वावच्छिन्ने तादात्म्यसंबंधेन पृथिवीतरत्वप्रकारकज्ञानस्यानाहार्यस्याप्रसिद्धे·
हे० ग० रिति तादृशसाध्यविशेष्यकानुमितिरव्याहतैव· न च शुद्धभेदत्वावच्छिन्ने नाहार्यपृथिव्यवृत्तित्वज्ञानरूपबाधज्ञानसंभवात्· तदानीं पृथिव्यामितर
१७३ भेद इत्यनुमित्यादिवारणाय पृथिवीतरभेदसंसर्गज्ञानस्य तादृशापरोक्षज्ञानहेतुत्वमावश्यकमन्यथा तादृशबाधादिबुद्धेरनुमित्यादौ साक्षात्प्रति
बंधकत्वकल्पने गौरवप्रसंगात्· तथा च कथं तादृशी साध्यविशेष्यकानुमितिरिति वाच्यं· तादृशबाधादिस्थले तादृशायामुपदर्शितानुमित्यादिवार
173 णाय भेदत्वावच्छिन्ने पृथिवीसंसर्गज्ञानत्वेनैव तादृशापरोक्षज्ञानहेतुत्वोपगमात्· पृथिवीतरभेदत्वरूपसाध्यतावच्छेदकावच्छिन्नाप्रसिद्धिदशा
यामपि केवलभेदत्वरूपेण पृथिवीसंसर्गज्ञानात्तादृशानुमितेः संभवात्· न चैवं मते साध्यसंशयादेवानुमितेरुपगंतव्यतया संशयस्यैव पक्षता
त्वमिति साध्याप्रसिद्धिदशायां पक्षताविरहेणानुमित्यसंभव इति वाच्यं· संशयं विनापि साध्यनिश्चयकालेपि साधयिषाबलेनानुमित्युत्पत्तेः सि
षाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वस्योपेयत्वात्· साध्यविशेष्यकानुमितौ साध्याप्रसिद्धेः प्रतिबंधकतयैव साध्याप्रसिद्धिदशायाम
नुमितेर्वारणसंभवात्· तादृशानुमितौ संशयाद्यन्यपक्षताहेतुत्वस्य निर्युक्तिकत्वाच्चेति चेन्न· यत्र प्रतिबंधकबाधादिबुद्धेरसंभवस्तत्र साध्यवि १७३
शेष्यकानुमितौ संसृष्टत्वज्ञानहेतुतया निर्युक्तिकत्वेनास्वीकारे दिवा पृथिव्यां जलभेदः ह्रदे धूमाभाव इत्यादिज्ञाने संसृष्टत्वज्ञानहेतुतायाअव

ऽनीयतया तादृशानुमितेरसंभवेन तदभिप्रायेणैव विलीयतां चेत्साध्यं यसंगतेः। न नु पृथिव्यां जलभेद इत्याद्यनुमितेः प्रामाणिकत्वे पृथिव्यां जलभेद इत्या
दिशाब्दबुद्धेः संसृष्टत्वरूपयोग्यताज्ञानस्य हेतुत्वे शाब्दत्वमेव जन्यतावच्छेदकं वाच्यं। तादृशानुमितौ चागत्या बाधबुद्धेरेव साक्षात्प्रतिबंधकत्वमुपेयं। विषयभेदेन
कार्यकारणभेदस्यावश्यकत्वादिति कथं तादृशानुमितिविलय इति वाच्यं। साध्यविशेष्यकानुमितेः सिद्धान्तिभिरनभ्युपगमात्तदनुरोधेनानुमितिविशेषे सं
ताक सृष्टत्वज्ञानहेतुतानभ्युपगमस्य बाधबुद्धेश्च साक्षात्प्रतिबंधकत्वकल्पनस्याप्युक्तत्वमित्याशयेन तादृशानुमितिविलयस्योपगतत्वात्। न च साध्यविशेष्यकानुमि
तेरनभ्युपगमे पृथिव्यां जलादिभेदसाध्यकानुमानस्य पक्षैकदेशे साध्यप्रसिद्ध्यसंभवेऽप्येकव्यक्तिपक्षके तदितरभेदानुमानस्यागतिरिति साध्यविशेष्यका
नुमितिस्वीकार आवश्यक इति कथं तदनभ्युपगम इति वाच्यं। तादृशानुमित्यनभ्युपगमेऽपि साध्याविषयकव्यतिरेकव्याप्त्यवगाहिपरामर्शाद्धीघदर्शनरूपा
तादृशालौकिकप्रत्यक्षस्यैव प्रथमं स्वीकरणीयतया तदात्मकविशेषणतावच्छेदकप्रकारकज्ञानात्तदनन्तरक्षणे साध्यविशेषणकानुमितिसंभवेन सामंज
स्यात्। विशिष्टसाध्याप्रसिद्धावपि अभावत्वादिसामान्यलक्षणया तेन रूपेण साध्यज्ञानस्य पूर्वं संभवेन साध्योपनायकज्ञाननिर्वाहात्प्रथमं साध्यविशेष
णकालौकिकप्रत्यक्षसंभवात्। इदं तु बोध्यं उक्तरीत्या साध्यविशेष्यकानुमित्यनभ्युपगमेऽपि निर्वाहे तादृशानुमितिसामर्थ्यं तरां कल्प्यते प्रयुक्तलाघवानुरो
धेनैव तदनभ्युपगम उचितः। किं तत्र संसृष्टत्वज्ञानहेतुत्वोपरोधः। न च साध्यविशेष्यकानुमित्यनभ्युपगमेऽपि तदुत्तरकालीनसाध्यविशेषकानुमि ण

हे० ग० सनुरोधेनल्क्तसहेतुताका व्यतिरेकपरामर्शादिवत्तन्निर्वाहिपरामर्शकारणताधिक्यविरहान्नगौरवमिति वाच्यं ।तदभ्युपगमे तत्साध्यप्रसिद्धेः प्रतिबंधकताकल्प
१७४ नाधिक्येनगौरवात् ।एवंमेद्यादिधर्मिकेतरादिरूपप्रतियोगिसंशयात्मकपक्षधर्मिकसाध्यसंसर्गसंदेहात्संसृष्टत्वज्ञानहेतुतामतेपिसाध्यविशेष्यकानुमि
तिनिर्वाहः ।विशेषणतावच्छेदकप्रकारकनिश्चयविरहेणसाध्यतावच्छेदकविशिष्टप्रकारकानुमित्यसंभवादिति ।एतेनसंसृष्टत्वज्ञानस्यानुमितिहेतुत्वे
174 महानसीयेतरवह्न्यभाववान्पर्वतइत्येताद्दशेतरबाधधीबलात्पुरुषवह्नित्वादिनाव्यापकतान्महान्महानसीयवह्निमान्पर्वतइत्याकारिकायाविशेष्येविशे
षणमितिरीत्याजायमानायाअनुमितेरनुपपत्तिः ।तत्रमहानसीयत्वविशिष्टवह्न्यादेःप्रागसिद्धत्वात्संसर्गज्ञानासंभवात् ।नचवह्नौमहानसीयत्वस्यपर्वतेचवह्नेःसं
शयात्मकसंसर्गज्ञानात्ताद्दशानुमितिर्भविष्यतीतिवाच्यं ।तथासतिविशिष्टविशेषणकानुमितौविशिष्टज्ञानाहेतुत्वेमहानसीयवह्निर्नास्तीतिबाधग्रहद
शायांविशिष्टवह्न्यादिविशेषणकानुमितिवारणायबाधग्रहस्यसाक्षात्प्रतिबंधकत्वस्वीकारापत्तिरिति परास्तं ।महानसीयवह्निमान्पर्वतइतिवाक्याद्विशे
ष्यविशेषणमितिरीत्याजायमानःशाब्दबोधोयथावांतरवाक्यार्थभूतमहानसीयवह्न्यादिबोधंविनापिवह्न्यंशेमहानसीयत्वसंशयात्मकात्पर्वतेमहा
नसीयत्वविशेष्यतापन्नवह्निकोटिकसंशयरूपयोग्यताज्ञानान्निर्वहति तथाताद्दशसंशयादेवोक्तस्थलेमहानसीयवह्निमान्पर्वतइत्यनुमितिनि १७४
र्वाहात्महानसीयत्वविशिष्टवह्निनिर्णयंविनापिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिनिश्चयरूपकारणाभावात्महानसीयवह्न्याद्यभावप्रा

नासंभवेननोक्तसंशयःसंभवतीतिचेत्शाब्दस्थलेप्येषोनुयोगःस्यात्‌·संशयेति·साध्यसंशयद्वितीयक्षणेयत्रपरामर्शोत्पादस्तत्रद्वितीयक्षणेविनश्यदव
स्थसंशयादनुमितेरेतन्मतेपिनिर्वाहात्संशयासत्वसमयइति·सिध्यात्मकपरामर्शद्वितीयक्षणेयत्रानुमितिस्तत्रासिध्यात्मकसंसृष्टत्वनिश्चया
दनुमितेरेतन्मतेपिनिर्वाहात्सिद्धिसिसाधयिषेविनेति·सिद्धिरूपसंसृष्टत्वज्ञानंसिसाधयिषासहकृतंप्रतिबंधकमितितदुपगमान्निर्वाहकसि
साधयिषायाहानं·परामर्शानंतरोत्पन्नसंदेहादेवतत्रैतन्मतेनुमितिर्भविष्यतीतिशंकांनिराकरोतिसतीति·ननुभ्रमत्वाग्रहविशिष्टबाधनिश्च
यत्वेनप्रतिबंधकत्वापेक्षयाप्रमात्वनिश्चयाविशिष्टबाधज्ञानत्वेनप्रतिबंधकत्वमेवयुक्तं·तदभाववतितत्प्रकारकत्वरूपभ्रमत्वाग्रहापेक्षयातद्वतितत्प्रका
त्व· रकत्वरूपप्रमात्वग्रहस्यलघुत्वात्‌·मन्मतेप्रमात्वेनिश्चयपदस्येव×ज्ञाने×भवन्मतेबाधज्ञानेनिश्चयत्वस्यनिवेशनीयतयासाम्यात्‌·अभावांशेप्रमात्वेन
निश्चीयमानबाधसंशयोपिबाधनिश्चयकार्यकारी·एवंचबाधग्रहासत्वेतत्प्रमात्वनिश्चयसत्वेप्यनुभूयमानानुमितिरप्युपपद्यतेबाधधीप्रमात्वस्य
हेत्वाभासतापिविशेष्यविशेषणभावेविनिगमनाविरहेणप्रमात्वनिश्चयस्यापिप्रतिबंधकत्वात्‌·यद्विबाधज्ञानविशिष्टतत्प्रमात्वग्रहेनुमित्यप्र
तिबंधकेतत्प्रमात्वविषयत्वसत्वेनातिप्रसक्तंतयातस्यनदोषता·तदापक्षनिष्ठसाध्याभावादिविषयकत्वस्यापिप्रतिबंधकतातिप्रसक्तंतयातस्या
पिदोषत्वासंभवः·तत्संभवस्तुप्रमितसाध्याभाववत्पक्षादेरेवेतिशंकांनिराकरोति·एतेनेत्यादिना·एतेनप्रमात्वेनाज्ञायमानेपिबाधग्रहेशाब्दमा

नसादिज्ञानानुत्पादाननुभवेनउक्तलाघवमपिनास्तीत्याहविपरीतमेवचेति·तद्भाववन्निश्चयत्वघटकतत्प्रकारकत्वापेक्षयाप्रमात्वनिश्चयत्वघटकस्यतद्
दे० गा० तितत्प्रकारकत्वाभावाप्रकारकत्वस्यातिगुरुतयाभ्रमत्वज्ञानाभावस्यावच्छेदकतामतेअभावद्वयनिवेशाधिक्यस्याकिंचित्करत्वादितिभावः।भावसा
१७५ ध्यकसाध्यकस्थलेबाधग्रहभ्रमत्वघटकसाध्याभावाभावस्यसाध्यात्मकस्यताद्रूप्येणैवानिवेशात्तादृशस्यभ्रमत्वस्यसाध्याभाववतिसाध्याभावप्रकारक
त्वरूपप्रमात्वापेक्षयालघुत्वेनातिस्फुटतरलाघवमित्याहस्फुटतरंचेति·गोत्वाद्यप्रकारकमिति·एतेनवक्ष्यमाणप्रमात्वज्ञानीयनिश्चयत्वापेक्षयाबा
175 धग्रहनिश्चयत्वस्यविशेषोपिदर्शितः।नचप्रमेयत्वादिनागोत्वप्रकारकनिश्चयसंग्रहायगोत्वत्वावच्छिन्नाप्रकारकत्वंनिवेश्यंतथाचसतिगोत्वाभा
ववान्नवेतिसंशयस्यधर्मिणिगोत्वाभावाभावत्वेनैवगोत्वप्रकारकस्याव्याहतिरितिवाच्यं·तादृशसंशयेधर्मिणिगोत्वत्वेनगोत्वस्यनियमतोभानो
पगमात्·तेनरूपेणतदुपस्थितिसत्वेनतेनतद्वत्वभानेबाधकाभावात्·गोत्वादिमद्विशेष्यकगोत्वाद्यभावप्रकारकत्वाद्यप्रकारकेति·आदिपदाज्ञोत्वा
द्यभाववद्विशेष्यकगोत्वाद्यभावप्रकारकत्वरूपप्रमात्वाभावपरिग्रहः।भ्रमत्वाप्रकारकत्वाभिधानंतुभावद्वयकोटिकसंशयाभ्युपगंतृमतावलंबने
न·ननुभावरूपसाध्याभावज्ञानस्यप्रतिबंधकतायांतद्भाववतितत्प्रकारकत्वरूपभ्रमत्वतद्वतितत्प्रकारकत्वरूपप्रमात्वाभावयोःसमशरीरतयावि १७५
निगमनाविरहेणद्वयोरेवायहोनिवेशनीयौ·तदपेक्षयाचभ्रमत्वाभावरूपप्रामाण्यतोलघुशरीरतद्वतितत्प्रकारकत्वरूपप्रमात्वग्रहस्यावच्छेदकत्वे

लाघवं· भावद्वयकोटिकसंशयानभ्युपगमात्· तन्निश्चयत्वशरीरे भ्रमत्वाभावाप्रकारकत्वमेव निवेश्यते न तु भ्रमत्वाप्रकारकत्वमिति न तदुभयनिवेशानिवं
धनगौरवमिति शंकायां प्रतिवंदीमाह उक्तप्रायं चेति· उक्तप्रायं· उक्तकल्पं· पूर्वमाकांक्षाज्ञानहेतुप्रतिहेतुपरामर्शादिधर्मिकप्रमात्वनिश्चयस्य कारणत्वप्रति
वंधकत्वे आपादिते न तु प्रमात्वनिश्चयविशिष्टानां तेषामिति प्रागयदं· प्रतिवंधकानां प्रतिहेतुपरामर्शादीनां कारणानामाकांक्षाज्ञानपरामर्शादीनां· तथा
त्वापत्तेरिति· यथायोगं प्रतिवंधकत्वस्य कारणत्वस्य चापत्तिरित्यर्थः· तुल्ययुक्त्या प्रामाण्यनिश्चयेपि निश्चितप्रामाण्यकत्वस्य तत्रापि च तथात्वापेक्ष
यानवच्छिन्नप्रामाण्यग्रहधारायाः कार्यग्रहप्रतिवंधादौ अपेक्षिततया स एव न स्यात्· प्रतिवंधकविशेषणपरंपरानवस्था चेति· तत्र तत्र प्रामाण्यनि
श्चयो यदि नापेक्ष्यते तुल्यं तदा घटेपीति भावः· अगृहीताप्रामाण्यकत्वेन प्रतिवंधकतामतेपि न हृद्घटकाप्रामाण्यग्रहे निश्चिताप्रामाण्यकत्वं विशेषणं·
तत्र चागृहीताप्रामाण्यकत्वं विशेषणमित्येवं क्रमेण विशेषणपरंपराअनवस्थितिरिति तु नाशंकनीयं· प्रतिवंधकीभूतनिश्चयविशेषणागृहीताप्रा
फल माण्ये घटकाप्रामाण्यग्रहे निश्चिताप्रामाण्यकत्वानिवेशनात्· तत्राप्रामाण्यनिश्चयदशायां कार्यवारणाय तदप्रामाण्यनिश्चयविशिष्टविपरीतनिश्च
यादीनां अगृहीताप्रामाण्यकत्वानवच्छिन्नानां प्रतिवंधकत्वांतरस्यैव कल्पनीयत्वात्· तादृशाप्रामाण्यनिश्चये चानिश्चिताप्रामाण्यकत्वविशेषिता
प्रामाण्यग्रहाभावस्य विशेषणत्वोपगमात्· तद्वैशिष्ट्यनिवेशफलस्य प्रतिवंधकत्वांतरकल्पनयोपपादनात्· ह्रदस्य धर्मिणि अयं स्थाणुरित्यादिनिश्चया

नंतरं करादिहूपविशेषदर्शने सतिनायंस्थाणुरित्यादिप्रत्यक्षोत्पत्त्याविशेषादर्शनविशिष्टस्यैवविपरीतनिश्चयस्यप्रतिबंधकतावाच्या· तथाचपरामर्शसत्वेवि
हे०ग० परीतनिश्चयेनानुमित्यप्रतिबंधात्· तदसत्वेचकारणाभावादेवानुमित्यनुत्पत्त्यावृथाधस्य नहेत्वाभासतेतिशंकानिरस्यतिनचेत्यादिना· विशेषदर्शनेनतन्नाशा
१७६ नंतरमेवेति· विपरीतनिश्चयानंतरोत्पन्नविशेषदर्शनाधीनविपरीतनिश्चयनाशेसत्येवेत्यर्थः· क्षणमात्रस्यातिसूक्ष्मकालतयातद्विलंबेनफलोपगमेऽनुभव
176 विरोधविरहात्· येपूर्वक्षणेभ्रमसत्वेपिविशेषदर्शनबलात्प्रत्यक्षमंगीकुर्वंतितेषामपिपरोक्षज्ञानप्रतिबंधकतायांविशेषादर्शनवैशिष्ट्यनिवेशोनानुमतः
विपरीतनिश्चयसत्वेसतिविशेषदर्शनेशाब्दादिबोधानुपगमादितिबाधस्यानुमितिविरोधित्वंध्रुवमित्याहपरेरितिति· प्रत्यक्षविशेषएव· तादिंद्रियज
न्यप्रत्यक्षएव· विपरीतनिश्चयविशेषस्यैव· तादिंद्रियजन्यदोषविशेषाजन्यविपरीतनिश्चयस्यैव· तथात्वोपगमात्· विशेषादर्शनविशिष्टत्वेनप्रतिबंध
कत्वोपगमात्· विशेषोपादानप्रयोजनमाहनवेति· दोषविशेषजन्यविपरीतज्ञानसत्वेतदनिवर्तकत्वेनविशेषदर्शनस्याकिंचित्करतयातत्सत्वेपिसमा
नेंद्रियजन्यप्रत्यक्षानुत्पत्त्याविशेषादर्शनविशिष्टत्वमपुरस्कृत्यैवतस्यप्रतिबंधकत्वमितिदोषविशेषाजन्यत्वंविशेषपदार्थइतिभावितंडक्तस्यपत्वेप्ययंस्था
णुरितिभ्रमोत्पत्तिकालेयंनस्थाणुरितिप्रत्यक्षवारणायविशेषादर्शनविशिष्टदोषप्रतिबंधकतायाआवश्यकत्वेनतद्विशिष्टविपरीतज्ञानप्रतिबंध १७६
कत्वमफलमितिबोध्यं· ननुयत्रविपरीतनिश्चयानंतरंतन्निवर्तकंविशेषदर्शनंतत्रविशेषदर्शनस्योत्पन्नविपरीतज्ञाननाशकतयाविपरीतज्ञानांतरो

त्वाद्यविरोधित्वया च प्रत्यक्षनिश्चयोपयोगित्वेपि यत्र शंखत्वादिदर्शनकाले दोषविशेषजन्यः पीतत्वादिभ्रमस्तत्राप्यनुभवसिद्धमानसाद्यपीतत्वा
दिनिश्चये शंखत्वादिदर्शनस्योपयोगित्वं विशेषदर्शनस्योत्तेजकत्वं विना न निर्वहतीत्यत आह दोषेत्युज्यते चेति· अप्रामाण्यग्राहकत्वेनेति· विशेषदर्शन
कालीनविपरीतज्ञानानुव्यवसायेतच्छाप्यवगतितद्विपरीतावगाहित्वभानात्तेन हेतुना तत्राप्रामाण्यानुमितिसंभवादिति भावः॥ यद्यपि यत्रोक्त
क्रमेणाप्रामाण्यानुमितिस्तत्रानुव्यवसायादिनाविनष्टत्वादेव विरोधितानसंभवति तथापि तत्समानविषयकज्ञानांतरस्याविरोधित्वयाप्रा
माण्यग्रहोपयोग इत्यवधेयं· साध्याभाववद्विशिष्टपक्षादेर्बाधत्वेऽपि यत्साध्याभाववति पक्ष इत्यादिपूर्वपक्षग्रंथेन दर्शितानुपपत्तिमाशंक्य निराकरो
ति नचैवमित्यादिना· अज्ञानलक्षणाजनकज्ञानाभावरूपायहेचेति· पक्षे हेतोरित्यनुषज्यते· व्यभिचारधीरेवेति उभयथाप्यनुमित्यनुत्पादे बाधो
किंचित्करइति शेषः॥ बाधग्रहपरामर्शयोर्भेदादिति· तथा च पक्षे हेतुग्रहेपि तस्य साध्याभाववत्त्वज्ञानभिन्नतया न व्यभिचारावगाहित्वा· साध्या
भाववद्वृत्तित्वस्यविशिष्टव्यभिचारत्वात्· साध्याभावविषयकज्ञानस्य विशिष्टाविषयत्वात्· एवं साध्याभावज्ञानस्यापि हेतौ तदधिकरणवृत्तित्वा
नवगाहितया न तद्घटितव्यभिचारावगाहिता· खंडशो दोषघटकपदार्थावगाहिना नाज्ञानस्य च न विरोधितेति बाधादेव तत्रानुमित्यनुत्पा
द इति भावः॥ यत्र परामर्शेपि लौकिकसन्निकर्षाद्दोषविशेषाद्वा पक्षसाध्याभाववत्त्वभानं तत्रापि न व्यभिचारग्रह इत्याह अभेदेपीति· तयो

रिसादिः इति ग्रहस्येति। इत्याकारकस्यैव तत्र सबाधग्रहस्येत्यर्थः। परस्परोपरागानवगाहि न इत्यति। हेतौ साध्याभाववद्विशिष्टधर्मिवृत्तित्वस्य
हे० ग० साध्याभाववद्विशिष्टधर्मिवृत्तिहेतुसत्वस्य चानवगाहिन इत्यर्थः। एतच्च व्यभिचाराविषयकत्वे हेतुगर्भं विशेषणं। विशिष्टव्यभिचारभाने च स्वं
१७७ इत्यादिवत्तद्रूपकमानापहाभावगाहिनानाज्ञानस्यैव विशकलितसमूहालंबनस्याप्यनुमितिविरोधितया बाधएवानुमितिविरोधीति
भावः। ननु तत्र विशिष्टव्यभिचारभाने किं बाधकमित्यत आह एकत्रेति। एकनिश्चयागोचरत्वादिति। तदुभयभाने निश्चयत्वस्यैवानि
र्वाहात्। तन्निर्वाहे च व्याप्तिनिश्चयाभावेनैवानुमित्यनुत्पादादिति भावः। ननु विशिष्टस्य साध्याभाववद्वृत्तित्वादेरेव तद्धर्मिणः साध्याभाववत्त्वा
१७७ दिना सहितं तद्धर्मिणो हेतुमत्वादिकमपि व्यभिचारः। विशकलिततदुभयज्ञानादप्यनुमितिप्रतिबंधस्यानुभविकत्वादित्यत आह स्थलेपि व्यभि
चारनिबंधन एवानुमित्यनुत्पाद इत्याशंक्याह पूर्णेत्यादि। तथा लिंगपरामर्शसमवधाने सति परामर्शविघटकतयैवानुमितिविरोधिनो व्यभिचा
रस्वरूपासिद्ध्यादिग्रहस्यानुमित्यनुत्पादनिर्वाहकत्वादित्यर्थः। तथा च लिंगपरामर्शसमवधाने सति पक्षे साध्याभाववद्ग्रहे वाधादेवानुमितिप्र १७७
तिबंध इति न स्यहेत्वाभासतेति भावः। यादृशबाधग्रहकाले व्यभिचारज्ञानं न नियतं तज्ज्ञानस्य व्यभिचारज्ञानासंकीर्णतयापि बाधस्य पार्थ
क्यं निष्प्रत्यूहमेवेत्याह उक्तश्चेति। न च। नहि। तज्ज्ञ हे। तादृशबाधग्रहे व्यभिचारबुद्धिरावश्यकीति। धर्मिणि साध्याभाववत्त्वस्यैव साध्ये धर्म्यवृत्ति

स्य व्यभिचाराघटकत्वादिति भावः। साध्याभाववद्बुद्धेः प्रमात्वस्य व्यभिचारज्ञानोपजीव्यज्ञानविषयतया हेत्वाभासत्वमिति यन्मूलोक्तं तद्दूषयितुमु
पन्यस्यति· यत्त्विति· निश्चयरूपत्वे· तत्कार्यकारित्वे· अतिप्रसंगः। गृहीताप्रामाण्यज्ञानस्य तथात्वप्रसंगः। न प्रमात्वनिश्चय एवेति· विरोध्यविषय
कोपाधिविशेषः प्रतिबंधक इति· अनुमितावित्यादिः। प्राथमिकत्वं क्वाचित्कमित्यत आह उपजीव्यत्वादिति· न त्वित्यादिना व्यभिचारज्ञानस्य सा
क्षादनुमितिप्रतिबंधकत्वमेव व्यवच्छिन्नं· व्याप्तिज्ञानप्रतिबंधकतायामविवादात्। अन्यथा व्यभिचारस्य हेत्वाभासतानुपपत्तेः। तस्य· पक्षे सा
ध्याभाववद्बुद्धिप्रमात्वनिश्चयस्य· अस्तु तत्त्वादिति· व्यभिचारज्ञानस्य च पक्षातिरिक्ते साध्याभाववद्धेतुमत्त्वावगाहिज्ञानाद्यत्रानुमितिसत्त्वाद्
तत्र प्रतिबंधकता न तु तस्येति भावः। उपजीव्यत्वमपि दूषयति· अगृहीतेति· अन्यथा· निश्चितप्रामाण्यकत्वेन तथात्वे· प्रामाण्यग्रहवैयर्थ्यं उद्ध
रति· अप्रामाण्यशंकेति· क्वचिदिति· यत्र कोट्युपस्थितिसाहित्येपकारणसमवधानं तत्रेत्यर्थः। क्वचिदित्यनेनेदृशोपयोगितायामनवस्था नो
क्तेति सूचितं· व्यभिचारज्ञानस्य साध्याभावांशे निश्चयत्वापेक्षायां प्रमात्वनिश्चयापेक्षा स्यैव नास्ति यतोपि न प्रमात्वनिश्चयोपजीव्यतेत्या
ह· संशयेति· मूलोक्तानिकेतिपयाहृषणानुद्धरस्त्रोऽदूषमतं परिष्कृत्योपन्यस्यति यत्त्विति· बाध इति· असंकीर्ण इत्यादिः। किंचेत्यादि मूलोक्तं दूष
णमुद्धरति· न चेत्यादिना· विशिष्टसाध्याप्रसिद्ध्या· अनुमितेः पूर्वं काचनमयत्वेन रूपविशेषणतावच्छेदकविशिष्टवह्निरूपविशेषणाज्ञाने

नंकथं तद्विशिष्टानुमितिः। कथं तादृशविशिष्टसाध्यविशेषणकानुमितिप्रसक्तिः। तथा च कारणबाधादेव तत्र विशिष्टानुमित्युत्पादसंभवाद्बाधोक्तिं
हे॰ ग॰ चित्करइतिभावः। विशेष्ये विशेषणमिति· अयं भावः। विशिष्टविशेषकं ज्ञानं द्विविधं· तदुपलक्षितप्रतियोगिकवैशिष्ट्यावगाहि तद्विशिष्टप्रतियो
१७८ गिकवैशिष्ट्यावगाहि च· आद्ये· विशेषणज्ञाना संसर्गाग्रहयोरेवापेक्षा· न तु विशेषणतावच्छेदकप्रकारकधियोपि अत एवावांतरवाक्यार्थज्ञानं विने
178 व महावाक्यार्थज्ञानमंगीकुर्वंतीति· न चैवमपि पूर्वं विशिष्टाप्रसिध्धेर्वा विशिष्टप्रतियोगिकज्ञानाभावाद्बाधग्रहो न संभवतीति स्वरूपसतो बाधस्या
किंचित्करत्वेति वाच्यं· प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य विशिष्टविशेषणज्ञानविधया व विशिष्टप्रतियोगिविशेष्यताभावबुद्धौ हेतुत्वा
त्· कांचनमयत्वेन वह्निर्नास्तीत्याकारिकायां स्यात्र येन प्रतियोगितावच्छेदकतया कांचनमयत्वाद्यवगाहिन्यामभावबुद्धौ तदपेक्षाविरहात्· प्रतियो
गिविशेषतापन्नस्य न स्येव प्रतियोगितावच्छेदकत्वभानमिति नियमस्य व्यधिकरणधर्मावच्छिन्नाभाववादिनो नानुमतत्वात्· पूर्वं कथंचिद्विशिष्ट
साध्यज्ञानेनापि बाधग्रहे विशिष्टवैशिष्ट्यविषयकानुमितिकारणांतरसमवधानं च संभवतीत्यपि बोध्यं· ननु विशिष्टज्ञानानपेक्षया कथंचि १७८
द्विशिष्टज्ञानसंपत्त्या वा बाधग्रहसंभवे व्यभिचारोपि गृहीत इति तत एवानुमितिर्न भविष्यतीति किं बाधेनेति दूषणमुद्धर्तुं तत्र कांचनमयत्वावच्छि
न्नवह्न्यभावरूपबाधतादृशाभाववद्वृत्तित्वरूपव्यभिचारयोः कांचनमयत्वविशिष्टवह्न्यनुमितिविरोधित्वाविरोधित्वे दर्शयति शुद्धसाध्येति·

अप्रसिद्धविशिष्टसाध्यानुमितीति॰ पूर्वाज्ञातकांचनमयत्वादिविशेषितवह्न्यादेरनुमितिसंभवादित्यर्थः। तदभावः। कांचनमयत्वाद्यवच्छिन्नवह्न्यभावः।
बाधोऽस्तु॰ विशिष्टसाध्ये साधनीये बाधस्वरूपप्रकृतहेतुदोषोऽस्तु॰ विशिष्टसाध्यव्याप्तिग्रहविषयत्वयेवोपनयादिसहकृतशुद्धसाध्यव्याप्तिग्रहविषयतयापि
प्रकृतहेतोर्विशिष्टसाध्यवत्वभानप्रयोजकतया बाधग्रहदशायां तस्य तदनुमापकतायां बाधग्रहस्य प्रतिबन्धकत्वात्॰ तादृशबाधग्रहस्य शुद्धसाध्यानुमित्यविरो
धित्वे विशुद्धसाध्ये साधनीये तस्य दोषत्वानुपगमेन क्षतिविरहादिति भावः। तेन रूपेण॰ कांचनमयत्वादिसहितवह्नित्वादिना॰ तथा व्यभिचारः। कांचनमय
त्वाद्यवच्छिन्नवह्न्याद्यभाववन्निष्ठत्वं॰ न दोषायेति॰ हेत्वधिकरणपक्षातिरिक्तमात्रे कांचनमयत्वाद्यवच्छिन्नवह्न्याद्यभाववत्ताग्रहे पक्षे कांचनमयत्वाद्यवच्छिन्नव
ह्न्याद्यनुमित्यनुपगमेनानुमितौ साक्षाद्व्यभिचारज्ञानस्याविरोधित्वेऽपि कांचनमयत्वादिसहितवह्नित्वावच्छिन्नविधेयताकानुमितावेव तथा व्यभिचारधियो
विरोधित्वात्॰ कांचनमयत्वाद्यवच्छिन्ननिरूपितव्याप्तिज्ञानाजन्यानुमितौ कांचनमयत्वाद्यंशे विधेयतावच्छेदकतारव्यविलक्षणविषयताविरहेणोक्तव्यभिचार
धियो विरोधित्वादिति भावः। अथ व्यधिकरणकांचनमयत्वाद्यवच्छिन्नवह्न्यभाववतीतौ कांचनमयत्वमेव प्रतियोगितावच्छेदकतया भासते॰ समानाधिकरण
वह्नित्वादिकं तु प्रतियोगिन्युपलक्षणतयैव तस्य प्रतियोगितानवच्छेदकत्वात्॰ एवं च कांचनमयवह्निमानित्यनुमितौ कांचनमयत्ववह्नित्वयोः प्रतियोगिता
वच्छेदकत्वपर्याप्तिकग्राहि बाधग्रहस्यैव प्रतिबंधकतया नोक्तबाधज्ञानस्याविरोधितेति कथं सहेत्वाभासः। न चोभयप्रकारेण साध्यानुमितावेकधर्मांशेऽप्य

छेदकत्वमवगाह्यान्यत्र च प्रतियोगितायाः सामानाधिकरण्यावगाहित्वेनैव प्रतिबंधकतेति वाच्यं तथा सति कांचनमयत्वेनैव वह्निर्नास्ति महानसीयः स्तीति धि
हे०ग० यो ऽपि कांचनमयवह्निमानित्यनुमितिविरोधितापत्तेः अधिकं तु लिख्यादित्यायेनेतरसामानाधिकरण्याभानस्य प्रतिबंधकतायामतंत्रत्वात् न चैकांशे स्वरूप
१७९ संबंधरूपस्यापरांशे चानतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्यावगाहनं प्रतिबंधकत्वे तंत्रं ईदृशप्रतिबंधकतायाः क्वाप्यक्लृप्तत्वात् तावतापि कांचनमय
त्वेन वह्निघटोभयसामान्यं नास्तीति ज्ञानस्य कांचनमयवह्निमानित्यनुमितिविरोधितायाऽवारत्वाच्च एवं प्रतियोगिविशेषणतयाभासमानधर्मस्यापि
179 समानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वोपगमेन कांचनमयवह्निर्नास्तीत्यादिभ्रमद्वयकांचनमयत्वेन वह्निर्नास्ती
त्यादिबुद्धावपि कांचनमयत्ववह्नित्वयोः प्रतियोगितावच्छेदकतापर्याप्तिभानांगीकारात् न चामिलितत्वाऽभासमानयोः प्रतियोगिविशेषणतया
स्यात् त्र्येण च भासमानयोरुभयोर्मिलितयोः प्रतियोगितावच्छेदकतापर्याप्तिभानं कांचनमयेनास्ति वह्निर्नास्तीत्यादाविव उघटमिति वाच्यं एकस्यां
प्रतियोगिविषयतायामवच्छेदकतया भासमानयोरिव यदुभयधर्मावच्छिन्नप्रतियोगिताकत्वविषयतयोरभानिश्चे×व×कविषयतानिरूपितत्वं तयोरपि १७९
मिलितयोः प्रतियोगितावच्छेदकतापर्याप्तिभानोपगमादित्यलंपल्लवेन अन्यथा पूर्वोपस्थितसकलभाने इत्यादिमूलोक्तमनुमित्युपनीतभानदूषण
मुद्धरति उपनीतसकलभाने चेति प्रत्यक्षेऽपि तुल्यमिति तथा च प्रत्यक्षमात्रस्यैवानुमितिमात्रस्यापि किंचिदंशेऽप्रमात्वमिष्टमेवेति भावः। तावता च बाद

णोननिग्रहइत्याह।उद्देश्यांशइति। वादिनो याद्दृशसिद्धिरनुद्देश्यात् तदंश इत्यर्थः। अनुमितेरप्रामाण्यमिति। वादिसंपादितानुमितेर्भ्रमत्वमित्यर्थः। नवादिविजयप्र
योजकमिति। नवादिकर्मकप्रतिवादिविजयप्रयोजकमित्यर्थः। यत्सिद्धिर्वादिन उद्देश्या तत्साधनपर्यवसायिहेत्वाभासस्यैव निग्रहस्थानत्वात्। उद्देश्यांशेनुमितेरप्रामाण्यएव
तादृशदोषसंभवादिति भावः। एतत्समाधानमपि मूलेशंकाक्रमेणाभिहितं इत्यवधेयं। मूलस्थायाः अनुमितावुपनीतभानस्याप्रामाणिकत्वोक्तेर्विवरणेनबाधकांत
रप्रदर्शनेन च मतन्निराकरोति तत्वेत्यादिना। प्रत्यक्षेपि ज्ञानं यदि विशेषणज्ञानादिमुख्यास्वविषयभासकं तदानुमितावपि तस्य तथात्वं उवारमेव। विशिष्टानुभव
त्वाद्यवच्छिन्नं प्रत्येव विशेषणज्ञानादेर्हेतुतयानुभवसामान्यएव तस्य स्वविषयभासकतासंभवात्। अतएव ज्ञानस्य संनिकर्षविधयातथात्वं व्यवस्थापयति प्र
त्यक्षेहीति। अनुमित्यादौ यदि नोपनीतस्य भानं तदा प्रत्यक्षेपि मास्तु विशेषादिति किं ज्ञानस्य सन्निकर्षत्वेनेति प्रतिबंधकद्वारा या होपनीतभानस्येति। उपनीतत्व
त्वादि विषयकत्वस्येत्यर्थः। प्रत्यभिज्ञानादाविति आदिना धरो नास्ति सुरभिचंदनमित्यादि प्रत्यक्षपरिग्रहः। उपनयोपीति। ज्ञानमपीत्यर्थः। सन्निकर्षः स्वविषये
मनसः सन्निकर्षः। कल्प्यत इत्यस्य विषयभासकत्वेनेत्यादिः। तद्वलाच्च नोपनीतस्यानुमितौ भानं। प्रत्यक्षत्वस्य सन्निकर्षजन्यतावच्छेदकत्वादिति भावः। न
नु रूपनायकज्ञानस्य प्रत्यक्षत्वं कार्यतावच्छेदकं। तथापि विशेषणज्ञानबाधाद्यभावबलादनुमितावुपनीतभासतामित्यत आह। नुमितावपीति। न सामग्र्यं
तरकल्प्यनेति। अयं भावः। विशेष्यभासकसामग्रीनिरपेक्षं केवलबाधाद्यभावसहितं विशेषणज्ञानविधया हेतुभूतं ज्ञानं न स्वविषयभासकं। अतिप्रसंगात्

विशेष्यभासकसामग्री च प्रत्यक्षानुमित्योरननुगतेति प्रत्यक्षसामग्रीसहितमेव तत्तथा न तु अनुमितिसामग्रीसहितं तादृशस्य तथात्वे कल्पकाभावात् कांच

हे०ग० नमयत्वव्याप्यवान्वह्निः कांचनमयवह्निव्याप्यवान्पर्वत इत्यादिपरामर्शघटितवह्न्यादिभासकानुमितिसामग्रीतोऽपि वह्न्यादौ कांचनमयत्वादिविशिष्टबुद्धिरुत्प

१८० द्यत इति विशेष्यभासकानुमितिसामग्रीसहितमपि कांचनमयत्वरूपविशेषणज्ञानादिकं स्वविषयभासकमिति चेन्न तु तादृशमपि तत्तद्विशेषणज्ञाना

१८० दिकं तथा वह्निव्याप्यवान्पर्वत इत्यादिकांचनमयत्वादिविषयकत्वावच्छिन्नजनकपरामर्शसहितकांचनमयत्वादिज्ञानस्य विषयभासकत्वं तावतापि

न सिध्यति सर्वसाधारणं वह्न्यादिभासकसामग्रीत्वं तज्ज्ञासकानुमितिसामग्रीत्वं चैकं दुर्वचं सुवचत्वेऽपि न तेन रूपेण हेतुतेति तेन रूपेण न सहकारिता

संभव इति फलासिद्धिमेव विद्वांसो तिन वच्चेति ननु कांचनमयवह्निमान्पर्वत इत्यादिमानसे तत्तद्विषयोपस्थितिबाधविशेषाभावादिघटिता

या सामग्री विशिष्टविषयकत्वप्रयोजिका सा कांचनमयत्वाद्युपस्थितिबाधविशेषाभावादिसहितवह्न्यादिव्याप्यवत्तापरामर्शसमवधानकाले

प्यक्षतैव तादृशज्ञाने मानसत्वप्रयोजिकायामेव सामग्र्यामनुमितिसामग्रीरूपप्रतिबंधकाभावनिवेशात् न तत्तद्विशिष्टविषयावगाहिताप्रयोज १८०

कघटकविरहे प्रयोजनविरहेण तदनन्तर्भावात् न च तादृशसामग्रीप्रविष्टविशेषणज्ञानस्य मानसानुमित्योर्नैकरूपेण हेतुतेति कथं तादृशसामग्र्या

अनुगतरूपेणोभयत्र विशिष्टविषयकत्वप्रयोजकतेति वाच्यं प्रत्यक्षानिष्ठोपनायकज्ञानजन्यतायामप्यनुमितिसाधारणालौकिकज्ञानत्वस्यैवाव

छेदकत्वोपगमेन मानसानुमित्योरेकरूपेण विशिष्टज्ञानहेतुत्वानपायात् । न च प्रत्यक्षत्वापेक्षया ऽलघोर्ज्ञानत्वस्योपनायकज्ञानजन्यतावच्छेदकत्वं निर्यु
क्तिकं । तुल्यशरीरत्वेपि विनिगमनाविरहेण उभयोस्तथात्वस्याप्रत्यूहत्वात् । इत्याशंक्यानुमितावुपनीतभाने बाधकमाहाभिधेयत्वादिनेति । इदमापात
तः प्रमेयत्वानुमितिपूर्वं विकल्पादेरुपस्थितिसत्वे ऽनुमित्यनुभवदशायां पर्वतादौ मानसवत्प्रत्यक्षोपनीतभानस्य सर्वमत एव कुवर्त्तितया वह्न्याद्यर्थप्रवृत्तेः । प्र
योगे विलंबेनावश्यकत्वात् । यदा च तदभावस्याप्युपस्थितिस्तदा तस्यापि प्रत्यक्षे तत्तद्धर्मिगततया भानसंभवेन यथा न तन्निश्चयरूपं प्रत्यक्षं तथानु
मितावपि तदभावस्य तथाभावेन न तन्निश्चयानुमितिरिति प्रवृत्त्यतिप्रसंगे समाधानं तुल्यं । एवं तद्व्याप्यवत्ताज्ञानाजन्ये उपस्थितिबाधाभावमात्रा
धीने तन्निश्चये ऽप्रामाण्यशंकासंभवेन न तदर्थिप्रवृत्तिरित्यपि समाधानं सममेव । यत्तु असत्यपि बाधाद्यवतारे उपस्थितानां सर्वेषां धर्माणां न सकलोप
स्थितधर्मिषु भानमिति यद्धर्मज्ञानव्यक्तितो यत्र यत्र धर्मिणि यद्धर्मस्योपनीतभानं प्रामाणिकं तत्तज्ज्ञानव्यक्तेरननुगतरूपेण तत्तदुपनायकतास्वीका
र्यं । तथा च फलाभावान्न कस्यापि ज्ञानस्यानुमितौ साध्याद्यंशे स्वविषयधर्मान्तरभासकत्वमुपेयत इत्यनुमित्युपनीतभानखंडनं तदपि न सम्यक् । ए
वं सति उपनीतभानप्रत्यक्षे बाधादिबुद्धेः प्रतिबंधकताविलयप्रसंगात् । बाधादिज्ञानकालीनज्ञानस्योपनायकत्वाकल्पने नैव तदानीमुपनीतभान
वारयासंभवात् । पुरुषविशेषस्योपनीतविषयविशेषभाने ऽनुगतरूपेणोपनायकज्ञानहेतुत्वसंभवाच्चेति । इदं तु बोध्यं । अनुमितावुपनीतभानस्वीकारे

हे०ग०
१८१
|8|

वह्न्याद्यवृत्तित्वकांचनमयत्वादिनेव तद्वृत्तिमहानसीयत्वादिनापि पर्वतादौ वह्न्याद्यनुमितेः शुद्धवह्न्यादिव्याप्यवत्तापरामर्शतः संभवेन तद्विरोधितया समा
नाधिकरणमहानसीयवह्नित्वाद्यवच्छिन्नाभावरूपबाधस्याप्यसंकीर्णदोषतापत्तिरिति चेत्तर्हि व्याप्यधूमवान्पर्वत इत्यादिपरामर्शान्महानसीयवह्न्यादिवि
धादेव न पर्वतादौ भासत इति बाधस्य पृथग्दोषत्वमिति पक्षधर्मताबलेन साध्यमूलोपदर्शितसिद्धांते उपाध्यायोक्तदूषणं शंकते नन्विति· विशेषतः म
हानसीयवह्नित्वादिना· तथासिद्धिः तादृशविशेषधर्मप्रकारिकासिद्धिः सामान्यतः व्यापकतावच्छेदकवह्नित्वादिना· विशेषतो बाधः महानसीयव
ह्नित्वाद्यवच्छिन्नाभावग्रहः भिन्नप्रकारकत्वात्· अभावप्रतियोगितावच्छेदकतया ग्राह्यतावच्छेदकरूपप्रकारानवगाहित्वात्· समानप्रकारकत्वस्ये
व प्रतिबंधकतायां तंत्रत्वादिति भावः समानविषयकत्वमेवेति· अभावप्रतियोगितावच्छेदकतया ग्राह्यवृत्तिधर्मावगाहित्वमेवेत्यर्थः न त्वभाव
प्रतियोगितया ग्राह्यविषयकत्वमेवेत्यर्थः वह्निर्नास्तीत्यादिसामान्याभावबुद्धौ महानसीयवह्न्यादेः प्रतियोगितया भाने महानसीयवह्न्यादिज्ञान
विरोधित्वानुपपत्तेः न च सामान्यप्रत्यासत्तितः सामान्याभावबुद्धौ सकलप्रतियोगिभानं नियतं· सामान्यज्ञानसत्त्वेपि तत्प्रकारकलौकिकप्रत्य १८१
क्षसामग्र्यसत्त्वे सकलसामान्याश्रयभानासंभवात्· अनुपस्थितव्यक्तीनां विशेषणज्ञानरूपकारणविरहेणाभावांशे प्रतियोगितया प्रकारत्वा
योगाच्च· एवकारेण समानप्रकारकत्वतंत्रताव्यवच्छेदः अनुमितावेव चेत्समानविषयकत्वेन विरोधित्वोच्यते तत्राह रूपवानित्यनुमितेश्चेति· अ

रूप्यं। रूप्यभिन्नं शंकितमारोपितं वेति। आकारेणास्थायां। रूप्यत्वांशे निर्धर्मितावच्छेदकतदवच्छिन्नविशेषणताकबुद्धौ रूप्यत्वप्रकारकज्ञानत्वेन तन्नि-
श्चयतत्संशययोर्द्वयोरेव हेतुत्वात्। तयोः संशयानुमित्योः आनुभविकत्वादिति। तथा चानायत्यात्र रूप्यविषयत्वस्य स्वीकरणीयतया समान-
विषयकत्वेन विरोधितायां तदनुपपत्तिरिति भावः। ननु पूर्वं रूप्यत्वेनारूप्यज्ञानविरहेपि तादृशसंशयादौ विशेष्ये विशेषणमिति रीत्या धर्मि-
विशेषणतया भासमाने अरूप्ये रूप्यत्वभानं संभवति। साशंक्यबाधकान्तरमाह दोषवशादिति। श्वेतं इदं रूप्यमिति। इदंपदस्य धर्मिपरताव्या-
भाय। इह पीत इति। यद्यपि ग्राह्यशंखवृत्तिशुक्लत्वावच्छिन्नाभावग्रहे इह शंख इति पीतत्वाविषयकज्ञानस्याप्यनुपपत्तिः। तथापि भ्रमस्य साक्षात्कारि-
त्वानविरोधिताप्रयोजकपित्तादिदोषजन्यतायाश्चैतत्प्रकारेण शंखग्रहस्य तत्रानुत्पत्त्या शंखग्रहे श्वैत्याविषयकत्वस्य च लाभाय पीत इति। प्रत्यया-
दिति। साक्षात्कारिप्रत्ययादित्यर्थः। अत्र शंखत्वेनासंनिकृष्टस्यापनीताशंखस्य न भानोपगमसंभवः। शंखं साक्षात्करोमीत्यनुभवात्। नापि लौकि-
कसंनिकर्षाश्रयस्य कस्यचिदशंखस्य। न दानीं तत्राशंखत्वसाक्षात्कारसामग्र्यासत्वेन शंखत्वग्रहासंभवात्। अनन्तत्र शंखत्वे न शंखस्यैव भानमंगी-
कार्यं। तत्र शुक्लाभावग्रहदशायां भवतो न संभवतीति भावः। तत्र पित्तादिना प्रतिबंधात् शंखादेः श्वैत्याग्रहणेव इह श्वेतः शंख इत्यादिसाक्षात्का-
रविरहोपपत्तेः। दोषनाशे च सति तादृशभ्रमसत्वेपि क्षणं तादृशसाक्षात्कारोपगमसंभवात् दोषविशेषजन्यभ्रमस्य लौकिकप्रत्यक्षप्रतिबंध

कत्वं सविवादमित्याशंक्य बाधकांतरमाह। घटे इति। ग्राह्यपर्याप्तिधर्मावच्छिन्नाभावग्रहस्य प्रतिबंधकत्वोपगमे द्वौ न स्त इत्यत्र परंपरासंबंधेन द्वित्वा
हे० ग० भावस्य विषयत्वोपगंतृमते च घटपटौ न स्त इति ग्रहे घटोस्तीति ज्ञानस्यानुपपत्तिरित्यतो विशिष्टाभावग्रहदशायां विशेष्यप्रतीतिपर्यंतानुपप
१८२ त्तिप्रदर्शनं। यद्यपि विशेष्यवत्ति विशिष्टाभावग्रहस्य विशेषणाभावविषयकत्ववादिनां प्राचां नयमप्यनुपपत्तिः। वस्तुतः समानप्रकार
कत्वेन विरोधितामते पि दंडविशिष्टश्चैत्रो नास्तीति ग्रहदशायां दंडोपलक्षितचैत्रवत्ताग्रहस्य समानप्रकारकस्यानुपपत्तिरित्युपलक्षणं।
182 भवत्तद्धर्मप्रकारकप्रतियोगिमत्ताग्रहे तद्धर्मविशिष्टाभावीयप्रतियोगिताविलक्षणतद्धर्मावच्छिन्नप्रतियोगिताविषयकाभावग्रह
स्य तद्विशिष्टप्रतियोगिमत्ताग्रहे च विलक्षणप्रतियोगितावगाहि विशिष्टाभावग्रहस्य प० धकप्रतिबंधकता वाच्या। तथा च समानविष
यत्वेन विरोधितामते पि तद्वत्ताग्रहसामान्याविरोधितायां विशिष्टाभावीयप्रतियोगिताविलक्षणतद्वृत्तिधर्मावच्छिन्नप्रतियोगिता
वगाहित्वं विशिष्टवैशिष्ट्यग्रहस्याविरोधितायां च विशिष्टाभावीयविलक्षणप्रतियोगितावगाहित्वं तंत्रमित्युक्तौ नोक्तदोषावसरः। १८२
तथापि तद्वत्ताज्ञानं ×तन्मते× प्रति वास्तवतद्वृत्तिधर्मावच्छिन्नप्रतियोगितावगाहित्वेन प्रतिबंधकत्वेपि तो नास्तीति ग्रहे पीतः शंखोस्तीत्यानु
मानिकोदिप्रतीत्यापत्तेः। पीतत्वस्य वस्तुतः शंखावृत्तित्वात् शुक्लत्वस्य शंखावृत्तित्वभ्रमदशायां शुक्लो नास्तीति ग्रहे पि तादृशप्रतीत्यनु

पपत्तिश्चेति॰ तद्व्यक्तित्वस्थाने तद्व्यक्तितया गृह्यमाणत्वं धर्मविशेषणं देयं॰ तथा च कालांतरीयपुरुषांतरीयज्ञानव्यावर्त्तनाय तत्तत्कालपुरुषनिवे
शेन महागौरवं दूषणं बोध्यं॰ न च समानप्रकारकत्वेन विरोधितामते तत्तद्व्यक्तित्वप्रकारकप्रतियोगिकत्वमताग्रहे तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताका
भावज्ञानस्य यावत्यः प्रतिबंधकतास्तावत्य एव बाधबुद्धिप्रतिबंधकताः समानविषयकत्वेन विरोधितामते॰ समानप्रकारकत्वेन प्रतिबंधक
तामते च पटत्वघटत्वादिरूपप्रकारांतर्भावेन प्रतिबंधकतानामाधिक्यमिति गौरवमिति वाच्यं॰ समानविषयकत्वेन विरोधितामते उक्तक्रमेण
ज्ञानव्यक्तिभेदेन प्रतिबंधकताभेदादिति गौरवात्॰ वायौ रूपविशेषाभावकूटस्य ग्रहदशायां वायौ रूपान्यत्किमपि समवायेन नास्तीति भ्रमसत्वे
वायू रूपवान्न वेति संशयादेरनुपपत्तिरपि तन्मते द्रष्टव्या॰ ननु समानाकारकत्वेन विरोधित्वे पर्वतो महानसीयवह्निर्नास्तीत्यादिविशेषबाधा
वतारदशायां सल्लिंगपरामर्शाद्वह्निमानित्यादिना सामान्यधर्मप्रकारेण पर्वतादौ महानसीयवह्न्यादिविषयकभ्रमानुमितिप्रसंगः॰ समानविष
यकत्वेन विरोधित्वे तद्भासकेतरबाधाद्यसत्वेपि विशेषबाधादेव न तत्र तज्ज्ञानप्रसंग इत्यत आह सदिति॰ विशेषबाधावतारानवतारयोः
समान इति॰ समानप्रकारकत्वेन विरोधितामते यथा विशेषबाधावतारदशायां तत्प्रसंगस्तथा विशेषभासकेतरबाधाद्यसत्वे विशेषबा
धानवतारदशायां तत्प्रसंगोस्तीत्यर्थः॰ समानसमाधानमिति॰ यथा समानविषयकत्वेन विरोधितामते बाधितेतरबाधाद्यसत्वे विशेष

बाधानवतारेणादृशेतरबाधादिरूपदोषविरहादेवननादृशभ्रमानुमितिरितिसमाधानंतथासमानप्रकारकत्वेनविरोधितामतेपितदेवस
हे०ग० माधानमित्यर्थः। यद्यपिसमानप्रकारकत्वेनविरोधितामतेपीतरबाधादितोविशेषरूपेणैवपक्षे बाधितविशेषभानमभ्युपगम्यबाधासंकरस्यैव
१८३ स्याभ्युपगमतयाभवन्मतेऽप्युक्तरीत्यानातिप्रसंगवारणसंभवःनादृशबाधादिरूपदोषस्यसामान्यरूपेणबाधितव्यक्तिविषयकानुमितावहेतुतयातादृश
183 दोषविरहस्यभ्रमानुमितिविरहाप्रयोजकत्वात्·तथापिभवन्मतेसामान्यरूपेणपक्षेबाधितविशेषानुमित्यप्रसिध्यातत्सामग्र्यकल्पनेनैनत
प्रसंगः। प्रत्यक्षेप्रसिद्धस्यबाधितविशेषभानस्यानुमितावभावस्तादृशीसामग्रीविरहप्रयोज्यएवेति·यद्यपिसाध्यतावच्छेदकप्रकारेणा
प्रसिद्धमिवप्रसिद्धमपिसाध्यंधूमगोत्वादिकंसाधयेदितिमूलकल्लिखनात्·साध्यतावच्छेदकवह्नित्वादिप्रकारकबाधितविशेषसिद्धि
विरोधितयाबाधस्यहेत्वाभासत्वंमूलकाराभिप्रेतं·तथापिसमानविषयकत्वेनविरोधितायाविचारासहत्वात्तामुपेक्ष्यसहकारिविशेषवशात्
व्यापकतानवच्छेदकप्रकारेणापिसाध्यस्यानुमितौभानमुपगम्यसमाधत्तेअत्रवदंतीति·लाघवज्ञानादित्यादिनाएकविशेषबाधपरिग्रहः। प्र १८३
कारीभवतीति·साध्यांशइत्यादिः। अत्रापसिद्धांतशंकामपनिनीषुर्मणिकारसंमतिमादर्शयितुंयत्रतस्यापिव्यापकतानवच्छेदकप्रकारकत्वं
अनुमतंतथाविधदृष्टांतद्वयमाहयत्रेत्यादिना·इत्यत्रेति·व्यतिरेकिग्रंथेमणिकारोपदर्शितवह्निःसत्वसाधकलिंगविशेषणासिद्धिपरिहा

रफलकानुमानइतिशेषः। जीवनप्रतियोगित्वमितिभावप्रधानं व्यापकतानवच्छेदकमपिसाध्यांशेलाघवज्ञानवलादन्यतरप्रतियोगित्वांशे
प्रकारीभवतीसनुषंगादिनान्वयः। ननुतत्रान्यतरप्रतियोगितात्वरूपव्यापकतावच्छेदकप्रकारेणैवलाघववलाद्विशेषस्यजीवनप्रतियोगि
त्वस्यसिद्धिर्नतुतादृप्येण। नचैवंलाघवज्ञानस्यानुपयोगः परामर्शस्येवसामान्यरूपेणावाधितविशेषानुमापकत्वसंभवादितिवाच्यं अ
पराविशेषभाननिवृत्तौलाघवज्ञानोपयोगात् यद्विचवाधितविशेषभासकलाघवज्ञानरूपदोषविरहादेवावाधितविशेषधर्मिकलाघवज्ञानदशायां
तादृशाविशेषाभानसंभवादबाधितविषयकलाघवज्ञानस्योपयोगितानघटतेभवतुतदानुपयोगएव। वाधितधर्मिकलाघवज्ञानमेवतज्ज्ञानवि
यामकतयाअवाधितभानप्रतिवंधकतयाचोपयुज्यतामित्यतआहान्यथेति। वहिःसत्वानुमानायोगादिति। यत्रज्योतिःशास्त्रावधारितनियमा
त्समयविशेषरूपजन्मलग्नादिलिंगात्देवदत्तस्यशतवर्षजीवितावश्यमवधारिता। अनंतरंचतभूयोभयोगहएवदृष्टः शतवर्षजीवीगृहएवेतिनि
यमोप्यवधारितः। ततःकदाचिद्योग्यानुपलब्ध्यागृहेतदभावंनिश्चित्यप्रतिसंधातुर्देवदत्तस्यशतवर्षजीवित्वेतदुपपादकंवहिःसत्वमावश्यकमि
तिगृहएवेतिनियमोनसंभवतीतितादृशानियमसत्वेचमरणस्यावश्यकतयातादृशजीवित्वनिश्चायकानियमोनसंभवतीतितादृशनियमग्रहोऽ
प्रमा। किंवाएतादृशानियमग्रहएवेतिदेवदत्तोजीवतिमृतोवेतितत्रमरणापेक्षयाभावरूपजीवित्वेलाघवग्रहेसतिजीवित्वोपपादकवहिःसत्व

हे०ग०
१८४
184

सिद्धेरनुमानतोऽनिर्वाहादित्यर्थः। तथा सति संशयकरणकार्थापत्तेर्निराकरणं नोपपद्यत इति भावः। ननु तत्र सामान्यरूपेण जीवित्वसिध्यैव विशेष
संशयनिवृत्तौ मानसी हेतुसिद्धिरित्यपि मणिकाराभिप्रायः संभवतीति समानविषयकत्वप्रयुक्तविरोधित्वाभिप्रायकतयापि तन्मूलव्याख्यासंभ
वादनुमितेर्व्यापकतानवच्छेदकप्रकारकत्वस्य मणिकारानुमतत्वं न लभ्यत इत्यनुशयेन दृष्टांतांतरानुसरणं एवमिति· क्षितिकर्तुरेकत्वमपीतिर्ईश्व
रानुमाने इत्यादिः। प्रकारीभवतीत्यनुषंगादिनान्वयः। तत्रैकत्वस्याप्रकारत्वे चेश्वरैकत्वानेकत्वयोर्नित्यसंशय इति पूर्वपक्षयित्वा लाघवप्रमाणसह
कारितया सिद्धांतं प्रणयतो मणिकृतोनुमतं युक्तिमाहान्यथेति· क्षितिकर्तुरेकत्वं च न क्षितिकर्तृनिष्ठभेदाप्रतियोगित्वं· अन्यत्र तदप्रसिद्धेः। क्षि
तिकर्तरि अंकुरादिकर्तृभेद एव क्षित्याद्येककर्तुरेकत्वं· अंकुरादिभेदः× कर्तर्य×श्चांकुरादिकर्तरि सिद्धे तत्रैव प्रसिध्यतीत्यनुपस्थितेः× च लाघवज्ञानं
विना तदसिद्धेः। अनुपस्थिते तत्र लाघवज्ञानासंभवात्· न च द्व्यणुकादिकर्तरि× तत्रैव लाघवज्ञानसंभवेन तत्सहकृतद्व्यणुकादिपक्षकसकर्तृ १८४
कत्वानुमानात् द्व्यणुककर्त्रादावंकुरादिकर्तृभेदरूपं तत्रैकत्वं सिध्यतीति वाच्यं· कार्यत्वादिलिंगेनांकुरादौ विशिष्य सकर्तृकत्वस्य प्रथमतः सिद्धा
वपि प्रत्येकमंकुरादावुभयकर्तृकत्वसंशयसंभवेन तत्कर्तृनिष्ठभेदाप्रयोगित्वाप्रसिध्यसंभवात्· किंत्वात्मानात्मोभयावृत्तिदुःखासमानाधिकरणवि
त्वशून्यत्वं तत्· तादृशं चादृष्टत्वं आत्मेतरद्रव्यद्वयेऽप्रसिद्धं। न शून्यत्वं च गुणादाविति· ननु लाघवज्ञानात्सामान्येनैव रूपेण लब्धयर्थविषयिण्यनु

मितिर्न तु व्यापकतानवच्छेदकधर्मेण लघ्वर्थविपरीतसंशयं च लाघवधीरेव निवर्तयिष्यतीत्याशंक्य युक्त्यंतरमाह अनुमितेश्चेति। तादृग्रूपेणेति। लाघव
धीविषयतावच्छेदकमहानसीयवह्नित्वादिरूपेणेत्यर्थः। तथाविधानुव्यवसायविरहात्। महानसीयवह्निमनुमिनोमीत्यनुव्यवसायासंभवात्। न
सिध्येदिति। तथा च वह्निमनुमिनोमीत्यादिप्रतीतेर्वह्निविषयकत्वादिमात्रसाधकतया विशेषतो महानसीयवह्न्यादिविषयकत्वसाधकत्वेनेति
विरहादिति भावः। भवतु लाघवज्ञानादिवशाद्व्यापकतानवच्छेदकप्रकारेण साध्यानुमितिस्तावता का क्षतिरित्याकांक्षायामाह अयं चेति।
महानसीयवह्नौ लाघवमित्यादिलाघवज्ञानसहकृताद्वह्निव्याप्यवान्पर्वत इत्यादिपरामर्शान्महानसीयवह्न्यादिबाधाग्रहदशायामिव तत्र
हृदशायामपि पर्वतो महानसीयवह्निमानित्यनुमितिः स्यात् अधादिना सो प्रतिबंधको भवेदिति बाधः प्रथमग्रेषु इत्यर्थः। शंकते सल्लिंगपरामर्शा
दिति। कथं भ्रांतानुमितिरिति दोषविरहादिति भावः। न जायेत वा कथं यथार्थेति। अनुमितिरित्यनुषज्यते। गुणरूपतत्कारणसत्वादि
ति भावः। उभयत्रैकमुत्तरमाह बाधानवतार इति। असल्लिंगपरामर्शाभावेपि बाधानवतारसहकृताद्बाधितार्थविषयकलाघवज्ञानरू
पाद्दोषाद्धेतोरेव भ्रांतानुमितिर्बाधग्रहरूपोत्तेजकाभावविशिष्टतादृशदोषरूपप्रतिबंधकसत्वात् प्रमानुमित्यनुत्पाद इष्ट्वापपद्यत इत्यर्थः। यद्य
पि भ्रमत्वरूपपरामर्शविरहेपि ग्राह्याभाववद्विशेष्यकपरामर्शरूपासल्लिंगपरामर्शस्तत्राक्षत एव तथापि तन्मात्रात्पर्वतादौ महानसीयवह्न्यादि

मानमिति लाघवज्ञानस्यादोषतायाआवश्यकत्वेतस्यतथात्वमप्रामाणिकं·नचलाघवज्ञानंविनापिमहानसीयवह्निव्याप्यवान्पर्वतइत्यादि
हे०ग० परामर्शाद्धूमानुमित्युत्पत्त्यातादृशपरामर्शस्यापिदोषत्वमावश्यकमितिवाच्यं·सर्वसाधारणपरामर्शत्वस्यैकस्याभावात्पर्वतविशेष्यकमहानसी
१८५ यवह्न्यनुमितौतद्विशेष्यकमहानसीयवह्नित्वावच्छिन्ननिरूपितव्याप्तिविशिष्टहेतुमत्तापरामर्शस्यहेतुत्वेपिमहानसीयवह्न्यभाववद्विशेष्य
185 कशुद्धवह्निव्याप्यवत्ताज्ञानत्वेनहेतुत्वाकल्पनात्·परामर्शलाघवज्ञानयोर्जन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशात्लाघवज्ञानजन्या
नुमितौमहानसीयवह्निव्याप्यवत्तापरामर्शस्यतज्जन्यानुमितौचलाघवज्ञानस्यनव्यभिचारः·केचित्तु·लाघवज्ञानोपनीतमहानसीयत्वा
दौनविधेयतावच्छेदकतारूपविलक्षणविषयतास्वीक्रियतेपितुप्रकारतामात्रं पर्वतोवह्निमानित्यादिसिद्धिदशायांतादृशानुमितिर्न
जायतएव·महानसीयवह्निव्याप्यवत्ताज्ञानजन्यानुमितौचमहानसीयत्वसहितवह्नित्वादिकमेवविधेयतावच्छेदकमितिकार्यवैचि
त्र्यान्नपरस्परंव्यभिचारइति·तन्न·लाघवज्ञानादधिकविषयकानुमितेःसाध्यतावच्छेदकावच्छिन्नप्रकारकसिद्धिप्रतिवध्यत्वेदेवद १८५
त्तेजीवनमरणान्यतरवत्तियोगित्वसामान्यनिश्चयदशायांलाघवज्ञानात्तज्जीवित्वस्यविशेषतोसिध्याबहिःसत्वानुमानानुपपत्तेःता
दृशसिध्यभावघटितलाघवज्ञानसहकृतसामान्यधर्मावच्छिन्नव्याप्यवत्ताज्ञानघटितसामग्र्याभिन्नविषयकप्रत्यक्षादौप्रतिबंधकता

धिकंप्रामाणिकत्वात्तद्दोषायेतिसंक्षेपः। लाघवज्ञानप्रतिबंधकतायां बाधविशेषस्योत्तेजकत्वानुपगमे लघ्वर्थबाधग्रहदशायां लाघवज्ञानस
त्वेनुमितिरेव न स्यात्। प्रमायाभ्रमस्य च प्रतिबंधकसत्वादिति बाधग्रहाभाववैशिष्ट्यं प्रतिबंधके निवेशितं। बाधग्रहस्य विरोधिग्रहमात्रोपलक्ष
णं। तेषां च महानसीयवह्न्याद्यिमत्ताग्रहविरोधित्वेनैकाभावः। प्रातिस्विकरूपेणाभावकूटं वा निविशतामित्यन्यदेतत्। प्रतिबध्यतावच्छेदकं
च न यथार्थवह्न्यनुमितित्वं। यथार्थत्वस्य तद्घटितत्वकारकत्वस्य तत्तद्वह्निव्यक्तिभेदेनाभिन्नत्वात्। नापि वह्न्यंतरानुमितित्वं। वह्निद्वये लाघवज्ञान
सत्वे परस्परप्रतिबंधेनानुमित्युच्छेदप्रसंगात्। एकलाघवज्ञानेऽपरलाघवज्ञानानामनुत्तेजकत्वे गौरवात्। किंतु शुद्धवह्नित्वावच्छिन्नविधेयकानु
मितित्वमेव। ततो महानसीयत्वभानासिद्धिरिति दिक्। वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शान्महानसीयवह्नौ लाघवमित्यादिलाघवज्ञानदशा
यां महानसीयवह्निभिन्नवह्न्यभाववान्नित्यादीतरबाधग्रहदशायां च पर्वतादौ बाधितमहानसीयवह्न्याद्यनुमितिर्बाधानवतारदशायां जायते न
तु तद्दशायामिति विशेषबाधोऽसंकीर्णतया हेत्वाभासः। सामान्यधर्मावच्छिन्नसाध्यकानुमितौ विशेषव्यभिचारस्यादोषत्वादिति मणिकृतः।
अत्रोपाध्यायाः। लाघवज्ञानादसत्वेपि व्यापकतावच्छेदकतया गृहीतेनैव रूपेणानुमितिरिति। महानसीयवह्नित्वादिना न महानसी
यवह्न्यनुमितिर्जायते पि तु शुद्धवह्नित्वादिनैव। तत्र च महानसीयवह्न्यभावधीर्विरोधिनी। द्वित्वावच्छिन्नाभाववन्निश्चयदशायामपि त्र

साधकसंशयादेरनुरनुभवसिद्धतया ग्राह्यतावच्छेदकावच्छिन्नाभावस्यैव निश्चयविशिष्टधीविरोधित्वादतो न विशेषबाधस्य दोषता
हे०गा० संभवः। न च बाधबुद्धेः प्रतिबंधकतायां समानप्रकारकत्वस्य तंत्रत्वे लाघवज्ञानादिजन्या महानसीयवह्न्याद्यनुमितिर्यदि स्युः वह्नित्वादिनैव तन्मवगा
१८६ हेत तदा तदुत्तरं महानसीयवह्निमान्न वा पर्वत इति संशयः स्यादिति लघ्वर्थ[illegible]भासकमपि लाघवज्ञानमनुपयुक्तं स्यादिति समानविषयकत्वे
186 नैव बाधबुद्धेर्विरोधित्वं अनुमितौ विशेषणरूपेण लघ्वर्थविषयकत्वं वा आवश्यकमिति उभयथैव विशेषबाधो हेत्वाभासो भवेदिति वाच्यं। लाघवज्ञा
नस्यैव तादृशसंशयविरोधित्वात् लाघवज्ञानजन्यानुमितिनाशानंतरमिव लाघवज्ञाननाशानंतरमपि क्षणं संशयोत्पत्तेरपेक्षितविरहात् अत्र नव्याः।
लाघवज्ञाननाशे लाघवज्ञानजन्यानुमितिसत्त्वेपि यथोक्तसंशयः स्वीक्रियते तदा लाघवज्ञानस्य लघ्वर्थभासकत्वमेवोच्छिद्येत। तज्जन्यानु
मितौ लघ्वर्थविषयताया व्यर्थत्वात् न च तस्याः फलं तदानीं तत्सत्त्वेपि लघ्वर्थविषयकत्वेनानुमितेरनुव्यवसायादनुभवबलाद्यायालमनुमितेर्लघ्वर्थवि
षयकत्वमिति वाच्यं। यतो वह्निमानित्यनुमितेरनुव्यवसायस्य वह्निमनुमिनोमीत्याकारकत्वेव ननु महानसीयवह्निमनुमिनोमीत्याकारकतेति त १८६
स्य तद्विषयावगाहितायाप्यसिद्धेः। एवं महानसीयवह्नौ लाघवज्ञानसत्त्वे तद्दशायामिव सल्लिंगपरामर्शात्प्रमानुमितिः स्यादिति लाघवज्ञान
स्य प्रमानुमितिप्रतिबंधकत्वमुभयमत एवावश्यकं। तत्र चोपाध्यायमते पर्वतीयवह्नौ महानसीयवह्नौ च लाघवाभिसंधानदशायां लाघवज्ञान

दृशायां पर्वते पर्वतीयवह्न्यनुमितिनिर्वाहाय बाधितार्थविषयकलाघवज्ञानप्रतिबंधकतायाम बाधितार्थविषयकलाघवज्ञानस्योत्तेजकता वाच्या।
तथाच पर्वतत्वचत्वरादिविशेष्यक पर्वतीयचत्वरीयवह्न्यादिविषयताकानुमितित्वेन प्रतिबध्यत्वं पर्वतीयचत्वरीयवह्न्यादिधर्मिकलाघवज्ञानविरहविशि
ष्टमहानसीयवह्न्यादिधर्मिकलाघवज्ञानत्वेन प्रतिबंधकत्वमुपेयमित्येकैकविधलाघवज्ञानस्य प्रतिबंधकत्वे पक्षभेदेनानंत्यं। नव्यमते तु
वह्नित्वपर्याप्तविधेयतावच्छेदकताकानुमितित्वं लाघवज्ञानस्य प्रतिबध्यतावच्छेदकं। पर्वतीयवह्नौ लाघवमित्यादिलाघवज्ञानात् पर्वतादौ
पर्वतीयवह्नित्वेनैवानुमित्युत्पादात्। तस्य च शुद्धवह्नित्वावच्छिन्नविषयकतया लाघवज्ञानस्योत्तेजकत्वमंतरेणैव निर्वाह इति न पक्षभेदेन
प्रतिबंधकताभेदः। वह्नित्वादौ विधेयतावच्छेदकतापर्याप्तिनिवेशश्चोपाध्यायमतेऽप्यावश्यकः। अन्यथा पर्वतीयवह्निव्याप्यवान
यं पर्वत इत्यादिपरामर्शान्महानसीयवह्नौ लाघवज्ञानदशायां पर्वतादौ पर्वतीयवह्नित्वादिना पर्वतीयवह्निभानानिर्वाहात्। अथ पर्वता
दौ महानसीयवह्न्यादेर्बाधग्रहदशायां तद्धर्मिकलाघवज्ञानसत्वेपि तत्र पर्वतीयवह्न्यादेरेवानुमितिर्नव्यमते इति तादृशबाधग्रहस्य लाघव
ज्ञानप्रतिबंधकतायामुत्तेजकत्वमावश्यकं। तथाच पर्वतादौ महानसीयवह्नेर्बाधग्रहेप्युक्तलाघवज्ञानसत्वेपि चत्वरादौ चत्वरीयवह्न्यनुमित्यु
दयात् तद्धर्मिकतद्बाधितवह्न्याद्यनुमितौ तत्तद्धर्मिकमहानसीयवह्न्यनुमितिप्रतिबंधकबाधग्रहमुत्तेजकीकृत्य पक्षभेदेन लाघवज्ञानस्य विभिन्न

हे०ग०
१८७
187

प्रतिबंधकताकल्पनं नव्यानामप्यावश्यकमिति चेत्· सत्यं· एवमपि पर्वतादिविशेष्यकशुद्धवह्नित्वावच्छिन्नवह्निविधेयताकानुमितित्वं बाधित
वह्निधर्मिकलाघवज्ञानप्रतिबध्यतावच्छेदकं नव्यमते· उपाध्यायमते च पर्वतादिधर्मिकशुद्धवह्नित्वाद्यवच्छिन्नपर्वतीयवह्न्याद्यनुमिति
त्वं· अन्यथा पर्वतादौ महानसीयवह्न्याद्यनुमितेरपि तद्धर्मिकलाघवज्ञानादनुपपत्तेरिति प्रतिबध्यतावच्छेदकलाघवान्नव्यमतमेव साधी
यः· न च महानसीयवह्न्यादिधर्मिकलाघवज्ञानप्रतिबंधकतायां तद्वत्ताज्ञानप्रतिबंधकबाधतदभावव्याप्यवत्ताज्ञानतदभावाव
च्छेदकधर्मदर्शनानां अनेकेषां नव्यमते उत्तेजकतया गौरवं· उपाध्यायमते च पर्वतीयवह्न्यादिधर्मिकलाघवज्ञानस्योत्तेजकत्वं· ता
दृशबाधादिग्रहदशायामपि पर्वतादौ महानसीयवह्न्यादेस्तु वह्नित्वादिना भानसंभवेन पर्वतीयवह्न्यादेस्तत्र भानानुपगमेन तादृशबा
धादिबुद्धेरनुत्तेजकमिति लाघवमिति वाच्यं· बाधादिबुद्धीनां महानसीयवह्न्यादिमत्ताग्रहविरोधित्वेनानुगमय्योत्तेजकत्वसंभवात्· १८७
नव्यमतेपि तेषां पृथगुत्तेजकत्वविरहात्· उपाध्यायमते पर्वतीयवह्न्यादिधर्मिकलाघवज्ञानादेर्यत्रोत्तेजकता· पर्वतीयान्यवह्न्य
भाववत्तानिति बाधादिबुद्धेरपि तद्दशायां पर्वतीयवह्न्यादिभानं निर्वाहयितुमुत्तेजकतया वाच्यतया गौरवाच्च· इतरबाधसहकृतसा
मान्यतोदृष्टस्यापि व्यापकतानवच्छेदकप्रकारकानुमितिजनकतायाः उक्तत्वात्तज्जन्यविशेषधर्मप्रकारकानुमितिविरोधितयापि बा

धस्यहेत्वाभासत्वं व्यवस्थापयति · तथेति · सामान्यतोदृष्टात् · सामान्यधर्मावच्छिन्नव्याप्यवत्ताज्ञानात् · तादृतरत्रासिद्धाशेषविशेषबाधसहकृता
दिति · यद्यद्विशेषरूपावच्छिन्नं सामान्यं प्रसिद्धं तदेकतररूपभिन्नसकलरूपावच्छिन्नस्य बाधसहकृतादित्यर्थः। शिष्यमाणप्रसिद्धप्रकारिकेति ·
यद्विशेषरूपावच्छिन्नस्य बाधो न गृहीतस्तद्धर्मावच्छिन्नप्रसिद्धप्रकारिकेत्यर्थः। तदानीमप्रतीतस्यात्मवृत्तित्वस्य बाधाग्रहेपि गुणत्वादिना दि
गंतद्व्यवृत्तित्वस्य बाधग्रहे विशेषतो मनोवृत्तित्वानुमित्युत्पत्त्या सहकारिशरीरे प्रसिद्धनिवेशः। संध्याभोजनप्रसिद्धिदशायां दिवाभोजनमात्र
बाधग्रहाद्विशेषतो रात्रिभोजित्वस्यापीनत्वे नासिध्या साकल्यनिवेशः। अज्ञातसुरभिगंधस्य सुरभिविजातीयगंधबाधग्रहात्पृथिवीत्वेन सुरभिगं
धत्वावच्छिन्नप्रकारकानुत्पत्त्यापत्त्या प्रसिद्धेः सहकारितालाभाय शिष्यमाणे प्रसिद्धिविशेषणमुपात्तं · अत्रेदं बोध्यं · यादृशसामग्रीबलादात्मवृत्ति
त्वाप्रसिद्धिस्थले तद्बाधाग्रहेपि मनोवृत्तित्वानुमितिस्तादृशी सामग्री अगृहीतबाधस्यात्मवृत्तित्वस्याप्रसिद्धिदशायामपि तत्कार्यं तदानीं न मनोवृ
त्तित्वानुमितिः। नहि मनोवृत्तित्वानुमितावात्मवृत्तित्वाप्रसिद्धेः प्रतिबंधकता संभवति येन तत्सत्वात्सामग्रीविरहः। तथा सति तद्बाधग्रहेपि मनोवृ
त्तित्वानुमित्यनुपपत्तेः। न च तन्मते द्विशेषबाधग्रहाभावविशिष्टतन्मते द्विशेषाप्रसिद्धेः प्रतिबंधकत्वान्नायं दोष इति वाच्यं · तथा सतीतरबाधग्रहहे
तुतायां निर्युक्तिकतापत्तेः। उत्तेजकतयैव तदुपयोगोपपत्तेः। यत्र विशेषांतरमात्रस्यैव न प्रसिद्धिस्तत्रोपस्थितविशेषप्रकारकानुमितेर्वारणाय

हे०ग० विशेषांतरप्रसिद्धेरेवहेतुताकल्पनौचित्यात्। तस्मात्तद्धर्मावच्छिन्नविशेषितसामान्यधर्मावच्छिन्नविषयकानुमितौ तद्विपरीतधर्मसहितसामान्यधर्मावच्छिन्ना
भावग्रहएवहेतुः न तु विशेष्यधर्मांतरविशेषितसामान्यधर्मावच्छिन्नाभावग्रहः। तद्विपरीतत्वं च तद्वत्त्वाभावः तद्वदन्यत्वं। असंतान्योन्याभावयोश्च विपरीतो
१८८ प्रतियोगितत्वावच्छेदकोऽभावग्रहे प्रतियोगितावच्छेदकसामान्यघटितविशेषधर्मप्रकारेणभासमाने प्रतियोगिनि यद्धर्मो विपरीतधर्मस्य यादृशांविशे
188 षणत्वं तादृशमेवानुमितौ तद्धर्मस्य सामान्यधर्मावच्छिन्नविशेषणत्वं। महानसीयभिन्नवह्न्यभाववानित्यत्रबाधग्रहे महानसीयत्वविपरीतस्य महानसी
यान्यत्वस्य प्रतियोगिनि साक्षाद्विशेषणतेति महानसीयत्वविशेषितस्यवह्नित्वावच्छिन्नस्यमहानसीयवह्निमानित्यनुमितौ भानं। विशेष्याभावान्यविशि
ष्टाभाववद्बुद्धित्वादिबाधग्रहे विशेष्याभावान्यत्वादेर्दृष्टसादिविशेषणकोटिविशिष्टेआवारकोविशेषत्वेणामितिःनेय× तदधीनविशिष्टव्यभिचाराद्यनु
मितावपितादृशाभावादौविशेष्याभावत्वादिधर्मस्यविशेषणतयाभानाद्विशिष्टव्यभिचारसिद्धिः। एवं च नायंरात्रिभिन्नभोजी। इच्छान मनोभिन्न १८८
द्रव्याश्रिताद्रव्यादिसामान्याभावावगाहिबाधग्रहदशायामेवपीनत्वगुणत्वादिनारात्रिभोजित्वमनोरूपद्रव्यवृत्तित्वादिप्रकारकानुमितिः दिवानभुं
क्तेनसंध्यायांभुंक्तेनपृथिवीवृत्तिर्नजलवृत्तिरित्यादिविशेषाभावकूटग्रहश्चसामान्याभावग्राहकतयैवोपयुज्यतइति। पृथक्पृथगेकविशेषाभावग्रहस्थले
तद्विशिष्टसामान्यसाधकहेतुतएवविशेषांतरप्रकारकसिद्धिः संभवति तथापियत्र तद्विशिष्टसामान्यसाधकहेतौविशेषांतरव्याप्तिग्रहोऽस्या

माणिकस्तत्र तस्मिन्ध्यर्थमीदृशसामग्र्यंतरकल्पनं॰ नच तत्रापि फलानुरोधात्तादृशव्याप्तिग्रहकल्पनमेवोचितमितिवाच्यं॰ यत्र पूर्वं विशिष्टहेत्वाद्यनुपस्थि
त्या व्याप्तिग्रहो बाधितस्तत्र तत्कल्पनस्यासंभवात्॰ नच विशेषणविशेष्ययोरुपस्थितौ मानसविशिष्टोपस्थितिसंभवात्कालविलंबेन व्याप्त्यादिग्रहे नु
मितिः शक्यते कल्पयितुं॰ यत्र च व्याप्त्याद्यग्रहः प्रमाणांतरासिद्धः तत्र फलमपलपनीयमितिवाच्यं॰ यत्र धूमत्वादिकमनुपस्थितं अथ च शब्दादिना वह्निव्या
प्यमहानसीयान्यवह्न्यभावोभयत्वादिना महानसीयवह्न्यादिव्याप्तिपक्षधर्मताग्रहस्तत्र सर्वमतसिद्धमहानसीयवह्न्याद्यनुमित्यर्थं तादृशव्याप्त्यादिज्ञा
नस्य तादृशानुमितिसामग्रीत्वमकल्प्यमित्या महानसीयान्यवह्न्यभावादिग्रहसहकृतवह्न्यादिव्याप्यवत्ताज्ञानस्यैव तादृशानुमितिसामग्रीत्वकल्पनादे
वोपपत्तेः फलापलापादेरन्याय्यत्वादिति॰ यथा विशेषांतरबाधसहकृता सामान्यसामग्री व्यापकतानवच्छेदकविशेषधर्मप्रकारेण व्यापकानुमितिं
जनयति तथा सामान्यज्ञानसहकृता विशेषांतरबाधसामग्र्यपि विशेषधर्मप्रकारेणाव्यापकमप्यनुमापयति॰ स्थलद्वय एव विशेषधर्मप्रकार
कसंशयानुत्पादस्यानुभविकत्वात्॰ तथाविधसामग्र्यास्तादृशानुमितिजनकत्वोपगमे वह्निमहानसीयान्यवह्न्यभावव्याप्योभयादिलिंगक
महानसीयवह्नित्वावच्छिन्नसाध्यकपरामर्शस्य महानसीयवह्नित्वाद्यवच्छिन्नविधेयकानुमितौ हेतुत्वांतराकल्पनेन लाघवाच्चेति मतमवलंब्यम
ङ्गीकृता पुरोवर्त्तिविशेष्यकवह्नित्वप्रकारकज्ञानत्वावच्छिन्ने वह्नित्वाभाववति वह्नित्वप्रकारकत्वाभावानुमानाद्वह्नित्ववति वह्नित्वप्रकारकत्व

हे०गा० १८६ रूपप्रामाण्यसिद्धिरंगीकृतेत्यवधेयं॰ व्यभिचारशरीरेऽत्यंताभावत्वेनाभावानिवेशनेपिआवश्यकप्रतियोगिवैय्यधिकरण्यादिविशेषणेनध्वंसप्रागभाव
वारणात्॰ किंतुसाध्याऽत्यंताभाववत्त्वाभिव्यक्तमितिमूलमसंगतमित्यभिसंधायाह किंतुसाध्येत्यादिकमापाततइति॰ प्रतियोग्यसामानाधिकरण्यविशेषणे
189 नेवसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वविशेषणेनापिध्वंसप्रागभावादिव्यावृत्तिःसंभवति॰ ध्वंसप्रागभावयोरत्यंताभावाविरोधि
त्वमतेतयोर्धर्मिविशेषसंबंधविशेषावच्छिन्नप्रतियोगिताकत्वेमानाभावादितिदर्शयितुंसाध्याभावेप्रतियोग्यसामानाधिकरण्यमिवसंबंधविशेषा
वच्छिन्नप्रतियोगिताकत्वमपिविशेषणंप्रदर्शितं॰ स्वध्वंसस्वप्रागभावावच्छिन्नस्वाश्रयस्यसामयिकस्वात्यंताभावावच्छिन्नत्वसत्वादत्यंता
भावंपरित्यज्यध्वंसप्रागभावोपादानमयुक्तमित्याशंक्याह स्वप्रागभावेत्यादिकमिति॰ स्पष्टत्वेनेति॰ तयोःप्रतियोग्यधिकरणवृत्तितायाःसर्व
मतसिद्धत्वादितिभावः॥ उत्पत्त्यादिकालेघटादौगंधादेरत्यंताभावासत्वेतत्रगंधत्वादिनासाध्यतायांप्रागभावादिकमादायबाधसमर्थनेपि
रूपत्वगंधत्वादिसामान्यधर्मपुरस्कारेणसाध्यतायांनबाधनिर्वाहइतिप्रागभावादिमत्यत्यंताभावस्वीकारआवश्यकइत्याहातएवेति॰ अतएवध्वं १८६
सप्रागभावसमयेतदत्यंताभावसत्वादेव॰ अन्यथारूपादिसामान्यात्यंताभावज्ञानस्यैवस्वतोरूपत्वाद्यवच्छिन्नवत्ताज्ञानविरोधित्वयाध्वंसप्रा
गभावयोर्विरोधित्वासंभवेनोक्तस्थलेबाधानवकाशात्॥ उपष्टंभासंगतिः॥ नहिसाध्यप्रतियोगिकाभावमात्रज्ञानमेवसाक्षात्साध्यतावच्छेदकावच्छि

न्नसाध्यधीविरोधि॰ तत्तत्साध्यव्यक्त्यभावज्ञानस्यापिसाध्यसामान्यधीप्रतिबंधकतापत्तेः। किंतुसाध्यतावच्छेदकावच्छिन्नाभावज्ञानमेव॰ नहिध्वंस
प्रागभावयोः सामान्यधर्मावच्छिन्नत्वं॰ सामान्यधर्मस्यतत्प्रतियोगितानवच्छेदकत्वादिति॰ मूलेअवच्छेदेमिद्धसाधनमिति॰ विशिष्टघटकेविशे
ष्यघटादौसाध्यसाधने॰ सिद्धस्यअबाधितस्यैवसाधनं॰ प्रमारूपैवानुमितिरितियावत्॰ तथाचनतत्रबाधोदोषइतिभावः॥ अवच्छेदके॰ ध्वंस
प्रागभावाद्विरूपविशिष्टघटकाविशेषणे॰ हेत्वसिद्धिः। पृथिवीत्वादिहेतावसिद्धिः॥ तथाचतत्पक्षकानुमानेनबाधस्यासंकरइतिभावः॥ ननुवि
शेषणविशेष्यपक्षके॰ संकीर्णबाधासंभवेपिविशिष्टपक्षकेतस्यानिष्प्रत्यूहत्वेस्तत आह विशिष्टंचेति॰ नान्यादिति॰ विशेषणविशेष्यामितिभा
वः॥ गंधप्रागभावाद्युपलक्षितघटादिवृत्तित्वसत्वेपिनतद्विशिष्टघटादिवृत्तित्वं॰ नहितद्वृत्तितयैवैकसमयावच्छिन्नतद्वृत्तित्वरूपंतद्विशिष्टवृत्ति
त्वंनिर्वहति॰ तथासतिप्रतियोगिनोध्वंसप्रागभाववद्वृत्तितयाएकसमयावच्छिन्नतत्सामानाधिकरण्यमपिस्यादितितद्विरोधोभज्येत॰ यदिच ध्वं
संप्रागभावयोःप्रतियोगिनश्चैकाधिकरणेवृत्तावेकसमयोनावच्छेदकइत्येकसमयावच्छेदेनैकत्रावर्तमानत्वरूपोविरोधस्तदापक्षतावच्छेदकध्वं
सादिसमयावच्छिन्नतद्वृत्तित्वरूपंतद्विशिष्टवृत्तित्वंप्रतियोगिन्यवगाहमानानुमितिर्बाधितविषयैवेतितादृशानुमितिविरोधितद्वच्छेदेनप्रति
योगिनोबाधोऽसंकीर्णस्तत्रदोषएव॰ पृथिवीत्वादिहेतोस्तद्विशिष्टवृत्तित्वेनासिद्धिविरहादितिसमाधत्तेतदित्यादिना॰ अधिकरणैकेनावच्छेदकैक्ये


हे०गा० वाधकांतरमाहात्म्ययेति· अवच्छेदकभेदेनह्वानिरिति· एकस्मिन्नप्यधिकरणेविभिन्नावच्छेदेनह्वानिः हीधितौसाध्यवत्वानवच्छेदकेत्यादि· वह्निमत्तान
१९० वच्छेदकशिखराद्यनवच्छेदेनपर्वतादौधूमादिनावह्न्यादिसाधनेयोग्यर्थः तत्रपक्षतावच्छेदकशिखराद्यवच्छिन्नेधूमादिमत्त्वस्यतदवच्छेदेनवह्न्या
द्यनुमितिजनकज्ञानविषयस्यासत्त्वाद्धेत्वसिद्धिः इतिकुतोवाधस्यासंकीर्णता· पक्षतावच्छेदकसामानाधिकरण्यमात्रेणहेतुमत्ताज्ञानस्यावच्छेद
190 कावच्छेदेनानुमितिजनकत्वेनभागासिद्धेरदोषताप्रसंगादितिशंकतेअथेत्यादि· घटत्वादेरितिपंचमी· पृथिवीत्वाद्यवच्छेदेनरूपादिसिद्धिप्र
संगादिति· पृथिवीत्वादिसामानाधिकरण्यमात्रेणपटादौघटत्वाद्यभावरूपभागासिद्ध्यहेपितत्सामानाधिकरण्यमात्रेणतद्धेतायह
संभवादितिभावः भागासिद्धेर्दोषत्वानुरोधेनपक्षतावच्छेदकपृथ्वीत्वाद्यंशेसाध्यस्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यामनु
मितौतत्रहेतोस्तादृशावच्छेदकत्वावगाहिपरामर्शत्वेनहेतुत्वमास्तां· पक्षतावच्छेदकदेशकालयोः स्वरूपसंबंधरूपसाध्यीयावच्छेदकत्वाव
गाहिन्यामनुमितौचनतादृशावच्छेदकत्वावगाहिपरामर्शत्वेनहेतुता· तदवच्छेदेनवाधवुद्ध्यादिरूपप्रतिबंधकाभावसहितसामानाधिकरण्य १९०
मात्रविषयकानुमितिसामग्रीतस्तादृशानुमितिस्वीकारेक्षतिविरहात्· अवच्छेदकत्वपदार्थयोर्भेदेनएकस्यवाधाभावमात्राज्ञानेप्यन्यस्याधि
कापेक्षायांवाधकाभावादितिसमाधत्तेअवच्छेदकत्वयोरिति· शिखराद्यवच्छेदेनवह्न्याद्यनुमितौतदवच्छेदेनहेतुमत्ताज्ञानस्यहेतुत्वमभ्युपेत्यापित

च बाधस्य दोषतां व्यवस्थापयति· अवच्छिन्नवृत्तेरिति· शिखराद्यवच्छेदेन धूमाद्यसत्त्वेपि तदवच्छिन्नत्वभ्रमविषयधूमादितः तदवच्छेदेन वह्न्याद्यनु
मितिसत्त्वात् बाधभ्रमेव विरुणद्धीति बाधो दोष इत्यर्थः। बाधबुद्धेः प्रमात्वाभिधानं च तद्विषयरूपदोषप्रसिद्धिं सूचयितुं· तथापि तत्रस्वरूपसदसि
द्धिसंकर एवेत्याशंक्य तत्संकरस्याकिंचित्करतामाह संकरेपि वस्तुत इति· ज्ञानासंकरादिति· असिद्धज्ञानदशायां बाधज्ञानस्यैवानुमित्युत्पा
दप्रयोजकत्वादित्यर्थः। वस्तुतः संकरस्याफलमप्याह सुखाद्यवच्छेदकेति· सुखाद्यनवच्छेदकं यन्नारकीयशरीरादिकं· शरीरत्वव्यक्तिविशेषादिर्वा तद
दवच्छेदेनात्मादिरूपपक्षे समवाये न सुखादिरूपसाध्यव्याप्यस्य दुःखादिरूपहेतोर्वर्तमानत्वादित्यर्थः। तथा च तादृशहेतावसिद्धिविरहात्· पक्षता
वच्छेदकशरीरविशेषाद्यवच्छेदेन साध्याभावोऽसिद्ध्याद्यसंकीर्णो बाध इति भावः। व्याप्यहेतोः सर्वविषयतावच्छिन्नवृत्तिकत्वे मूलावच्छिन्नो वृक्षः क
पिसंयोगवृत्तिकत्वादित्यादावपि मूलाद्यवच्छिन्नवृत्तिकपिसंयोगाद्यभावरूपबाधस्यासंकर इत्याह कपीति· ननु सर्वत्रानुमितौ साध्ये पक्षता
वच्छेदकस्य सामानाधिकरण्यमेव भासते· पक्षधर्मताबलात्· व्याप्यस्य हेतोः पक्षतावच्छेदकसामानाधिकरण्यरूपपक्षधर्मतायाः व्यापकस्य
साध्यस्य पक्षतावच्छेदकसामानाधिकरण्यं विनानुपपद्यमानत्वात्· न तु पक्षतावच्छेदकावच्छिन्नत्वमपि साध्यस्य तदवच्छिन्नत्वं विनापि हे
तोः पक्षधर्मत्वोपपत्तेस्तदवच्छिन्नत्वविरहात्· बाधाभावबलात् तज्ज्ञानेऽन्यदपि अबाधितं साध्यादौ किं न भासते· अथ व्याप्यस्य पक्षतावच्छेदकव्या

पक्षत्वरूपं तदवच्छिन्नत्वं साध्यस्य तादृशतदवच्छेदकत्वमंतरेणानोपपद्यत इति तदवगाहिनः परामर्शात्साध्ये पक्षतावच्छेदकव्यापक
हे०ग० त्वरूपतदवच्छिन्नत्वावगाहिन्यनुमितिर्युक्तैव अत एव भागासिद्धेर्दोषतापीति चेत् भवतु तादृशपरामर्शात्तादृशावच्छेदकावच्छे
१३१ देनानुमितिः न च तावतापि संकीर्णबाधसौलभ्यं हेतोः पक्षतावच्छेदकधर्मव्यापकत्वे बाधासंभवात् एवं यत्र यदवच्छेदेन हेतुस्तत्र तदव
च्छेदेन साध्यमिति व्याप्तिग्रहीतायां देशकालरूपपक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानात्तदवच्छेदेन साध्यानुमितिः स्यादेव तादृशव्याप्तिम
।६। ता हेतोः पक्षतावच्छेदकदेशकालावच्छेदेन सत्तायास्तदवच्छेदेन साध्यवत्त्वमंतरेणानुपपत्तेस्तज्ज्ञापकपक्षधर्मताबलसंपन्ने रक्षतत्वा
दिस्वेतावतापि न बाधासंकरसौलभ्यं साध्यानवच्छेदकदेशकालावच्छिन्नत्वज्ञानिके हेतौ दर्शितायाश्च अवच्छेदकांतर्भावेन व्याप्तेरसिद्धेरि
त्युपाध्यायानुयायिनामाक्षेपमनुभवावलंबनेन परिहरति अत्र चेति शब्दादिवैसंतं दृष्टांताभिधानमनुभवदार्ढ्याय इदं तु बो
ध्यं यादृशव्याप्तिज्ञानात्पक्षतावच्छेदकसाध्ययोः कैवल्यमेकत्र द्वयमिति रीत्या वैशिष्ट्यविषयिणी प्रमानुमितिस्तत्प्रमात एवं चे १३१
द्बाधाविरोधाभावसहकृतात्पक्षतावच्छेदककालादिविशिष्टानुयोगिकसाध्यवैशिष्ट्यविषयाप्रमानुमितिर्भवेत् तदा गुणादेर्द्रव्यप्रति
त्वाधकपलक्षितसत्तादिवैशिष्ट्यविषयकानुमितौ सामयिकजात्यादिलिंगकप्रतियोगितावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिवैय

धिकरण्यघटितव्याप्तिप्रमातोऽसतिबाधावतारे तादृशहेतौ वैशिष्ट्यविषयकप्रमानुमितिरपि तुल्ययुक्त्यायुज्येतेति उक्तव्याप्तौ प्रतियोगि
हे० गा० तावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशनमनर्थकंस्यादितिदिक् ॥ इतिश्रीगदाधरभट्टाचार्यविरचितानुमानखंडदीधितिटिप्पणी
१९२ समाप्ता ॥ शुभमस्तुसततम् ॥
गिरांदुहितुर्नमत्सुरवरावतंसीभवत्पदांबुजरजःकणाकलिततीक्ष्णधीसंपदा ॥ मयादरविनिर्मिताकठिनदुर्गतिकाटिवानवीनपदवी ॥
152 मुदंवितनुतांसदाधीमतां ॥१॥ ॥

नं: १४८४



गदाधरीदीधति पत्र १७५

प्रती ३५०० पं: १६

~~पत्र ८५~~

पत्र: ८५